गौतमसूत्रवृत्तिः न्यायसूत्रवृत्तिर्वा

१५३०

गौतमसूत्रवृत्ति

न्यायबस्ता २० अंक १५३०

॥ न्यायसूत्रे वृत्तिप्रारंभः ॥

२५

श्रीगणेशाय युगपद्वपुर्लीलालक्ष्मीजितमदनकोटिर्व्रजवधूजनानामानंदं कमनीयं विरचयन् । स कोऽपि प्रेम
णां प्रस्थप्रतुमनो मंदिरं चरस्त्रिलोकीनां सजलजलदश्यामो नु ॥१॥ संयुक्तां युक्तरूपामभिनवनिहितालक्तकार
कभासां संध्यापायप्रभानां रतिरुचिरजरां चरणीयंतीमभिख्यां । मानव्यामोकनस्त्रिपुरहरशिरोरत्नभूषा
विशेषं भूयो भव्यं विधातुं चरणनखरुचं भावयामो भवान्याः ॥२॥ यदीयतर्ककिरणैस्ततैर्ध्वांतसंततिः स
तस्तरंति भास्वंतमक्षपादं नमामि तं ॥३॥ अद्वैतं गुरुधर्मयोरखिलसत्क्ष्मामंडलीमंडनं रूपं किंचन पौरुषं गि
रः स्वप्रगल्भसंपादकं । दानेकरुणामिवावतीर्णमपरं दानैर्दयादक्षिणं तातं विघ्नविनाशं चारुयशसं विद्या
निवासं नुमः ॥४॥ अलसमतिरपीदं न्यायशास्त्रं विरहितवक्रं यल्लोललीलया वितुवित्तः इति विनिहितचेताः
कौशलं कर्तुकामो गुरुचरणसरोजो हं करणाधारीकरोमि ॥५॥ विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्यावि
दुषामतिसरलाक्षिप्यामसतां मुदे भविता ॥६॥ प्रयोजनमनभिसंधाय प्रेक्षावंतो न प्रवर्त्तंते अतः प्रथमं
प्रयोजनमभिधानीयं तथा चाहुः । सिद्धार्थं सिद्धसंबंधं श्रोतुं श्रोता प्रवर्त्तते । शास्त्रादौ तेन वक्तव्यः संबंध
ः सप्रयोजनः । सिद्धो ज्ञातोऽर्थः प्रयोजनं यस्य तत्तथा एवं सिद्धसंबंधमित्यपि अत एतत्प्रतिपादनाय भगवा
नक्षपादः प्रथमं सूत्रं रचयति । प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडा

लोकी२

दविस्तृतं

हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ अत्र तत्त्वज्ञाननिःश्रेयसयोः शास्त्रतत्त्व
ज्ञानयोश्च हेतुहेतुमद्भावः प्रमाणादितत्त्वज्ञानयोर्विषयविषयिभावः प्रमाणादिशास्त्रयोः प्रतिपाद्यप्रति
पादकभावः शास्त्रनिःश्रेयसयोश्च प्रयोज्यप्रयोजकभावः संबंधः तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रं
तथा च शास्त्रनिःश्रेयसयोः परंपरया तत्त्वज्ञानद्वारकहेतुहेतुमद्भाव एव संबंध इति संप्रदायः ॥ अत्र च सर्वपदार्थप्रधा
नो द्वंद्वः समासः यद्यपि भेदे द्वंद्वविधानादत्र च बहूनां पदार्थानां भेदान्न द्वंद्वसंभवस्तथापि पदार्थतावच्छेदक
भेदाद्देव द्वंद्व इत्यन्यत्र विस्तरः तत्र च निर्देशे यथावचनं विग्रह इति यथाश्रुतभाष्यानुसारिणः प्रमाणानि च प्रमेयं
च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासा
श्च छलं च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयंति · समस्तपदविग्रहस्तु भाष्यस्य वचनपदेनक्त वितसोऽत्र धक
विग्रहार्थवचनं व्यस्य [illegible] ते तत्र प्रमाणप्रमेये च सोऽत्र वचनं ग्राह्यते सप्रयोजनत्वात् · संशये सिद्धांते छले च बहुव
चनं [illegible] संशयच्छले च त्रैविध्यस्य सिद्धान्ते चातुर्विध्यस्य वक्ष्यमाणत्वात् अन्यथा जातिनिग्रह
स्थानयोर्बहुवचनं तत्रापि व्याहन्यते एकवचनस्यैव लक्षणसूत्रे सत्वादिति वदंति · नव्यास्तु सर्वत्र प्रथमोप
स्थितैकवचनेनैव विग्रहः न ह्यत्र बहुवचनेनैव प्रमाणादीनां चतुष्ट्वं परिच्छिद्यते · किं नामाग्रिमविभागेन
तच्चं च पत्यते ॥ ननु दृष्टान्तादौ ... तथा च दृष्टान्ते द्विवचनं अन्वयव्यतिरेकभेदेन दृष्टान्तद्वैविध्यस्य

द्वित्रि १

२

मनस्येकं॰ धवखदिरादौ धवश्च खदिरश्च पलाशश्चेति न विगृह्यते अत एव प्रयोजनस्यैकवचनान्तत्वोपपत्तिर्हि
भागाकरणेपि सुखदुःखाभाववत् साधनभेदेन तस्य बहुत्वं न विरुध्यते इति प्राहुः ॥ अत्र च निःश्रेयससिद्धये पूर्व
वृत्तस्य प्रमेयेन प्रयत्नान्तरमपेक्षितमिति प्रतिपादनायाधिगमपदं ॥ ननु प्रमाणादयः पदार्था इति शब्दात् प्रथमसू
त्रादेव वा तत्त्वज्ञानं स्यादिति चेन्न ॥ तेषां विशिष्य ज्ञाने हि तत्त्वज्ञानं तच्चोद्देशलक्षणपरीक्षाप्रकाशकाच्छास्त्रादेव शा
स्त्रं हि विशिष्टानुपूर्वीकपंचाध्यायी ॥ अध्यायस्त्वाह्निकसमूहः ॥ आह्निकं तु तादृशप्रकरणसमूहः प्रकरणं तु ता
दृशसूत्रसमूहः सूत्रं तु तादृशवाक्यसमूहः वाक्यं तु तादृशपदसमूह इति वदंति ॥ अत्र समूहशब्देनानेकत्वं विवक्षि
तं तेनाध्यायादेराह्निकादिद्वयात्मकत्वेपि न क्षतिः ॥ अत्र च यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरू
पयितुमर्हम् ॥ तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशः ॥ ततोवसरतो बुभुत्सि
तप्रमेयस्य तत्त्वार्थव्यवस्थापनं न्यायाधीनं तथा न्यायेन निरूपणीये ॥ प्यर्हि तयोर्न्यायपूर्वांगयोः संशयप्रयो
जनयोस्तत्राप्यर्हि ततया संशयस्य प्रथमं न च निर्णीतेपि मननविधानान्न संशयस्य न्यायांगत्वमिति वाच्यं आहा
र्यसंशयोपगमात् ॥ यद्यपि प्रयोजनेन न्यायांगमपि तु तत्त्वज्ञाने तथापि तदेव निरूपणीयं न तु ज्ञाननिरूपणापेक्षे
ति ॥ परप्रत्यायने दृष्टांतस्य मूलत्वादनंतरं दृष्टांतस्य ॥ दृष्टांतमूलको न्यायः सिद्धांतविषयस्ततोनंतरं सिद्धांत

भ्र३

प ४ स्य ४

स्म०
२

प॰ ३

हेत्वाभासानां

ता ४

स्य ततश्चावसरतः सिद्धांताधीनस्य पंचावयवरूपस्य न्यायस्य ततश्चैककार्यतया न्यायसहकारिणस्तर्कस्य त
तश्च तर्कजन्यतया निर्णयस्य ततश्च निर्णयानुकूलत्वाद्वादस्य जल्पस्यापि वादकार्यकारित्वादनंतरं जल्पस्य तत
श्च वितंडयपेक्षकोनुकूलतया वितंडायाः कथात्रयस्यापि दूषणसापेक्षत्वादनंतरं दूषणरोबुनिरूपणीयेषु वादे दे
शनीयत्वरूपोत्कर्षवत्त्वाद्धेतुवदाभासमानत्वाच्चादौ हेत्वाभासानां ततश्च हेत्वाभासोपजीवनेनच्छलस्य स्वव्या
घातकत्वेनोत्पत्तावसदुत्तरत्वात्ततो जातेः कथावसानत्वेनाथादनंतरं निग्रहस्थानानामिति॥ अत्र च प्रमेयांतःपा
ति बुद्धिरूपस्यापि संशयादेर्निरनुयोज्यानुयोगरूपनिग्रहस्थानांतःपातिनो छलजात्योश्च प्रकारभेदेन प्रतिपाद
नेऽपि प्रयोजनबुद्धिवेशाद्यर्थमस्तु निग्रहस्थानांतःपातिनोऽपृथगभिधानप्रयोजनं तु जानाति भगवानक्षपाद एव॥
भाष्ये तु वादे देशनीयतया हेत्वाभासानां पृथगुपन्यास इत्युक्तं॥ अत्र वार्त्तिकं यदि वादे देशनीयत्वात्पृथगभि
धानं तदा न्यूनाधिकापसिद्धांतानां वदे देशनीयत्वात्पृथगभिधानं स्यात्॥ यदि पृथगभिधानाद्वादे देशनीयत्वं त
दा संशयादीनामपि वादे देशनीयत्वं स्यात्तस्मात्सा॥ आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिरूपविद्याप्रस्थानप्रभेदज्ञा
पनार्थं संशयादेर्हेत्वाभासस्य पृथग्वचनमिति तन्मध्यमतम्॥ निग्रहस्थानांतर्गतत्वेनैव तन्निरूपणेन प्रस्था
नभेदासंभवात्॥ वयं तु हेत्वाभासानां न निग्रहस्थानत्वं तथा सति सर्वत्र हेत्वाभाससत्त्वात्सर्वस्यैव निग्रहीतत्वा

स्यचं = २

२ ना

३

पत्तेः तस्माद्धेत्वाभासप्रयोगो निग्रहस्थानं तद्विभाजकस्त्वत्रस्याद्धेत्वाभासपदं च तत्प्रयोगपरं तत्र च प्रयोगस्यानुल
क्षणामपेक्षणीयमापतुं हेत्वाभासमित्यतउक्तं हेत्वाभासाश्च यथोक्ता इति च गौतमसूत्रं · न च हेत्वाभासस्यावच्छे
दकमेवेश्वरं नैवच्छिद्रूपणायेक्षतिवाच्यं तथा सति प्रमाणेन तर्केण साधनोपालंभ इति वाक्ये स्वरूपावच्छेदकप्रमा
णाद्यपि पच्छिद्रूपणानायत्तिरिति युक्तमुत्पश्यामः । अत्र केचित् सूत्रादौ मंगलाकरणेन मंगलं न प्रामाणिकमि
त्यत्र सूत्रे कृतानां तथैव वर्णयन्ति तदसत् · कृतस्यैव निर्विघ्नसंभवात् · विघ्नाभाववति येनाकरणसंभवात् वयं तु
प्रमाणं प्रामाणिकलय इति भाववन्तो मंगलानातःपातिप्रमाणशब्दस्योच्चारणमेव मंगलमिति ब्रूमः । अत्र चोद्देश
लक्षणपरीक्षाणां पञ्चैव विषयेषु तत्रापि प्रथममुद्देशोऽनंतरं लक्षणं प्रसंगात् स्थलपरीक्षेति सोद्देशपरस्थलक्ष
णस्थलपरीक्षा प्रथमाध्यायार्थः तत्र च सपरिकरन्यायलक्षणं प्रथमाह्निकार्थः तत्र च सप्रयोजनाभिधेयप्रति
प्रतिपादकं प्रथमं द्वितीयसूत्राभ्यामेकं प्रकरणं ततः प्रमाणलक्षणप्रकरणं ततः प्रमेयलक्षणप्रकरणं ततो
न्यायपूर्वांगप्रकरणं ततो न्यायाश्रयसिद्धांतप्रकरणं ततोन्यायस्वरूपप्रकरणं ततो न्यायोत्तरांगप्रकरणमि
ति प्रथमाह्निके सप्त प्रकरणानि · श्रवणादनु पश्चादीक्षा अन्वीक्षा मननं तन्निर्वाहिका सेयमान्वीक्षि
की न्यायतर्कादिशब्दैरपि व्यवह्रियते तथा च न्यायो मीमांसा धर्मशास्त्राणीति श्रुतिः पुराणन्यायमीमांसेत्या

कु एम०

३

२ क्षि

रिस्मृतिः मीमांसा न्यायतर्कश्च उपांगः परिकीर्तित इति पुराणं· त्रैविद्येभ्यस्त्रयीं विद्यां दंडनीतिं च शाश्वतीं· आ
न्वीक्षिकीं चात्मविद्यां वार्त्तारंभांश्च लोकत इति मनुः। तथा यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इत्यादि मोक्षधर्मे· तत्रो
पनिषदं तात पारिशेष्यं च पार्थिव· मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं परामित्युपनिषदर्थे आन्वीक्षिकीमनुसा
रीग्राह्यस्त्वित्युक्तमिति· ननु न तत्त्वज्ञानस्य साक्षान्निःश्रेयसहेतुत्वं तत्त्वज्ञानानन्तरमप्यवस्थितिदर्शनादतः क्रमाकां

सं ४

क्षायामाह दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः। अत्र वार्त्तिकं निःश्रेय
सं तावद्द्विविधं परापरभेदात्· तत्रापरं जीवन्मुक्तिलक्षणं तत्त्वज्ञानानन्तरमेव तदेव धारितामतत्त्वस्य नेदं तथा
भ्यासापहृतमिथ्याज्ञानस्य प्रारब्धं कर्म उपभुंजानस्य· परं तु क्रमेण· तत्र क्रमप्रतिपादनायेदं सूत्रमिति·
दुःखादीनां मध्ये यदुत्तरोत्तरं तेषामपाये तदनन्तरस्य तत्सन्निहितस्य पूर्वपूर्वस्यापायादपवर्गः प्रयोजकत्वं
प्रयोज्यत्वं वा पंचम्यर्थः दृष्टाभावाद्दुष्टाभाव इति वत्स्वरूपसंबंध विशेषणवत्तत्· तथ्यमर्थं तत्त्वज्ञानेन वि
रोधितत्तयापहृते मिथ्याज्ञाने कारणाभावाच्च निवृत्ते रागद्वेषात्मके दोषे तदभावाच्च प्रवृत्तेर्धर्माधर्मात्मिका
या अनुत्पत्तौ तदभावाच्च जन्मनो विशिष्टशरीरसंबंधस्याभावात् दुःखाभावादपवर्गः यद्यपि ज्ञानिनोऽपि रा
गादयः सन्ति एवं तथापि तत्त्वदोषाणां तत्त्व धर्मादिहेतुत्वाद्दोषापाये धर्माद्यपायः। वस्तुतो विनापीच्छां गंगा

तथाप्युक्तदरागाद्यभावे तात्पर्यं। यद्यपि दोषाणां न धर्मादिजनकत्वं

४स्व

५

ज्ञानं संयोगादितो धर्मादिसंभवाद्व्यभिचारस्तस्मान्मिथ्याज्ञानवासनैवात्र दोषः तस्मान्मिथ्याज्ञाननाशात्तत्काली
नतत्त्वज्ञानवासनातो वा नश्यतीत्यपि वक्तव्यं निःपर्यायपि दुःखापायान्नापवर्गः किंतु स एव सः तथाप्यभेद एव तत्र पंच
म्याधेः अपवर्गपदं वा तद्व्यवहारूपं अनंतरपदेन जन्मांतमेव पदमश्यत इति तु नैष्ठिक्यानंदं दुःखेपरस्वैव यथ्या प
तेः दुःखानुत्पत्तेश्चरमदुःखध्वंसप्रयोजकत्वं कल्प्यत इत्याशयेन दर्शितमपि कश्चित् इति सूत्रार्थतो समयाद्यनाभिधे
यप्रकरणम्। अथ यथोद्देशं लक्षणस्यापेक्षितत्वात्प्रथमोद्दिष्टप्रमाणं लक्षयति विभजते च प्रत्यक्षानुमानो
पमानशब्दाः प्रमाणानि अत्र तद्वति तत्प्रकारकत्वात्प्रप्रकर्षविशिष्टज्ञानं प्रमा प्रशब्दविशिष्टमा धातुना प्रत्याय्यते तत्तत्क
रणत्वं प्रमाणत्वं ज्ञानं चात्रानुभवो विवक्षितस्तेन स्मृतिकरणे नातिव्याप्तिः लक्षितानां प्रमाणानां विभागः प्रत्य
क्षानुमानोपमानशब्दा इति विभागस्योद्देश एवांतर्भूतत्वात् यविशेषोद्देशः प्रत्येकलक्षणं तु वक्ष्यते ॥३॥ इति त्रिसूत्रीवृ
त्तिः समाप्ता ॥ अथाविभक्तानि यथाक्रमं लक्षयितुमारभते इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि
व्यवसायात्मकं प्रत्यक्षं अत्र प्रतिगतमक्षं प्रत्यक्षमिति योगादिंद्रियवाचकेनाक्षशब्देन प्रत्यक्षशब्दस्य प्रस्तुतत्वाच्च करण
लक्षणस्य प्रमामिति लक्षणं यद्यप्यनुचितं तथापि यत इत्यध्याहारेण प्रत्यक्षप्रमाकरणे लक्षणे वाच्ये तदेकदेश
प्रमास्वरूपज्ञातितत्करणत्वं सूत्रे यमित्याशयेन वासंगमनीयं आत्ममनस्संयोगसुखदुःखादिवारणाय ज्ञानमिति

न्या३

न्या१

न्या०

४

ति। यद्यपि तज्जन्यत्वाज्ज्ञानमात्रे तिव्याप्तिरीश्वरप्रत्यक्षे चाव्याप्तिस्तथापि साक्षात्कारोमीत्यनुव्यवसायसिद्धसाक्षा
त्त्वजात्यवच्छिन्नं ज्ञानमित्येतस्य तात्पर्यं। यद्वा इंद्रियार्थसंनिकर्षोत्पन्नमिति सावधारणं इंद्रियार्थसंनिकर्षाति
रिक्तादनुत्पन्नं अतिरिक्तं चात्र ज्ञानं तेन ज्ञानाकरणकमित्यर्थः। भ्रमवारकमव्यभिचारीति भ्रमभिन्नमित्यर्थः। इदं चाशिके
भ्रमस्यालक्ष्यत्वे तल्लक्ष्यत्वे तु तद्वति तत्प्रकारकत्वं निर्विकल्पकस्यालक्ष्यत्वे तदभाववति तदप्रकारकत्वमर्थः। तस्य विभा
गः। अव्यपदेश्यं व्यवसायात्मकमिति निर्विकल्पकं सविकल्पकं चेति द्विविधं प्रत्यक्षमित्यर्थः। सविकल्पकं च संस्कारोद्बो
धवत्तदनुभवत्वाभ्यां विभजति संस्कारोद्बोधप्रत्यभिज्ञा। अनुमानं लक्षयति विभजते च। अथ तत्पूर्वकं त्रिविधमनु
मानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च। आनंतर्यबोधकोऽथशब्दो हेतुहेतुमद्भावसंगतिसूचनाय। तत्पूर्वकं प्रत्यक्षपू
र्वकं प्रत्यक्षस्य पूर्वकं प्रत्यक्षं प्रत्यक्षविशेषो व्याप्त्यादिविषयकस्तेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लभ्यते
अनुमानं अनुमितिः यत इत्यध्याहारेण च करणल्युटं। अथवा करणल्युटामेवेदं तत्रानुमानमिति करणा
ल्युटा अनुमितिकरणमिति समाख्याबलादेव लभ्यं तच्च व्याप्तिज्ञानं प्रत्यक्षपूर्वकं सहचारप्रत्यक्षपूर्वकं। विभ
जते त्रिविधमिति पूर्ववत्कारणं तद्वत्तल्लिंगकं यथा मेघोन्नतिविशेषेण वृष्ट्यनुमानं शेषः कार्यं तल्लिंगकं शेष
वत्। यथा नदीवृद्ध्या वृष्ट्यनुमानं सामान्यतोदृष्टं कार्यकारणभिन्नलिंगकं यथा पृथिवीत्वेन द्रव्यत्वानुमानं। अ

5

यवाएवेमन्वयस्तद्वत्केवलान्वयीत्यर्थः यथा अभिधेयं प्रमेयत्वादित्यादि अन्वयो व्यतिरेकस्तद्वत्केवलव्यति
रेकीत्यर्थः· यथा पृथिवीतरेभ्यो भिद्यते गंधवत्वादित्यादि सामान्यतोदृष्टं अन्वयव्यतिरेकि यथा वह्निमान्धूमा
दित्यादि॥ उपमानं लक्षयति· प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानं प्रसिद्धस्य एव प्रमितस्य गवादेः साधर्म्यात्सा
दृश्यात्तज्ज्ञानात्साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिर्यत इत्यध्याहारेण च करणल
क्षणं· अथवा साध्यसाधनमिति करणाल्युटा करणलक्षणमेवेदं· अत्र चैव धर्म्योपमितिमपि मन्यंते टीकाकृ
तः। यथा अतिदीर्घग्रीवत्वादिपश्वंतरवैधर्म्यज्ञानादुष्ट्रं करभपदवाच्यतां गृह्णाति। एवमन्योप्युपमानस्य विषयइ
तिभाष्यं· तथा च मुखं पद्मसदृशी आर्षधी विषहंत्रीत्यतिदेशवाक्यार्थे ज्ञाते मुखं पद्मसादृश्यज्ञाने जाते इयं मोष
धी विषहरणीति उपमित्या विषयीक्रियत इत्यादि॥ शाब्दं लक्षयति· आप्तोपदेशः शब्दः। शब्द इति लक्ष्यकथ
नं तदर्थः प्रमाणशब्द इति· आप्तोपदेश इति लक्षणं· आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान् तदुपदेश इत्य
र्थः प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्द इति फलितार्थः अथवा आप्तोपयथार्थ उपदेशः शाब्दबोधो यस्मा
त् शाब्दत्वं च जातिविशेषस्तथा च यथार्थशाब्दज्ञानकरणत्वमर्थः अत्र च विशेष्यावृत्त्यप्रकारकत्वात्तदिति तत्प्रका
रकत्वादिप्रमालक्षणानमिकं लक्षणोपरं च लक्ष्यतावच्छेदके निवेशनीयमतो नाभेदः· विभजते सा द्विविधा इत्या

ताम॰
५

दृष्टाप्यत्वात् प्रमाणशब्दः शब्दस्तदुपजीवि प्रमाणातिरिक्तप्रमाणागम्यार्थको दृष्टार्थकः शब्दस्तदुपजीविप्र
माणमात्रगम्यार्थकोऽदृष्टार्थकः तथा च दृष्टार्थकत्वाददृष्टार्थकत्वभेदात् प्रमाणशब्दस्य द्वैविध्यमित्यर्थः ॥ समा
प्तं प्रमाणलक्षणप्रकरणम् ॥ प्रमेयं विभजते तल्लक्षयति च । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफ
लदुःखापवर्गास्तु प्रमेयम् । अत्र तु शब्दः पुनरर्थे तथा चैते त्वा पुनः प्रमेयत्वं न तु प्रमाविषयत्वेन संयोगादीनामपि
प्रमेयशब्दो ह्यवादिशब्दवत् परिभाषाविशेषणाद्द्वादशसु प्रवर्तते तत्र च प्रकृष्टमेयं प्रमेयमिति योगार्थः प्रकृ
ष्टत्वं संसारहेतुमिथ्याज्ञानविषयत्वं मोक्षहेतुधीविषयत्वं वा ॥ यत्तु नावह्न्यान्यत्वमर्थः । लक्षणमपि तदेव प्रमे
यं किमित्याकांक्षायां आत्मादयो दर्शिताः सत्यतो वचनभेदेऽपि नान्वयः वेदाः प्रमाणमित्यादिवदप्येवं अन्यथा आ
त्मस्त्रैविगतिः स्यात् तथा च बहुत्वे प्रमेयत्वेनैकमिति प्रतिपादनाय अन्यतमज्ञानेऽपि नापवर्ग इति मतिपा
रनाय वा प्रमेयमित्येकवचनमित्यन्ये । तच्चिन्त्यं । अन्यापि आत्मा च शरीरं च इन्द्रियाणि च अर्थाश्च बुद्धिश्च मन
श्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलं च दुःखं च अपवर्गश्चेति यथावचनं विग्रहं वर्णयन्ति अत्र प्रधानात्मकार
णरूपषट्कमभिधाय कार्यरूपप्रमेयषट्कमभिहितं तत्र तत्र पूर्वपूर्वस्य प्रधानत्वात् प्रथममुद्देश इति वदन्ति । तत्र
प्रथमोद्दिष्टमात्मानं लक्षयति । इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् । अत्र चात्मनः प्रत्यक्षत्वाल्लि

6

गकथनमसंगतं नच शारीरत्वं जातिरेकव्युत्पादनार्थं तदिति वाच्यं अग्रिमपरीक्षावैयर्थ्यापत्तेः लक्षणाकथनेन न्यून
त्वं चेन्निवेन्द्रलिंगपदस्य लक्षणार्थत्वात् नच लिंगमित्येकवचनेन मिलितानां लक्षणत्वं प्रतीयते तच्चायुक्तं वैयर्थ्या
दिति वाच्यं किं लक्षणमित्याकांक्षायामिच्छादीनामभिधानान्मिलितं लक्षणमिति प्रत्यायकाभावात् तथा च
प्रत्येकमेव लक्षणं अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं सुखदुःखद्वेषाणां संसारि
णो लक्षणत्वमिति क्रमप्राप्तं शरीरं लक्षयति चेष्टेन्द्रियार्थाश्रयः शरीरं अत्र चेष्टादिमिलिताश्रयत्वं न लक्ष
णं वैयर्थ्यादपि तदाश्रयपदस्य प्रत्येकमन्वयाच्चेष्टाश्रयत्वादि लक्षणत्रयं तात्पर्यं चेष्टात्वं च प्रयत्नजन्यताव
च्छेदको जातिविशेषः नच शारीरावयवेतिव्याप्तिः अंत्यावयवित्वेन विशेषणात् नच निष्क्रियावस्थशरीरेऽ
व्याप्तिस्तादृशे मानाभावात् अत एवं वाहेन्द्रियाश्रय इति इन्द्रियाश्रयत्वं च अवच्छेदकताख्यस्वरूपसंबंध
विशेषेणाच घ्राणेन्द्रियजन्योपमित्यादिप्रतीतेः अर्थाश्रयत्वमित्यत्रार्थशब्देन रूपादिपरत्वे घटाश्रयत्वस्य घट
दावतिव्याप्तेः किंतु सुखदुःखान्यतरपरं अत एव भाष्यं यस्मिन्नायतने सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते तदे
षामाश्रयस्तच्छरीरमिति वस्तुतस्तु अन्यतराश्रयत्वमपि न लक्षणं किंतु सुखाश्रयत्वं दुःखाश्रयत्वं चेति ल
क्षणद्वयं तात्पर्यं शारीरस्य तदाश्रयत्वमवच्छेदकतासंबंधेन हस्तादेरतस्य लक्षणत्वं त्ववयवित्वेन विशेषणीयं

तु=४

टीम०
६

स्वर्गीशरीरे नारकिशरीरे च क्लेशे च सुखदुःखसाक्षात्कारान्नाव्याप्तिः। न च तस्यान्त्यावयवित्वेन शरीरे व्याप्तिः सुखाद्याश्र-
यत्वमिति द्रष्टव्यम्। त्वव्याप्यव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। तादृशजातिश्च मनुष्यत्वचैत्रत्वादिः। कल्पभेदेन नरसिं-
हशरीराणां भेदान्नरसिंहत्वजातिमादाय नरसिंहशरीरे लक्षणसमन्वय इति ॥ इन्द्रियं विभजते लक्षयति च। घ्रा-
णरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः। यद्यपि मनसोऽपीन्द्रियत्वमस्त्येव तथापि घ्राणेत्यादिरूपलक्ष-
णपरत्वान्न दोषः। वस्तुतस्त्विन्द्रियाणीत्यस्य बाह्येन्द्रियाणीत्यर्थः। तेन भूतेभ्य इत्यस्य नासंगतिः। अत्र चैता-
नीन्द्रियाणीति वदता घ्राणत्वाद्यात्मकलक्षणमिति सूचितं। प्रत्यक्षजनकतावच्छेदकतयेन्द्रियत्वमखण्डो-
पाधिरूपमित्यतो घ्राणत्वादिकं जातिविशेषरूपं। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं। घ्राणादीनि किंप्रकृ-
तिकानीत्याकांक्षायामाह भूतेभ्य इति। तेनेन्द्रियाणामहंकारप्रकृतिकत्वं नेति मन्तव्यं सूत्याद्यपि व्यते च
दंततीयाध्याये। अत्र घ्राणादीनां चतुर्णां पृथिव्यादिजन्यत्वं संभवति श्रोत्रस्य कर्णशष्कुल्यवच्छिन्ना-
काशस्य कर्णशष्कुल्या जन्यत्वादेव जन्यत्वव्यपदेशः। अथवाऽभिन्नानीति एवं पित्वा भूताभिन्नानी-
त्याख्येयं। घ्राणादीत्यस्योपलक्षणपरत्वेनानुभूतेभ्य इति बहिरिन्द्रियपरं। भूतान्येकानीत्याकांक्षा-
यामाह पृथिव्यापस्तेजोवायुराकाशमिति भूतानि। आरंभपरस्परानपेक्षत्वसूचनायासमासकरणं

७

भूतत्वं तु बहिरिन्द्रियग्रहणयोग्यविशेषगुणवत्त्वं पृथिवीत्वादयस्तु जातिविशेषा इति ॥ क्रमप्राप्तमप्र थ्येवं विभजते ल
क्षयति चा गंधरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तु रधाः ॥ वैशेषिकाणां द्रव्यगुणकर्मसु घुशब्दाभिधेयत्व
मतः पंचानां गंधादीनामेवकथं तभैलामित्याशंकायां निराशायत इत्याह तु कं तेषामिन्द्रियाणामर्था विषया
उद्दिष्टा अपि तएव तत्राशयः इत्थं च तद्धत्वं लक्षणमिति मतव्यं ॥ तच्छब्देन बहिरिन्द्रियाणि परामृश्यंते तथा
चैकैकबहिरिन्द्रियमात्रग्राह्यविशेषगुणत्वं बहिरिन्द्रियद्वयग्राह्यबहिरिन्द्रियग्राह्यगुणत्वं वा तद्धत्वं ॥ पृथिव्या
दिगुणा इति लक्ष्यनिर्देशः प्रकृते के गुणा इत्याकांक्षायां गंधेत्यादि ॥ पृथिव्यादीनां गुणा इति षष्ठीसमासो भाष्यस
मस्तेन गुणगुणिनोरभेदेनेति सूचितं ॥ बुद्धिं लक्षयितुमाह बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थांतरं ॥ अनर्थांतरं स
मानार्थकं ननु सांख्यानामिव बुद्धितत्त्वस्य महत्तत्त्वापरपर्यायस्य परिणामविशेषो ज्ञानं यथा चैतत्तथा वक्ष्य
ते ॥ तथा च बुध्यादिपदवाच्यत्वमनुभवसिद्धज्ञानत्वजातिरेव वा लक्षणमिति भावः । मनो लक्षयति ॥ युगपज्ज्ञा
नानुपपत्तिर्मनसो लिंगं ॥ युगपदेककाले ॥ एकात्मनीतियः रणप्रज्ञानानामनुत्पत्तिर्यतस्स एव धर्मो ज्ञा
नकरणत्वं मनसो लिंगं लक्षणमित्यर्थः ॥ तथाहि चक्षुरादिषु विषयसंबद्धेष्वपि यस्यासंनिधानादेकं
न ज्ञानं जनयति तत्संबंधादन्यत्रैव ज्ञानं जनयति तदेवाणु निखिलज्ञानजनकं सुखादिसाक्षात्काराधार

नं१ नं१

एम०
७

रणो कारणं तेरेकमेव लाघवात् सिद्धं [ ] मन इति सिद्धेः। एवमव्याख्याने च लक्षणप्रकरणे प्रमाणोपन्यासो
ऽसंगतः स्यादिति। अन्ये तु मनसि धर्मिणि लक्षणं चिंतेत्पत्तौ मनः साधनाय युगपदिति सूत्रं इत्थं च मनः सिद्धौ वि
स्पर्शाणुत्वादिकं लक्षणं सुकरमित्याशय इति वदंति। प्रवृत्तिं लक्षयति विभजते च। प्रवृत्तिर्वाग्बुद्धिशरीरारंभः।
अत्र च प्रवृत्तित्वं रागजन्यतावच्छेदको जातिविशेषः। स एव लक्षणं ईश्वरकृते रपि लक्ष्यत्वे यत्नत्वमेव तथा जी
वनयोनियत्ने निवृत्तौ च साभावात् तत्सद्भावे [ ] ऽपि प्रवृत्तित्वं नित्यप्रयत्नसाधारणं तच्चावृत्तं वा तथा द्वेषानंतरमु
तारंभ परस्य प्रत्येकमन्वयाद्वागारंभादिभेदेन त्रिविधा प्रवृत्तिः बुद्धिशब्देनात्र मनोऽभिप्रेतमिति तिन्नायं। शरी
रं शारीरचेष्टावत्वेन हस्तादिसाधारणं तथा वचनानुकूलो यत्नो वागारंभः वचनानुकूलः शरीरगोचे
रो यत्नश्चेष्टानुकूलयत्नो वा शरीरारंभ एतद्द्वयभिन्नो यत्नो बुध्यारंभः स च ध्यानदयादेर्वहीनाद्यनुकूलः
पदीवस्पाति। प्रावृत्तु सामान्यविशेषलक्षणं द्वेषजनकत्वं निवेशयंति। इयं च कारणरूपा प्रवृत्तिः का
र्यरूपा तु धर्माधर्मात्मिकेति द्विविधं लक्षयति। प्रवर्त्तनालक्षणा दोषाः। दोषा इति वक्तुवचनं रागद्वेषमोहात्मक
लक्ष्यानुपपत्त्या पुनाय। प्रवर्त्तनाप्रवृत्तिजनकत्वं तदेव लक्षणं येषां यद्य [ ] पीदं शरीरादृष्टेश्वरेष्टादावतिव्याप्तं
तथापि लौकिकप्रत्यक्षसविषयकत्वे सतीति विशेषणीयं। घ्राणादिगोचरप्रमावारणाय प्रमान्यत्वे सती

ति विशेषयंति॰ प्रेत्यभावं लक्षयति॰ पुनरुत्पत्तिः प्रेत्यभावः प्रेत्य मृत्वा भावो जननं प्रेत्यभावः तत्र पुनरित्यनेना
भ्यासं कथयन् आत्मन उत्पत्तिस्ततो मरणं ततउत्पत्तिरिति प्रेत्यभावोयमनादिरपवर्गान्तः एतत् ज्ञानं च वैराग्य उपयु
ज्यत इति॰ प्रेत्येति नखपर्थं तदीयमरणं च तदीयजीवनादृष्टनाशः शरीरस्य च प्राणसंयोगध्वंसः तदीयः प्राण
ध्वंसो वा तदीयोत्पत्तिस्तु नीतीयविजातीयशरीराद्यप्राणसंयोग इति॰ फलं लक्षयति॰ प्रवृत्तिदोषजनितोर्थः
फलं॰ अत्र च मुख्यं फलं सुखदुःखोपभोगः तथा च भाष्यं सुखदुःखसंवेदनं फलं तत्र च धर्माधर्मौ वृत्तेः प्रयोज
कत्वात् तत्र च दोषस्य हेतुत्वात् प्रवृत्तिदोषजनितइत्युक्तं लक्षणं तु सुखदुःखान्यतरसाक्षात्कार इति गौण
फलं तु शरीरादिकं सर्वमेव तथा च भाष्यं तत्पुनर्देहेन्द्रियबुद्धिषु सत्सु भवतीति सह देहेन्द्रियादिभिः फलम
भिप्रेतं तथा हि प्रवृत्तिदोषजनितोर्थः फलमेतत्सर्वं भवतीति इत्थं च जन्यत्वमेव फलत्वं प्रवृत्तिदोषजं जगदि
इति तु निर्देशो यथोगादुक्तं॰ दुःखं लक्षयति॰ बाधनालक्षणं दुःखं॰ बाधना पीडा तदेव लक्षणं स्वरूपं यस्य तत्
तथा चानुभवसिद्धं दुःखत्वजातिरेव लक्षणं शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् सुखे च दुःखानुषंगात् दुःखव्य
वहारो गौण इति॰ अत एव ह्यग्रिमसूत्रे तत्पदेन सुखदुःखपरामर्शः॰ अपवर्गं लक्षयति॰ तदत्यंतविमो
क्षोपवर्गः॰ तस्य दुःखस्यात्यंतविमोक्षः स्वसमानाधिकरणदुःखासमानकालीनो ध्वंसः तस्य च जन्मापा

यादिवसंभवइत्यापायेन दुःखेन जन्मनात्यंतं विमुक्तिरपवर्ग इति भाष्यं दुःखेन दुःखानुषक्तेनेत्यर्थः ॥ समाप्तं
प्रमेयलक्षणप्रकरणं • क्रमप्राप्तं संशयं लक्षयति • समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्य
व्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः । संशय इति लक्ष्यनिर्देशः विमर्श इति विशदो विरोधार्थः एक
स्मिन्धर्मिणि नियतरणीयतेन एकधर्मिणि विरोधेन भावप्रकारकं ज्ञानं संशयः अत्र कारणमुखे
न विशेषा लक्षणमाह समानेत्यादि उपपत्तिर्ज्ञानं तथा च समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य
ज्ञानादित्यर्थः अनेकधर्मः असाधारणधर्मस्तज्ज्ञानादित्यर्थः तथा च साधारणधर्मवद्धर्मिज्ञानजन्योऽसा
धारणधर्मवद्धर्मिज्ञानजन्यश्चेत्यर्थः विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दस्तस्मादित्यर्थः यद्यपि
शब्दस्य न संशायकत्वं तथापि शब्दात्कोटिद्वयोपस्थितौ मानसः संशय इति वदंति उपलब्धेर्ज्ञानस्य अनु
पलब्धेर्व्यतिरेकज्ञानस्य या अव्यवस्था सद्विषयकत्वानिर्धारणाप्रामाण्यसंशय इति फलितोऽर्थः अन्ये
तु उपलब्ध्यव्यवस्था प्रामाण्यसंशयः अनुपलब्धिरुपलब्धिविरोधिधर्मवत्त्वं तदव्यवस्थातः संशय इ
त्याहुः । वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वं किं त्वगृहीताप्रामाण्यकज्ञानस्य विरोधितया
सति प्रामाण्यसंशये तज्ज्ञानस्य विरोधितयासाधारण धर्मदर्शनादित्येवं संशयोत्पत्तेरिति उप

५६

लब्धिपीत्यात्किं तादृशस्थले संशयो भवतीत्येतावन्मात्रपर्यंवकारोव्याप्यसंशयस्यव्यापकसंशयहेतुत्वसमुच्चितो
नीतिवदंति॰ विशेषापेक्षः कोटिस्मरणसापेक्षः वस्तुतस्तु संशयस्य धारावाहिकत्वं स्यादत आह विशेषेति॰ विशेषं वि
शेषदर्शनं अपेक्षते निवर्तकत्वेन तथाच विशेषदर्शननिवर्त्यत्वकथनमुखेन विशेषादर्शनजन्यः संशय इत्युक्तं॰
क्रमप्राप्तं प्रयोजनं लक्षयति॰ यमधिकृत्य प्रवर्तते तत्प्रयोजनं॰ अधिकृत्य उद्दिश्य तथाच प्रवृत्तिहेत्विच्छाविषयत्वं प्रयो
जनत्वं विषयत्वं साध्यताख्यविषयताविशेषस्तेन सुखत्वादिवारणं॰ प्रवृत्तिहेत्विति स्वरूपकथनं॰ तक्षकचूडामणि
सुमेर्वादिप्राप्तिवारकं तदिति केचित्॰ अत्र च निरूपाधीच्छाविषयत्वात्सुखदुःखाभावयोर्मुख्यप्रयोजनत्वं तदुपा
यस्य तु तदिच्छाधीनेच्छाविषयत्वाद्गौणप्रयोजनत्वमिति॰ क्रमप्राप्तं दृष्टांतं लक्षयति॰ लौकिकपरीक्षका
णां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टांतः॰ लौकिकोऽप्राप्तशास्त्रपरिशीलनजन्यबुद्धिप्रकर्षः प्रतिपाद्य इति फलितार्थः॰
परीक्षकः शास्त्रपरिशीलनप्राप्तबुद्धिप्रकर्षः प्रतिपादक इति फलितार्थः॰ तथाच प्रतिपाद्यप्रतिपादकयोरिति पर्य
वसन्नं बहुवचनं कथाबहुत्वे विषयिणापास्तद्भावविषयिणया [illegible] वासाम्यमविरोधो यस्मिन्
र्थे सोर्थो दृष्टांतः वादिप्रतिवादिनोः साध्यसाधनयोः [illegible] प्रकारकतद्भाव [illegible] प्रकारकान्यतरनिश्चयविषयो
[illegible] दृष्टांत इति पर्यवसितोर्थः। समाप्तं न्यायपूर्वांगप्रकरणं। क्रमप्राप्तं सिद्धांतं लक्षयति॰ तत्राधिकरणाभ्युप

कथाबहुत्वमपेक्ष्येति टीका॥ यत्र तत्र लौकिकयोः परीक्षकयोर्वैपरीत्यार्थं पुरुषमेव बहुवचनं॥ बुद्धिसाम्यमिति॥
बुद्धेः साध्यसाधनोभयपर्यवस्त्वं

गमo
९

गमसंस्थितिः सिद्धांतः। तंत्रं शास्त्रं तेस्वाधिकरणं ज्ञापकं तया यस्य ता इत्थंभूतो योऽभ्युपगमस्तस्य समीचीनतया संशयरूपत
या स्थितिस्तथा च शास्त्रितार्थनिश्चयः सिद्धांतः। अत्र चाभ्युपगम्यमानोर्थः सिद्धांत इति भाष्यं अभ्युपगमः सिद्धांत इति
वार्तिकटीके न चात्र विरोधः शंकनीयः आचार्यैः परिहृतत्वात् तथा च तत्र निबंधः। अर्थाभ्युपगमयोर्गुणप्रधानभा
वस्य विवक्षातंत्रत्वात् इत्थं अभ्युपगमोऽभ्युपगम्यमानो वार्थः सिद्धांतस्तेन सूत्रभाष्यवार्तिकटीकासु न विरोधः। अत्र च
भाष्यानुसारात् सर्वतंत्रप्रतितंत्राधिकरणाभ्युपगमासिद्धांतान्यतमः सिद्धांत इति सूत्रार्थ इति तु न युक्तं अग्रिमसूत्रा
नुरूप्यानापत्तेः। तंत्रसिद्धांतत्वेन द्वयमनुगमय्य तंत्राधिकरणाभ्युपगमान्यतमः सिद्धांत इति केचित्। विभजते सर्वतं
त्रप्रतितंत्राधिकरणाभ्युपगमसंस्थित्यर्थांतराभावात् स चतुर्विध इति शेषः। सर्वतंत्रादिसंस्थितीनामर्थांतर
भावात् भेदादित्यर्थः। सर्वतंत्रसिद्धांतं लक्षयति सर्वतंत्राविरुद्धस्तंत्रेऽधिकृतस्सर्वतंत्रसिद्धांतः। सर्वतंत्राविरुद्धे
स्सर्वैश्शास्त्रैरभ्युपगत इति वृद्धाः वस्तुतो यथाश्रुत एवार्थः अन्यथा तंत्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तेः ततएव चजो
त्यादेरसद्भूतत्वमपि सर्वतंत्रसिद्धांतः न च तंत्रेऽधिकृत इति स्पष्टार्थं लक्षणेन तु न द्वयमेवेति वाच्यं मनस इंद्रिय
त्वस्यापि सर्वतंत्रसिद्धांततापत्तेः। न च मास्तु सत्तासिद्ध [illegible] प्रतितंत्रसिद्धांतः। समानशब्देनैका
र्थकेनैकतंत्रसिद्ध इत्यर्थः स्वतंत्रसिद्धः परिषद्व्यवसितोऽर्थः। तथा च वादिप्रतिवाद्येकतरमात्राभ्युपगतत्वे सति एकतरस्य

=२ स्योपलक्षणमात्रत्वात् वादिप्रतिवाद्युभयाभ्युपगतः कथानुकूलोर्थः स इति यदंति॥ प्रतितंत्रसिद्धांतं लक्षयति॥

10

प्रतितंत्रसिद्धांत इति फलितार्थः यथा मीमांसकानां शब्दनित्यत्वं · अधिकरणसिद्धांतलक्षणं यत्सिद्धावन्य
प्रकरणसिद्धिः सोधिकरणसिद्धांतः । यस्यार्थस्य सिद्धौ जायमानायामेवान्यस्य प्रकरणस्य प्रस्तुतस्य सिद्धि
र्भवति सोधिकरणसिद्धांत इत्यर्थः यथा नंतपरमाणुकादिकं पक्षीकृत्योपादानगोचरज्ञानचिकीर्षाकृतिमज्ज
न्यत्वे साध्यमाने सर्वज्ञत्वमीशस्य एवं हेतुबलादपि यथा दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिंद्रियातिरि
क्ते आत्मनि साधिते इंद्रियनानात्वं · तथाच पूर्वदृश्यार्थ्चे, परार्थसिद्धिं विनायोर्थः शाब्ददनुमानाक्षान सिध्यति सो
धिकरणसिद्धांत इति · वस्तुतस्तु शाब्दत्वमनुमानत्वं वाविवक्षितं प्रमाणमात्रमपेक्षितं अत एव प्रत्यक्षेण
स्थूलत्वसाधनानंतरमुक्तमात्मतत्वविवेके सोयमधिकरणसिद्धांतन्यायेन स्थूलत्वसिद्धौ हि ग्राभंगभंग इति
· तत्रचवाक्यार्थसिद्धौ तदनुषंगीयोर्थः सोधिकरण इति वार्त्तिककंडिकां लिखितायेन केनापि प्रमाणेन वा
क्यार्थसिद्धौ जन्यमानायां योन्यार्थः सिध्यति सतथैतदर्थ इति व्याख्यातव्यात दीधितिकृता · एवं हेतुरीदृशः
पक्षश्च वाक्यार्थ इति टीकावचनेन उपलक्षणमेतदित्युक्तं तत्र तत्राविशिष्टमेव लक्षणं कार्यं · यत्तु जनकीभूत
व्यापकताज्ञाने व्यापककोटावविषयः प्रकृतानुमित्या व्यापककोटौ विषयीकृतः शाब्दजनकपदार्थज्ञानवि
षयत्वे सति शाब्दविषयश्चेति द्वयमधिकरणसिद्धांत इति · तन्न इंद्रियनानात्वादौ भाष्याद्युदाहृतेऽव्याप्तेरिति

ल्म०
१०

साक्षादसम्बन्धिनस्य २

क्यापि अभ्युपगमसिद्धांतं लक्षयति · अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धांतः ॥ अपरीक्षित
स्य विशेषपरीक्षणं विशेषधर्माकथनं · अभ्युपगमादिति ज्ञापकत्वे पंचमी अभ्युपगमज्ञापकादित्यर्थः विशेषप
रीक्षणाज्ज्ञायते स्वरसतोऽभ्युपगतमिदमिति तथा च स्वशास्त्रास्त्रितोऽभ्युपगमोऽभ्युपगमसिद्धांतः यथा मनस इंद्रि
यत्वमिति · समाप्त न्यायाश्रयसिद्धांतलक्षणप्रकरणं · क्रमप्राप्तानवयवांल्लक्षयितुं विभजते · प्रतिज्ञाहेतूदाह
रणोपनयनिगमनान्यवयवाः ॥ अनेन विभागेन प्रतिज्ञाद्यन्यतमत्वमवयवत्वमिति लक्षणं सूचितं अन्ये च प्रति
ज्ञादीनां पंचानामवयवत्वकथनाद्दशावयववादोऽप्युदस्त इति मन्तव्यं · ते च यथा दर्शिता भाष्ये जिज्ञासा संशयः
शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति एते प्रतिज्ञादिसहिता दश व्याख्याता भाष्ये तेन तात्पर्यटीकायां प्रयोजनं हा
नादिबुद्धयः तत्प्रवर्तिका जिज्ञासा तज्जनकः संशयः प्राप्तप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्त
र्कः अयमेवार्थो निबंधे निष्टंकितः जिज्ञासाविप्रतिपत्तिरिति कश्चित् एते पाचन न्यायावयवत्वं न्यायघटकत्वात् ०
न वा न्यायजन्यबोधानुकूलत्वेन वावयवत्वं · प्रसंगात्प्रयोजनं प्रासंगिकं च प्रतिज्ञां लक्षयति · साध्यनिर्देशः प्रतिज्ञा
॥ साधनीयस्यार्थस्य यो निर्देशः स प्रतिज्ञा · साधनीयश्च वह्निमत्वादिना पर्वतादिः तथा च पक्षतावच्छेदकविशि
ष्टपक्षे साध्यतावच्छेदकविशिष्टबोधकशब्दत्वमर्थः निगमनवारणाय च साध्यांशे साध्यतानवच्छेदकानिरिक्ता

पृ५

ए०

११

प्रदेशि १ एकदेशस्यापि तत्त्व=३

अनुकूलशब्दस्य जनकतावच्छेदके मिश्रयोगादनुकूलपदमत्र तत्परम् अनुकूलात्मस्य बोधकात्मेककर्मधारयः हेत्ववयवो हि साध्याविषयकानिश्चयजनकं हेतुतां

॥

५ रूपं

४ वैधर्म्य

प्रकारकत्वं वा अन्यतरस्येष्टं साध्यतावच्छेदकप्रकारताविलक्षणप्रकारताशून्यत्वं तेन प्रमेयवतः साध्यत्वेनाप्रसिद्धेः
उदासीनवाक्यवारणाय च न्यूनानतिरिक्तत्वेन विशेषणीयं। न्यायत्वं च धातुत्वादिवत्परिभाषाविशेषविषयत्वं तत्तदर्थ
कं ततदर्थकं परकं स्वत्वादिकं वा तथा च न्यायांतर्गतत्वे सति प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यताव
च्छेदकावच्छिन्नसाध्यविषयताविलक्षणविषयताकबोधजनकत्वे सति प्रकृतपक्षे प्रकृतसाध्यबोधजनकत्वं तत्प्र
तिज्ञात्वावयवत्वादिकं परिभाषाविशेषविषयत्वं तत्तद्ग्रंथिकत्वरूपं वेत्यपि वदंति। क्रमप्राप्तं हेतुं लक्षयति विभजते
च सूत्राभ्यां उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः। तथा वैधर्म्यात्। अत्र साध्यसाधनं हेतुरिति सामान्यलक्षणं
साध्यसाधनं साध्यसिध्यनुकूलज्ञापकत्वबोधकरत्वमर्थः तथा च साध्यतावच्छेदकावच्छिन्नसाध्यान्वितज्ञापके
त्वबोधकः साध्यान्वितस्वार्थबोधकोऽवयव इति फलितार्थः। तस्य द्वैविध्यमाह उदाहरणसाधर्म्यात्तथा वैधर्म्या
दिति। साधर्म्यमन्वयव्यतिरेकः तादृशव्याप्तिरिति फलितार्थः उदाहरणसाधर्म्यमुदाहरणबोध्यान्वयव्याप्तित
तोऽन्वयी हेतुर्ज्ञातव्य उदाहरणेति स्पष्टार्थं। तथा च ज्ञातान्वयव्याप्तिकहेतुबोधको हेत्ववयवः [illegible] ज्ञातव्यति
रेकव्याप्तिकहेतुबोधको हेत्ववयव इति फलितार्थः एवमप्रतीतान्वयव्याप्तिकहेतुबोधको हेत्ववयवो व्यति
रेकी हेतुः इत्थमेवप्रतीतान्वयव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयवो अन्वयव्यतिरेकीत्यपि विहितमिति वदं

१२

एम०

दृष्टान्तो महानसादिः (सच) कदाचित्प्रयुज्यते कदाचित्तु यो यो धूमवान् सोऽग्निमानित्येव प्रयुज्यते यदा च महानसादेरप्रयोगस्तदानेन यो यो धूमवान् सोऽग्निमानित्युदाहरणवाक्येऽव्याप्तेरतः दृष्टान्तकथनयोग्येति, सामयिकत्वेनेति समयविशेषे उच्चार्यमाणत्वेनेत्यर्थः तत्प्रयोगस्य प्रयोक्तृइच्छाधीनत्वादिति भावः दृष्टान्तउदाहरण १
दृष्टान्तस्येति महानसादेरित्यर्थः

व=२

ति॰ अथ क्रमप्राप्तमुदाहरणं लक्षयति॰ साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणमिति लक्षणात् दृष्टान्तो दृष्टान्तवच
नं दृष्टान्तकथनयोग्यावयव इत्यर्थः तेन दृष्टान्तस्य सामयिकत्वेनासाधकत्वेऽपि न क्षतिः योग्यतावच्छेदकं तु अवय
वार्थानन्वितार्थकावयवत्वे सत्यन्वयव्याप्तिधर्मान्वयिव्यतिरेकिभेदानन्तरान्वय्युदाहरणं लक्षयति साध्यसाधर्म्यात्तद्
धर्मभावीति अन्वय्युदाहरणमिति विशेषः यत्तु सम्पूर्णसूत्रमन्वय्युदाहरणमेव सामान्यलक्षणं तदयुक्तमित्याहुः
साध्यसाधर्म्यात् साध्येनेह च पितधर्मात्साहचर्यात् साधनादित्यर्थः तस्य साध्यरूपं धर्मं भावयति तथा च साधनवत्ताप्रयु
क्तसाध्यवत्तानुभावको वचनं साध्यसाधनयोर्व्याप्त्युपदर्शकोदाहरणमिति यावत्॰ व्यतिरेक्युदाहरणं लक्षयति॰
तद्विपर्ययाद्वा विपरीतं व्यतिरेक्युदाहरणं॰ तद्विपर्ययात् साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात् तथा च साध्य
साधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यतिरेक्युदाहरणं यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् यन्नैवं
तन्नैवं यथा घट इति वाक्यार्थः प्रयोगमपेक्ष्य तथा चान्वय्युदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यमित्यर्थः अथ
क्रमप्राप्तमुपनयं लक्षयति॰ उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय [illegible]
नयः। साध्यस्य पक्षस्य उदाहरणापेक्ष उदाहरणानुसारी यदुपसंहारः उपसंहारेणोपन्यासः प्रकृतोदाहरणो
पदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोऽन्त्यावयव इत्यर्थः निगमनं तु हेतुविशिष्ट

व२

आसाद्यैवोपमानम्

१२

त्वेन न पक्षबोधकं किंतु पक्षवृत्तिहेतुबोधकमिति तत्पुरुषः ॥ अत्र चान्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनानुगमः
कार्यः ॥ उदाहरणोपदर्शितेति तु यत्किंचिद्व्यापकमात्रमिति तु न वाच्यं उदाहरणाविपरीतव्याप्त्युपदर्शकोपनयवारक-
त्वात् वस्तुतो वयं तु परे नैव तद्व्युदासः ॥ स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात् तथेति साध्यस्योपसंहारोऽन्वयु-
पनयः न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः ॥ अत्र च तथाशब्दप्रयोगावश्यकत्वेन तात्पर्यं किंतु व्याप्तिवि-
शिष्टवत्त्वबोधकता ॥ वह्निव्याप्यधूमवांश्चायमिति वा तथा चायमिति वोपन्यासः ॥ एवं व्यतिरेकिण्यपि वह्न्यभाव-
व्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा न तथेति वोपन्यासः ॥ निगमनं लक्षयति हेत्वपदेशात्प्रतिज्ञायाः
पुनर्वचनं निगमनं हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य अपदेशः कथनं प्रतिज्ञायाः प्रतिज्ञातार्थस्य साध्यविशि-
ष्टपक्षस्य वचनं निगमनं तथा च व्याप्तपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः व्याप्तपक्षधर्महेतुना-
प्यसाध्यविशिष्टबोधकत्वादृशसाध्यबोधको वान्यो यावयवो निगमनमिति ॥ अस्याप्यन्वयव्यतिरेकिभेदात्
भेदद्वयं त्वाशयः ॥ व्यतिरेकिणि तु तस्मान्न तथेत्येवाकार इत्यपरे ॥ समासेन्यायस्वरूपप्रकरणं ॥ क्रमप्राप्तं तर्कं ल-
क्षयति ॥ अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ तर्क इति लक्ष्यनिर्देशः कारणोपपत्तित ऊ-
ह इति लक्षणं ॥ अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थं कारणोपपत्तितस्तत्त्वज्ञानार्थमिति प्रयोजनकथनं कारणं व्या-

१२

व्यंतस्याप्पपत्तिरारोपस्तस्याघ ऊहः आरोपो व्याप्यारोपो व्यापकस्य तथा च व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहा
र्यारोपाद्यो व्यापकस्याहार्यारोपस्स तर्कः यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः निर्वह्निः स्यान्निर्धूमः स्यात्
स्यादिति· ह्रदो निर्वह्निः स्यान्निर्धूमः स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीते इति निर्वह्निः स्याद्द्रव्यं स्या
दित्यादिवारणाय व्याप्यस्येति तद्व्याप्यारोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति· न चानुमानादितो
र्थसिद्धेस्तर्कोऽव्यर्थ इति वाच्यं अप्रयोजकत्वादिशङ्काकलङ्किते न हेतुनार्थस्य साधयितुमशक्यत्वे तदुक्तम
विज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति तत्त्वनिर्णीयार्थमित्यर्थः यत्र नाप्रयोजकत्वाद्याशङ्का तत्र नापेक्षैवेति
भावः। परे तु ऊह इत्येकलक्षणो ऊहत्वं च मानसत्वव्याप्यो जातिविशेषस्तर्कयामीत्यनुभवसिद्धस्तर्कः किं
स्वत एव निर्णायकः परं परयावेत्पत आहकारणेति कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारेत्यर्थः तथा च धू
मो यदि वह्निव्यभिचारी स्याद्वह्निव्यभिचारी जन्यो न स्यादित्यनेन व्यभिचारशङ्कानिरासेन निरङ्कुशेन व्याप्तिज्ञा
नेनानुमितिरिति परम्परयेवास्योपयोग इत्याहुः। स चायं पञ्चविधः। आत्माश्रयान्योन्याश्रयचक्रकानव
स्थातदन्यबाधितार्थप्रसङ्गभेदात् स्वस्य स्वापेक्षित्वे अनिष्टप्रसङ्ग आत्माश्रयः। स चोत्पत्तिस्थितिज्ञप्तिद्वा
रात्रेधा· यथा यद्ययं घट एतद्घटजन्यः स्यादेतद्घटानधिकरणक्षणोत्तरवर्ती न स्यात्· एवं यदि घ

३ स्यादि

सादृ५ न६

घ१

१ एतद्घटव्याप्यो न स्यात् यद्ययं घट एतद्घटज्ञानाभिन्नः स्यात्

13

टएतद्घटवृत्तिः स्यात् ज्ञानसामग्रीजन्यः स्यात् एतद्घटभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात् एतद्घटभिन्नः स्यादि
तिवा सर्वत्राद्यं तदपेक्षापेक्षित्वनिबंधनो निग्रहप्रसंगोन्योन्याश्रयः सोपि एवं त्रेधा तदपेक्षापेक्ष्यापेक्षित्वनि
बंधनो निग्रहप्रसंगश्चक्रकं चतुःकक्षानवस्था यथा घटत्वं घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं स्यात्
तदन्यबाधितार्थप्रसंगस्तु स्वप्रमायां वन्हिव्यभिचारी स्याद्वन्हिजन्यो न स्यादित्यादिः प्रथमोपस्थितत्वोत्सर्गविनिगो
मनाविरहलाघवगौरवादिकं तु प्रसंगानात्मकत्वान्न तर्कः किंतु प्रमाणस्य सहकारित्वात् प्रमाधर्मेत्यात्यावव
हार इति संक्षेपः क्रमप्राप्तं निर्णयं लक्षयति विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः विमृश्य
संदिह्य पक्षप्रतिपक्षाभ्यां साधनोपालंभाभ्यां उपालंभः परपक्षदूषणं अर्थस्यावधारणं तदभावाप्रकारकं
तत्प्रकारकं ज्ञानं यद्यप्येतावदेव निर्णयसामान्यलक्षणं तथापि विमृश्येत्यादिकं जल्पवितंडास्थलीयनि
र्णयमधिकृत्य तदुक्तं भाष्ये वादे च विमर्शवर्जमिति एवं प्रत्यक्षतः शाब्दाच्च निर्णये न विमर्शः पक्षप्रतिपक्षा
पेक्षेति ॥ समाप्तं न्यायोत्तरांगप्रकरणम् ॥ इति श्रीविश्वनाथभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ प्रथमाध्याय
स्य प्रथममाह्निकं ॥ प्रथमाह्निके न सपरिकरन्यायलक्षितेवादादिलक्षणाय द्वितीयाह्निकारंभः छलपरी
क्षा च प्रसंगाद्विप्रतिपत्तिश्चाच छलपरीक्षासहितवादादिलक्षणाद्वितीयाह्निकार्थः तत्र चत्वारि प्रकरणानि

ष्टा ४

न्या०
१३

= तदपि स्वस्य स्वापेक्षापेक्ष्यपेक्षितत्वसत्त्वान्नाधिक्यं अस्यादिपूर्ववन्मैत्रीध्यं ॥ अव्यवस्थितपरंपरारोपाधीनानिष्टप्रसंगो ऽ ३ =
३१

आदौ कथाप्रकरणं ततो हेत्वाभासप्रकरणं । ततश्छलप्रकरणं दोषलक्षणप्रकरणं चेति । अथ कथासामा
न्यस्यायं विशेषो वादादिस्तथा च त्रिभिः सूत्रैरेकं कथाप्रकरणं अन्यथा एकसूत्रस्य प्रकरणत्वाभावादसंगतिः
स्यादित्याशयेनोक्तं भाष्यकृता तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डा चेति तत्र तत्त्वनिर्णयविजयान्यतरस्वरू
पयोग्यन्यायानुगतवाचनसंदर्भः कथा लौकिकविवादवारणाय न्यायेत्यादि । यत्रैकेन न्यायः प्रयुक्तो । परेण
तु मतपरिग्रहोपि न कृतस्तद्वारणाय वाग्विशेषणमिति कथाधिकारिणस्तु तत्त्वनिर्णयविजयान्यतराभिला
षिणः सर्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवः अकलहकारिणः कथोपयिकव्यापारसमर्था इति ।
तत्र वादं लक्षयति सूत्रकारः । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्ष
परिग्रहो वादः । अत्र च वाद इति लक्ष्यनिर्देशः पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहस्तत्साधनो
द्देश्यकोक्तिप्रत्युक्तिरूपवचनसंदर्भः तावन्मात्रं च कथान्तरसाधारणमत आह प्रमाणेत्यादि प्रमाणतर्का
भ्यां तद्रूपेण ज्ञाताभ्यां साधनोपालम्भो यत्र स तथा उभयत्रापि प्रमाणादिसद्भावे कोटिद्वयस्यापि सिद्धिः
स्यादतस्तद्रूपेण ज्ञाताभ्यामित्यं साधनोपालम्भो यत्र स तथा उभयत्र ज्ञाताभ्यामिति ज्ञानमनाहार्य्यं विवक्षितं तु
पालम्भो दूषणं जल्पादौ हि तु प्रमाणाभासत्वादिना ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणाय

१५

इतरथा तु तद्धेतोरेव दुष्टत्वेऽस्यं च प्रमाणाभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालंभयोग्यान्यत्वे सती
त्यर्थस्तेन तादृशजल्पविशेषेनातिव्याप्तिः तत्र च निग्रहस्थानविशेषनियमार्थं सिद्धान्तेत्यादिविशेषणद्वयं
अन्यथा तु तदपि लक्षणघटकमेव तदर्थश्च तावन्मात्रनिग्रहस्थानयोग्यत्वं तावदतिरिक्तनिग्रहस्थानोपन्यासा
योग्यत्वं वा निग्रहस्थानं च प्रतिज्ञाहान्यादिमेकं ध्रुवत्वात् तदुपन्यासायोग्यत्वमिति निष्कर्षस्तेनोक्तजल्पविशेषवा
रणमित्याहुः सिद्धान्ताविरुद्ध इत्यनेनापसिद्धान्तोद्भावनं पञ्चावयवोपपन्न इत्यनेन न्यूनाधिकोद्भावनं अवय
व्यतेतत्त्वे वा भासस्य दृष्टान्तासिद्धाद्यस्योद्भावनं प्रमाणेत्यनेन च प्रमाणाभासत्वेन हेत्वाभासानंतर्भासस्य
चोपन्यासो नियम्यते तथा चात्र हेत्वाभासन्यूनाधिकापसिद्धान्तरूपनिग्रहस्थानचतुष्टयोद्भावनमिति वदंति
वस्तुतस्तु वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयो
रपि नोद्भावनमुचितमत एव पंचावयवावश्यकत्वमपि भाष्यकारो नानुमेने हेत्वाभासाद्युद्भावनेनापि च
३ पि
तद्वैव कथाच्छेदो यदि हेत्वन्तरेणापि साधयितुं न शक्नोति इतरथा तु तद्धेतोरेव दुष्टत्वेऽस्यं च पञ्चावयवोपपन्न
इति प्रायिकत्वाभिप्रायेणेति तत्त्वं - वादाधिकारिणस्तु तत्त्वबुभुत्सवः प्रकृतोक्तिकाः अविप्रलंभकाः यथा
कालसम्प्रतिपत्तिकाः अनाक्षेपकाः पुंकीर्तिसिद्धप्रत्ययेतारः अनुविधेयस्य पक्षस्य पुरुषवती जनता सभा - अत्र

एप०
१५

नुविधेयोराजादिः स्थेयो-मध्यस्थः साच वादेनावश्यकी वीतरागकथात्वादिति-जल्पंलक्षयति-यथोक्तोपप
न्नश्छलजातिनिग्रहस्थानोपलंभो जल्पः। यथोक्तेयुपपन्नेतेनोपपन्नइत्यर्थः मध्यपदलोपीसमासः तथा
च प्रमाणतर्कसाधनोपलंभः पक्षप्रतिपक्षपरिग्रहइत्यस्ययोग्यतयापरामर्शः अन्यथाजल्पस्यवादविशेषत्वा
पत्तेः प्रमाणतर्काभ्यां तद्वेयणाज्ञानाभ्यां नतु ज्ञानेः नाहार्यत्वं विवक्षितं आरोपितप्रमाणाभायेपिजल्पस्यनि
र्वाहात्-पद्यपिच्छलादिभिरुपालंभ एव न तु साधनं तथापि साधनस्य परकीयानुमानस्योपालंभोपत्रेत्य
र्थान्नदोषः। परपक्षदूषणे सति स्वपक्षस्य पसिद्धिरित्यतः साधनेतदुपयोगइत्यन्ये-उभयपक्षस्थापनावत्त्वेन
च विशेषणीयं अतो वितण्डायां नातिव्याप्तिः सप्रतिपक्षस्थापनाहीनइत्युत्तरसूत्रात्मते उभयपक्षस्थापना
वत्त्वलाभः स्थापनावत्त्वादेव च पंचावयवनियमोपि लभ्यतइति वदंति-अत्र न च छलादिभिः सर्वैरुपालंभो
न विशेषणासव्याप्तिरपितु तद्योग्यतयैव योग्यतावच्छेदकं वादाभिन्नकथात्वमेव तत्र चोक्तं वादत्वावच्छे
भेदस्तु तद्वादभेदो वा विशेषणानामिति छलेत्यादिना विजिगीषुकथात्वंवोध्यते विजिगीषुर्हि छलादिकं क
रोतितथा चोभयपक्षस्थापनावती विजिगीषुकथा जल्पइत्यर्थः इत्यपि वदंति अत्र चायंक्रमः-वादिनास्व
पक्षसाधनं प्रयुज्य नापहेत्वाभासत्वलक्षणायोगादिति मामाम्पतोनाप्यमसिद्धइत्यादिविशेषतो प्रतिवा

१ नुक्तिग्राह्याणामग्राह्याणामननुभाषणाप्रतिभाना
ना २

२ प्रतिज्ञाहानि प्रतिज्ञाविरो ध॰

15

दिनास्वस्याज्ञानादिनिरासाय परोक्तमनूद्यासंभावोद्भवलाभेऽप्यमानाग्राह्यागामप्राप्तकालार्थान्तरनिरर्थ
कापार्थकानामलाभेऽज्ञताग्राह्यागांप्रतिज्ञान्तरप्रतिज्ञासंन्यासहेत्वन्तराविज्ञातार्थविक्षेपमतानुज्ञान्यूनाधिक
पुनरुक्तनिरनुयोज्यानुयोगाननुयोगापसिद्धान्तानामलाभे पर्यनुयोज्योपेक्षणास्यमध्यस्थोद्भाव्यत्वादेवानुप
न्यासाहेत्वाभासयथासंभवं हेत्वाभासेन परोक्तं दूषयित्वा स्वपक्षउपन्यसनीयः ततो वादिना तृतीयकक्षाश्रिते
न परोक्तमनूद्य स्वपक्षदूषणमुद्धृत्यानुक्तिग्राह्योऽप्यमानग्राह्यहेत्वाभासान्तरिकोक्तौ ग्राह्यागामले हेत्वा
भासेन यथासंभवं प्रतिवादिनः स्थापनादूषणीया अन्यथाक्रमविपर्यासे अप्राप्तकालं अनवसरदूषणा
द्भावनेव निरनुयोज्यानुयोगः यथा तत्पक्षसिद्धेः प्रतिज्ञाहानिर्विशेषयसि चेदुक्तं तरमित्यादि प्रतिज्ञाहान्यादि
दूत्वाभासानामुक्तग्राह्यताविशेषेऽपि अर्थदोषत्वेन प्राधान्यत्वात्तत्क्रममनुसंधानामिति वितण्डाक्रमप्राप्तां लक्ष
यति· सप्रतिपक्षस्थापनाहीनो वितण्डा· यद्यपि तच्छेदेन जल्पो न परामृष्टः शक्यते जल्पस्य स्थापनाद्वयवतः
प्रतिपक्षस्थापनाहीनत्वस्य विरुद्धत्वात् तथापि स्थापनाद्वयवत्वं विहाय जल्पैकदेशः परामृश्यते· प्रतिप
क्षो द्वितीयपक्षस्तथा च प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेति· न च तस्य स्थापनीयाभावात् क
थमीयं कथा प्रवर्ततामिति वाच्यं· परपक्षखण्डनेन जयशेषोद्देश्यत्वात्· परं तु परपक्षखण्डनेनैव स्वपक्षसिद्धि

भे ५

सपक्ष ४

ध्योरेव सिद्धत्वात् साधनाभावेऽपि न प्रश्नस्त्वनुपपत्तिरिति वदंति। समासेन यथाप्रकारेण क्रमप्राप्तान् हेत्वाभासा
ल्लक्षयति विभजते च। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः। न चात्र लक्षणानप्र
तीयत इति वाच्यं। हेत्वाभासशब्दस्य हेतुवदाभासमानार्थकत्वेनैव तत्सूचनात्। सूचनाच्च सूत्रं। तथा हि पक्षस
त्त्वसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वोपपन्नो हेतुर्गमकः। तद्वदाभासतः इत्यत्र वतुपर्थस्ताद्रूप्यमेव विस
त्तितद्रूपमेवत्वं तथा च पंचरूपोपपन्नत्वाभावे सति तद्रूपेणाभासमानत्वं निष्फलितार्थः। तत्र च लक्षणसमन्वयं तत्तत्स्व
रूपकतायामुपयोगात्। न चासाधकतायां पक्षसत्त्वाद्येकैकाभावस्यैव गमकत्वसंभवेऽधिकवैयर्थ्यं। ए
तेन पंचान्यतमत्वं लक्षणमित्यपि प्रत्युक्तमिति वाच्यं। पंचान्यतमत्वावच्छिन्नाभावस्य पक्षसत्त्वाभावाद्यघ
टितत्वेन वैयर्थ्याभावात्। वस्तुतस्तु पृथिवी इतरेभ्यो भिद्यते स्पर्शवत्त्वात्। प्रमेयमाकाशगादित्यादौ सपक्षाद्य
प्रसिद्धेर्नैतस्य लक्षणत्वे तात्पर्यं परं तु विपक्षासत्त्वसपक्षसत्त्वाभ्यां सव्यभिचरितसामानाधिकरण्यं विप
क्षसत्त्वे सहितस्य चैतस्य विरोधित्वत्रितयं लब्धं। तेन व्याप्तिविशिष्टपक्षधर्मताविरोधित्वं चरमयोस्त्वनु
मितिविरोधिरूपानवच्छिन्नसाधकयोरभावादनुमितिविरोधित्वं तेनानुमितकारणज्ञानान्यतरविरोधित्वं त्रिर
पर्यवस्यति। सव्यभिचारं लक्षयति। अनैकान्तिकः सव्यभिचारः। एकस्य साध्यस्य तदभावस्य च योऽतः सहचा

२ = यथा शब्दो नित्यः निःस्पर्शत्वात् । न चैवं विरुद्धसांकर्यदोषः । उपधेयसंकरेप्युपाधेरसंकरात् ॥ असाधारणः २ ॥ १

शब्दत्वात् ३

णः अव्यभिचरितसहचारस्यांतः सहचारस्तत्त्वाशयः सचात्र व्याप्तिग्राहकस्तथा चैकमात्रव्याप्तिग्राहकसहचारेणैकां

तिकसंदेहान्नैकांतिकः सच साधारणोऽसाधारणोऽनुपसंहारी चेति त्रिविधः साधारणः साध्यवदन्यवृत्तिः सपक्षविपक्षव्यावृत्तः

सपक्षः साध्यवत्त्वनिश्चयाविषयः यथा शब्दो नित्यः शब्दत्वादित्यादौ अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षकः यथा स

र्वं नित्यं प्रमेयत्वादित्यादौ अत्र च साध्यसंदेहात् व्याप्तिग्रहो न भवतीत्याशयः न व्याप्तस्तु असाधारणः साध्यवद्व्यावृत्तिः एत

16

स्य साध्यसहचारग्रहप्रतिबंधेन व्याप्तिग्रहप्रतिबंधो दूषकताबीजं अनुपसंहारी च केवलान्वयिसाध्यकस्तस्य चात्य

ताभावाप्रतियोगिसाध्यकत्वरूपस्याज्ञाताव्यतिरेकव्याप्तिग्रहप्रतिबंधो दूषकताबीजमित्याहुः ॥ क्रमप्राप्तं विरुद्धं ल

क्षयति सिद्धांतमभ्युपेत्य तद्विरोधी विरुद्धः अत्र च सिद्धांतं साध्यं प्रतिज्ञायां हि पक्षस्य सिद्धस्यांते साध्यमभिधी

साध्यविरोधी ५ यते तथा च साध्यमभ्युपेत्याद्दृश्यप्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थः यथा वह्निमान् ह्रदत्वादिति ।

एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबंधो दूषकताबीजं न च सत्प्रतिपक्षाद्विशेषः तत्र हेत्वंत

रं साध्याभावसाधकं इह तु हेतुरेव साध्याभावसाधकः ॥ साध्यसाधकत्वेनभियोपन्यस्त इत्युपशक्तिविशेषोन्नेयः क

स २ त्वेनाविशेषात् क्रमप्राप्तं प्रकरणसमं लक्षयति यस्मात्प्रकरणचिंता स निर्णयार्थमपदिष्टः प्रकरणसमः हेतुः स्व

साध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते सत्प्रतिपक्षापरनामा ह यस्मात्प्र

एम०

१६

स २

करणौ पक्षप्रतिपक्षाविति भाव्यं साध्यतदभाववत्ताविति तदर्थस्तथा च निर्णयार्थं प्रयुक्तो हेतुर्यत्र निर्णयं जनयि
तुमशक्तस्तुल्यबलेन परेण प्रतिबंधात् किंतु धर्मिणः साध्यवत्त्वं तदभाववत्त्वं चेति चिंतां जिज्ञासां प्रवर्त्तयति स प्रकर
णसमः। यद्वा प्रकृष्टं करणं लिंगपरामर्शो वा को हेतुरनयोः साधकस्तयोः कः परामर्शः प्रमेति वा यत्र जिज्ञासा भ
वतीत्यर्थः। यस्मात् इत्यादि तु वस्तुस्थितिमात्रं लक्षणं तु तुल्यबलविरोधिपरामर्शकालीनपरामर्शविषयत्वं स्वसा
ध्यपरामर्शकालीनतुल्यबलविरोधिपरामर्शो विरोधिपरामर्शस्य स्वहेतुनिष्ठत्वमेकज्ञानविषयत्वसंबंधेनान्य
था हेतोर्दुष्टत्वं न स्यात्। अयं च दशाविशेषदोष इत्यतः सद्धेतोरपि विरोधिपरामर्शकाले दुष्टत्वमेवेत्यवधेयं। अ मि२६
७ साध्यसम थ प्राप्तं साध्यसमत्वं लक्षयति साध्याविशिष्टस्साध्यसमः। साध्येन वह्न्यादिनाऽविशिष्टः कुत इत्यत आह साध्य
त्वादिति साधनीयत्वादित्यर्थः। यथाहि साध्यं साधनीयं तथा हेतुरपि चेत्साध्यसम इत्युच्यते। अत एवासिद्ध इति
व्यवह्रियते। अयं चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्धिभेदात्त्रिविधः। आश्रयासिद्धिश्च पक्षे पक्षतावच्छे
दकाभावः यथा कांचनमयः पर्वतो वह्निमान् इत्यादौ। स्वरूपासिद्धिः पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः य
था ह्रदो द्रव्यं धूमादित्यादौ। व्याप्यत्वासिद्धिश्चाव्यभिचरितसामानाधिकरण्यस्याभावः। न च स्वरूपासिद्धेर्वस्त
त्वाल्लक्ष्यत्वप्रतीतेरुभयोर्लक्ष्यत्वमिति वाच्यं। हेतुरिति पदस्यात्र प्रकरणीयहेतुपरं च गमकहेत्वाभासविशिष्टय

क्षधर्मस्य वाच्यत्वकं व्याप्तिविशिष्टपक्षधर्मत्वेन वा पर्यवसितं तथा च तस्य किंचिद्रूपेण साध्यत्वेनैव साध्यसमत्वं अत एव सा
ध्ये साध्यतावच्छेदकाभावः साधने साधनतावच्छेदकाभावश्च व्याप्यत्वासिद्धिः यथा पक्षतावच्छेदकाभावः पक्षतावच्छे
दकवैकल्ये हेतोरन्यतमत्वेनाश्रयासिद्धत्वं यथा च पक्षे हेतुमत्त्वे हेतोरन्यतमत्वेन स्वरूपासिद्धित्वं तथा साध्यतावच्छेद
काभावादेरन्यतमत्वेन व्याप्यत्वासिद्धत्वं त्रितयान्यतमत्वं वासिद्धिसामान्यलक्षणं · नीलधूमत्वादेरपि व्याप्यत्वा
सिद्धावंतर्भावं वदंति तेषामयमाशयः । व्याप्तिर्हि साध्यसंबंधितावच्छेदकरूपा गुरुधर्मश्च साध्यसंबंधितानवच्छे
दकोऽव्याप्यतानवच्छेदको नीलधूमत्वादेः साध्यसंबंधितानवच्छेदकत्वान्न व्याप्तिस्वरूपत्वं तथा च साध्यतावच्छे
दकाभावादिरिव साधनतावच्छेदके व्याप्यतानवच्छेदकत्वमपि भवति व्याप्यत्वासिद्धिरिति । क्रमप्राप्तमतीत
कालत्वं लक्षयति · कालात्ययापदिष्टः कालातीतः । अतीतकालस्य समानार्थकत्वात्कालातीतशब्देनोक्तः · का
लस्य साधनकालस्यात्यये · भावेऽपदिष्टः प्रयुक्तो हेतुः । एतेन साध्याभावप्रमालक्षणाबाध इति सूचितं · साध्या
भावनिर्णाये साधनासंभवात् यमेव बाधितसाध्यक इति गीयते यथा वह्निरनुष्णः कृतकत्वादित्यादौ · ननु बा
धे आवश्यकस्य व्यभिचारस्वरूपासिद्ध्यन्यतरस्यैव दोषत्वमुचितमिति वाच्यं · तदप्रतिसंधानेन बाधस्य दोष
त्वावश्यकत्वात् उपधेयसंकरेऽप्युपाधेरसंकरात् · उत्पत्तिकालावच्छिन्नो घटो गंधवान् शिखरावच्छिन्नः पर्व

तो वन्हिमानित्यादावसंकराच्च॥ साध्याभाववत्पक्षतावच्छेदकावच्छिन्नकत्वस्य तत्र सत्वात्॥ येनु॥ घटः सकर्तृ
कः कार्यत्वादित्यादौ हेयत्र लाघवोपनीतमेकमात्रकर्तृकत्वं यत्र भासते इत्युच्यते तत्र तदभावोऽसंकीर्ण इत्याहुर
णामिति वदंति॥ समाप्तं हेत्वाभासनिरूपणम्॥ क्रमप्राप्तं छलं लक्षयति॥ वचनविघातोऽर्थविकल्पोपपत्त्या छ
लं॥ अर्थस्य वाच्याभिमतस्य यो विकल्पो विरुद्धः कल्पः अर्थान्तरकल्पनमिति यावत् तदुपपत्त्या युक्तिविशेषेण
यो वचनस्य वाक्प्रयुक्तस्य विघातो दूषणं तत् छलमित्यर्थः वक्तृतात्पर्याविषयार्थकल्पनेन दूषणाभिधानमि
ति फलितं तात्पर्याविषयत्वं विशेष्यविशेषणविशेषणयोः संसर्गे वा यथा नेपालादागतोऽयं नवकंबलवत्त्वा
दित्यत्र नवसंख्यापरत्वकल्पनयाऽसिद्ध्यभिधानं प्रमेयं धूमत्वादित्यत्र पुरुषत्वाद्यधिकल्पनया भागासि
द्ध्यभिधानं॥ वन्हिमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानं॥ लक्षितं छलं विभजते॥ तत् त्रिविधं वाक्
छलं सामान्यच्छलमुपचारच्छलं च॥ तत्र वाक्छलं लक्षयति॥ अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्था
न्तरकल्पना वाक्छलं॥ यत्र शक्यार्थद्वये संभवति एकार्थनिर्णायकविशेषाभावात् अनभिप्रेतशक्यार्थक
ल्पनेन दूषणाभिधानं तथा वाक्छलं॥ लक्षणं तु शक्यतया एकार्थशाब्दबोधतात्पर्यकशब्दस्य शक्यार्था
न्तरतात्पर्यकत्वकल्पनेन दूषणाभिधानं यथा नेपालादागतोऽयं नवकंबलवानित्युक्ते कुतोऽस्य

18

तत्र संख्यकाः कंबलाइति॰ एवं गो विषाणी त्युक्ते कुतो बालस्य विषाणं गजेनाप्य विषाणीत्युक्ते कुतो गजस्य
स्यं॰ श्वेतो धावतीति श्वेतरूपवदभिप्रायेणोक्ते श्वा इतो न धावतीत्यभिधानमित्यादिकमूह्यं॰ सामान्यछलं
लक्षयति। संभवतोऽर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यछलं। सामान्याविशिष्टसंभव
दर्थाभिप्रायेणोक्तस्य सामान्ययोगादसंभवदर्थकल्पनया दूषणाभिधानं सामान्यछलं। यथा ब्राह्म
णोऽयं विद्याचरणसंपन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसंपत्साधयतीति कल्पयित्वा पुरो वदति कुतो ब्राह्म
णत्वेन विद्याचरणसंपत् व्रात्येव्यभिचारात्। उपचारछलं लक्षयति॰ धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषे

सं॰७

ध उपचारछलं॰ धर्मशब्दस्यार्थेनैवं धर्मस्य विकल्पो विविधः कल्पः शक्तिलक्षणान्यतररूपस्तथा च शक्ति
लक्षणयोरेकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्यार्थस्य प्रतिषेधः स उपचारछलं। यथा मंचाः क्रोशंतीति निलाघ
ट इत्याहे मंचस्था एव क्रोशंति न तु मंचाः॰ एवं घटस्य कथं नीलरूपाभेदः। एवमहं नित्य इति शब्दाप्रयुक्ते अमु
कस्माद्दुःसन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारछलं वाद्यभिप्रेतार्थस्याद्दूषणेन छलस्यासदुत्तरत्वं॰
ननु स्मिन्छलं क्षणिकप्रयोगाद्वादिन एव पराजयः स्यादिति वाच्यं॰ तत्र दृष्टांतबोधकतायाप्रसिद्धस्य शब्द
स्य प्रयोगे वादिनो न पराजयः अन्यथा पर्वतो वह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमानित्यादिदूषणानानु

प॰६५

=२ पचारछलं स्यादिति छलस्य द्वित्वमेव न तु त्रित्वमिति शंकार्थः॥ समाधत्ते॥ न तदर्थान्तरभावात्॥ उपचारछलस्य वाक्छलाभेदो २=

=४ संगः॥ यत्किंचिद्धर्मोदविशेषे किंचित्साधर्म्याच्छलैकादिरूपाच्छलस्यै

१ कं स्यात् न तु तदभिमतं द्वित्वमिति भावः॥ समासं छलप्र ४=

२२ लुं

मानाभेदः स्यात् प्रसंगाच्च पूर्वपक्षयति वाक्छलमेवोपचारच्छलं तदविशेषात् शब्दस्यार्थान्तरकल्पनावि
शेषाद्वाक्छलमेवोपचारो न तयोर्थान्तरभावाद्भिन्नत्वात् तभिन्नतयाप्रमाणसिद्धत्वादिति फलितार्थः एवं कमेदकध
र्म्मेणाभेदे संभवेपि यत्किंचिद्धर्मेणाभेदे सामान्यधर्मेणाभेदस्य सर्वत्र संभवाद्विभागः कुत्रापि न स्यादिति विपक्षे
बाधकममिप्रेत्याह अविशेषे वा किंचित्साधर्म्यादेकच्छलप्रकरणं क्रमप्राप्तं जातिं लक्षयति साधर्म्यवैधर्म्या
भ्यां प्रत्यवस्थानं जातिः साधर्म्यवैधर्म्याभ्यामिति सावधानो निर्देशः तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्या
प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः यद्यप्युभाभ्यां प्रत्यवस्थानस्याप्रत्येकप्रत्यवस्थानेऽव्या[illegible]सि
रेकप्रत्यवस्थानस्य लक्षणत्वे परप्रत्यवस्थानेऽव्याप्तिर्नवान्यतरप्रत्यवस्थानं निवृत्तं सर्वत्र जातावभावात्
थापि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यं तेन च सद्भेदाद्दूषणासमर्थत्वं स्वव्याघातकत्वं वाद
ष्टितं तथा च लच्छलादिभिन्नं दूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितं साधर्म्यसमादि
चतुर्विंशतिप्यान्यत्वं न द्रष्टव्यं स्यापि वदंति क्रमप्राप्तं निग्रहस्थानं लक्षयति विप्रतिपत्तिरप्रतिपत्तिश्च नि
ग्रहस्थानं निग्रहस्य खलीकारस्य स्थानं ज्ञापकं निग्रहस्थानं तच्च विप्रतिपत्तिरप्रतिपत्तिश्च विप्रतिपत्तिर्वि
विरुद्धा प्रतिपत्तिः अप्रतिपत्तिः प्रकृताज्ञानं यद्यप्येतदन्यतरं परनिष्ठं नोद्भावयितुमर्हमिति ज्ञाहान्याधि

न्यं २

ग्रहस्थानत्वानुपपत्तिश्च · तथापि विज्ञौ प्रतिपत्यप्रतिपत्यन्यतरालाघवत्कथमेवत्वं तदर्थः । उद्देश्यानुगुणसम्प
ग्रहणाभावलिंगत्वं प्रतिज्ञाहान्यादी अन्यतरत्वं वा लक्षणमित्यपि वदंति · जातिनिग्रहस्थानयोर्विभागो नास्ती
ति मन्त्रमीमांसकादिन्यतमन्नाह · तद्विकल्पाज्जातिनिग्रहस्थानवक्तृत्वं · तद्विकल्पात्साधर्म्यादिना प्रत्यवस्थानस्य
विप्रतिपत्त्यप्रतिपत्त्युल्लायकव्यापारस्य च विकल्पाद्बहुत्वान्नामकारत्वादिति यावत् · इत्थं च तयोर्न्युक्तावपि प्रमाणा
दिपरीक्षाविषयकशिष्यजिज्ञासया प्रातिवंधान्नेहानीतादृग्विभागः क्रियतइति भावः ॥ समासं पुरुषाशक्तिलिं
गदोषसामान्यलक्षणप्रकरणं ॥ प्रथमाध्यायस्य द्वितीयमान्हिकं ॥ इति श्रीविश्वनाथभट्टाचार्यकृतन्याय
सूत्रवृत्तौ प्रथमाध्यायः ॥ तः समाप्तः ॥ प्रमाणैः संस्थिते देशे विवादेषु परीक्षितैः हारि द्वितीयमध्याय [illegible]
यभास्समानमहं भजे ॥ अथ प्रमाणादिषु लक्षितेषु परीक्षणीयेषु संशयं विना परीक्षाया असंभवादादौ संशय
एव परीक्षणीयः । शिष्यजिज्ञासानुसारात्सूचीकटाहन्यायात् · संशयपरीक्षा वा प्रमाणादिपरीक्षोप
योगित्वात्प्रमाणपरीक्षैवाध्यायार्थ इति वदंति · वस्तुतस्तु छलस्य परीक्षितत्वात्तृतीयचतुर्थयोः प्रमेयस्य पंच
मेच जातेः परीक्षिष्यमाणत्वेन तदितरयावत्पदार्थपरीक्षैवाध्यायार्थः प्रयोजनादिपरीक्षाया अप्यत्रैवातिदे
शनकरिष्यमाणत्वात् तत्रापि भागसमाप्येस्य प्रमाणपरीक्षातिरिक्तोक्तयावत्पदार्थपरीक्षा प्रथमान्हिकार्थः · तत्र

19

न्या०
१९

१५

चनवप्रकरणानि तत्रादौ संशयपरीक्षाप्रकरणं। अन्यानि यथायथं वक्ष्यंते-तत्र संशयपरीक्षणायां पूर्वपक्षसूत्रं
समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः। अत्र सूत्रकृता संशयस्यादर्शनात्संशयप
रीक्षायां संशयो नांगमनवस्थाभयादित्याशयं सूत्रकृतो वर्णयंति-तदसत् न ह्यत्र संशयपूर्वरूपपरीक्ष्यते येनान
वस्थास्यादपि तु लक्षणसूत्रोक्तं संशयकारणं तथा च संशयः समानधर्मदर्शनादिजन्यो न वेति संशयः संभव
त्येव परं तु सूत्रकृतो निर्णायकत्वात् पूर्वपक्षनिरासमात्रस्यापेक्षणान्न संशयो दर्शित एवमेव प्रमाणपरीक्षा
यामप्यत एवाभिहितं भाष्ये शास्त्रे वादे च विमर्शवर्जमिति तत्त्वं-समानादिधर्मदर्शनान्न संशयः प्रत्येकं व्यभि
चारात्-अन्यतरत्वेनानुगतीकृततद्दर्शनादपि न संशयः नहि स्थाणुधर्मसमानधर्मोयं पुरुषधर्मसमानध
र्मायमिति जानन् स्थाणुर्नवेति संदिग्धे-समानत्वस्य भेदगर्भत्वाद्भिन्नधर्मत्वेन ज्ञाते तद्द्वयग्रहस्यैव संभवात्-
यद्वा समानानेकधर्मोपपत्तेरिति लक्षणसूत्रे उपपत्तिपदं स्वरूपपरमिति भ्रांतस्यैव शंकात थाचायमर्थः
न संशयः समानधर्मादित्तेः सत्यपसत इति शेषः। यतः समानधर्मादेरध्यवसायादन्यतरत्वेनानुगतीकृततदध्य
वसायाद्वा संशयः अन्यथा संशयस्य सार्वदिकत्वापत्तेः विप्रतिपत्त्यादिजन्यसंशयं च यं प्रतिक्षिपति०
विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च-न संशय इत्यनुवर्तते-विप्रतिपत्तेरुपलब्ध्यव्यवस्थायाश्चानुपलब्ध्य

व्यवस्थायाश्च न संशयजनकत्वं प्रत्येकं व्यभिचारादित्यर्थः यद्वा स्वरूपसद्विप्रतिपत्त्यादितो न संशयः किंतु
तद्व्यवसायादित्यर्थः विप्रतिपत्तिजन्यसंशयमात्रप्रतिक्षेपाय सूत्रांतरं विप्रतिपत्तेश्च संप्रतिपत्तेः विप्रतिपत्तेर्न
संशयहेतुत्वं संप्रतिपत्तेः निश्चयात् वादिनो निश्चयस्य परस्य च निश्चयसत्वात् सति च निश्चये संशयायो
गादिति भावः उपलब्ध्यनुपलब्धि अव्यवस्थाजसंशयद्वयनिरासायाह सूत्रं अव्यवस्थात्मनि व्यवस्थितत्वा
च्चाव्यवस्थितत्वाच्चाव्यवस्थायाः उपलब्ध्यव्यवस्थाया अनुपलब्ध्यव्यवस्थायाश्च संशयजनकत्वं तदा स्या
त् यदि स्वस्मिन्नपि अव्यवस्थितत्वं स्यात् भवेवं तथाव्यवस्थात्मनि व्यवस्थितायास्तस्याः कथमन्यत्राव्यवस्थात्व
मित्यर्थः ननु व्यवस्थाप्रामाण्यसंशयस्तस्य च न स्वसंशयरूपत्वं संशयविशेषघटितत्वात् तस्य चान्यसंश
यजनकत्वं न विरुद्धं अतो दूषणांतरमाह तथात्यंतसंशयस्तद्धर्मसातत्योपपत्तेः तथा तथा सत्यव्यवस्थाया हे
तुत्वे सति तथाशंकायं न सूत्रांतरगतोपि तु भाष्यस्य रूपान्य अत्यंतसंशयः संशयानुच्छेदः स्यात् तद्धर्मस्य त
ज्जनकस्य ज्ञानत्वादिसाधारणधर्मदर्शनस्य सातत्योपपत्तेः सर्वदा संभवात् अथ ज्ञानत्वादिसाधारणध
र्मदर्शनेपि कारणांतरविलंबान्न सर्वत्र प्रामाण्यसंशय इत्याह तदात सैव विषयसंशयहेतुत्वमस्त्विति किं
प्रामाण्यसंशयस्य साधारणधर्मदर्शनादेवासंशयहेतुत्वेनेति भावः सिद्धांतमाह यथोक्ताध्यवसाया

स्य

देवतद्विशेषापेक्षात्संशयेनासंशयोनांतपंतसंशयोवा॥ यथोक्ताध्यवसायात्साधारणादिधर्मदर्शनात्त
स्यपुरुषत्वादेर्यो विशेषस्तदनध्यवसायोऽधर्मिस्तस्यापगतरेखाईक्षणांतातो विशेषादर्शनादित्यर्थस्तथा
च विशेषादर्शनसहितसाधारणधर्मदर्शनादितः संशयेस्वीकृते न कारणाभावात्संशयो न तावत्किंचि
त्कारणासत्वादत्पतसंशयस्तत्पर्थः साधारणधर्मदर्शनाद्यैश्च संशयाविशेषेऽजनकत्वात् संशयत्वावच्छि
न्नप्रतिव्यभिचारेऽपि न क्षतिः॥ विप्रतिपत्तौ च वादिवाक्याभ्यामध्यस्यस्येव संशयोपगमात् प्रश्नोत्तं समान
धर्मदर्शनात् कथं संशयः समानत्वस्य भेदगर्भत्वात् तितदपि न न हि समानधर्मत्वेनैतज्ज्ञानं हेतुरपितु
भयसहचारितधर्मवत्त्वज्ञानेन तथैतु केशाभावात संप्रतिशंसयपरीक्षयैव परीक्षा परधीनां नापेक्षा
मतिरित्याह॥ यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसंगः॥ एवमुक्तरीत्याऽन्तरोत्तरेषु प्रयोजनादिषु प्रसंगः प्रकृ
ष्टः संगः परीक्षायाः संबंधो बोद्धव्यस्तत्किं प्रयोजनमपि परीक्षणीयं नेत्याह यत्र संशयस्तत्र परीक्षितव्य
क्षणार्थं संशयस्तदा तद्विषयपरीक्षेत्यर्थः॥ अर्थान्तरोत्तरं उक्तिप्रस्तु किंरूपं तत्प्रसंगतो द्रष्टव्या परीक्षा संशयिके
तेर्थेऽकर्त्तव्येत्यर्थः॥ समाप्तसंशयपरीक्षाप्रकरणा॥ इदानीमवसरतः प्रमाणसामान्यपरीक्षणाय पूर्वपक्ष
यति॥ प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः॥ कालत्रयेऽपि प्रमाणात्प्रमायाः सिद्धेर्वक्तुमशक्यत्वा

प्रत्यक्षादीनां न प्रामाण्यमित्यर्थः त्रिसूत्र्यां त्रैकाल्यासिद्धिं व्युत्पादयति एवं हि प्रमाणासिद्धेरिंद्रियार्
थसंनिकर्षात्प्रत्यक्षसिद्धिः । प्रमाणस्य एवं त्वं तावन्न संभवति हि यतः प्रमायाः एवं प्रमाणासिद्धेः प्रमा
णसत्वे इंद्रियार्थसंनिकर्षात्प्रत्यक्षं सिध्यतीति न स्यात् । प्रत्यक्षप्रमाणस्य तः पूर्वमेव प्रमायाः सत्वा
त् । प्रमाणत्वं हि प्रमाकरणत्वं पूर्वं प्रमायाः अभावे प्रमाकरणत्वमपि कथं स्यात् पूर्वमेव प्रमायाः । सि
द्धत्वे येति कथमिंद्रियार्थसंनिकर्षात् इंद्रियार्थसंनिकर्षादिता प्रत्यक्षोत्पत्तिः प्रत्यक्षाद्युत्पत्तिः । प
रे तु प्रत्यक्षं प्रति करणत्वं खंडितं तत्प्रत्याकरणांतरमपि खंडनीयमित्याशयं सूत्रकृतो वर्णयंति । प्र
माणस्य प्रमाया वैशिष्ट्याभावे प्रमाणाभावः इति ज्ञाते पि वैशिष्ट्यसंशयः स्यादिति भावः । पश्चात्सिद्धे
न प्रमाणेभ्यः प्रमेयसिद्धिः । प्रमाणस्य प्रमेतः पश्चात्सिद्धो विषयस्य प्रमेयत्वं प्रमाणात्पूर्वमेव सि
द्धमिति न प्रमाणात् प्रमायाउत्पत्तिः प्रमेयस्य च ज्ञाप्तिरिति । युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्ति
त्वाभावो बुद्धीनां । इदं च सूत्रद्वयमनुमानाद्यपि प्रायेण च वस्तुः श्रोत्रादेः प्रमाणानंतरं प्रमा समकाले
वा सत्वस्येष्टत्वादुत्पत्तेः शं किंतु मशामत्वात् । तद्द्वयमर्थः प्रमाणप्रमेययोर्युगपत्सत्वे युगपदुत्प
न्नो बुद्धीनामध्यावशेषनियतत्वाद्यक्रमवृत्तित्वं तन्न स्यात् परज्ञानं हि शब्दविषयकं श्रावणप्रत्य

अ०:४

११

८।३

स्वरूपं शांकरबोधश्च परार्थविषयकः प्रमेयस्वरूपो विजातीयद्वित्वन्यायेन यौगपद्यं संभवति · कार्यकारणभावव
त्वात्क्रमेणैककालत्वेन वासिद्धिरस्तु एवं कमेव ज्ञानमुभयविषयकमित्यपि नाशंकनीयं · संकरप्रसंगश्च · एवं व्याप्ति
ज्ञानानुमितिनावैपिद्रष्टव्यं · परं तु प्रमाणप्रमेययोर्नयुगपत्सिद्धिर्नयुगपज्ज्ञानं बुद्धीनामस्थाविशेषनीयतत्वा
त्क्रमवृत्तित्वे तथासति न स्यात् तथाहि चक्षुषो ज्ञानमनुमित्यादि रूपघटादेश्च प्रत्यक्षादिरूपं न चानयायौ
गपद्यं संभवतीत्यर्थ इत्याह · सिद्धान्तस्त्वत्र · त्रैलोक्यासिद्धेः प्रतिषेधानुपपत्तिः यदि त्रैकाल्यासिद्ध्या प्रमा
णात्प्रमेयसिद्धिर्नोपपद्यते तर्हि तत्प्रतिषेधोऽप्यनुपपन्न इति जात्युत्तरमेतदिति भावः किंच स
र्वप्रमाणप्रतिषेधे प्रतिषेधकं प्रमाणमपि नाभ्युपगंतव्यं तथा च कथं प्रतिषेधसिद्धिरित्याह सर्वप्रमा
णप्रतिषेधाच्च प्रतिषेधासिद्धेः यदि च प्रतिषेधकं प्रमाणमुपेयते तर्हि क्वचित्सर्वप्रमाणप्रतिषेध इत्याह तत्प्रमाणेष
वा न सर्वप्रमाणप्रतिषेधः ननु मन्मते वस्तुस्थितिर्नोपेक्षिता निश्चयस्य शून्यत्वात् प्रमाणप्रमेयभावो
ऽपि न वास्तविकस्तन्मते च त्रैकाल्यासिद्धिरित्यत्र उत्पत्तस्तद्दूषणमिति · त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसि
द्धिवत्तत्सिद्धेः ४ त्रैकाल्यायः प्रतिषेधउक्तस्स न संभवति कुतः तत्र दृष्टान्तमाह शब्दादिति · यथा शब्दादातोद्या
दिनः सर्वसिद्धं स्यात् तोद्यस्य मुरजादेः सिद्धिः सोऽपि पि यथा वा पूर्वसिद्धात् सूर्यादुत्तरकालीनवस्तुप्रकाशनं · यथा

त्रप्रतिषेधा ५

वावन्हिसमकालीनाद्धूमाद्वन्हिसिद्धिस्तथान्यत्रापि प्रमातुः सर्वत्र प्रमाणाद्युत्पत्त्यभावेऽपि प्रमाणस्य न क्षतिरिति । प्र
मातः एवं भयवृत्त्वमस्त्येव एवं च प्रमावैशिष्ट्यं तु तस्य नोपपद्यते । यदा कदाचित्प्रमासंबंधेनैव प्रमाणत्वसंभवात् घटादौ कदा
चित्प्रमाकसंबंधेनैव पाचकमानयेत्यादिव्यवहारदितिभावः । अत्र च कारांतेन सूत्रोक्तमिति तत्त्वालोके वस्तुत इष्टीकास्वे
ष्टसाक्षात्त्वांतर्गतमिव । ननु नियतत्वादिव प्रमाणप्रमेयव्यवहारेण पारमार्थिकः एकोऽपि सर्वादिव्यवहारवदित्य
पेक्षायामाह प्रमेयता च तुलाप्रामाण्यवत् । यथा हि तुलायाः सुवर्णादिगुरुत्वपरिच्छेदकत्वात्प्रामाण्य
व्यवहारस्तु नांतरेण च स्वगुरुत्वपरिच्छेदे च प्रमेयव्यवहारस्तथा निमित्तद्वयसमावेशाद्द्वयोरर
पि प्रमाणव्यवहार इति । यद्वा प्रमाणानां प्रमेयता च प्रमावैशिष्ट्यादिति यत्प्रागाशंकितं तत्राह प्रमेयता
चेति । यथा कस्याचिद्गुरुत्वेयत्तापरिच्छेदकत्वात्तुलायाः प्रमाणव्यवहारस्तथेंद्रियघटादेरपि प्रमाणप्रमे
यव्यवहार इति । अनवस्थायाः प्रत्यवस्थानपरं पूर्वपक्षसूत्रं । प्रमाणतः सिद्धेः प्रमाणानां प्रमाणांतर
सिद्धिप्रसंगः प्रमाणानां प्रमाणतः सिद्धेः स्वीकारे प्रमाणांतरस्वीकारः स्यात् यथा हि प्रमाणस्य तावन्न स्व
तः सिद्धिरात्माश्रयापत्तेः परतः प्रमाणांतरस्वीकारे तयोश्च परस्परसाधकत्वेऽन्योन्याश्रयापत्तिरतस्तत्रा
पि प्रमाणांतरमंगीकार्यमित्येवमनवस्थेति भावः । ननु प्रमाणसिद्धिः प्रमाणं विनैव स्यादित्यत्रा

हृ५ ॥ ३ द्वि

एम०

हेतुसिद्धिनिवृत्तेश्च प्रमाणसिद्धिः । पुनश्च प्रमाणाविनिवृत्तितः प्रमाणव्यतिरेकात्प्रमाणसिद्धिः । प्रमाणेनैव स्या
स्वीक्रियते तद्वत् दृष्टवत्तत्सिद्धिः स्वीक्रियतां किं प्रमाणग्राहकेण तथा चाव्यवस्थितमेव जगत्स्यादिति शङ्क्य
तायां पर्यवसन्नमिति भावः ॥ सिद्धान्तसूत्रं - नप्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः । यथा ॥ यथा हि प्रदीपालोकाद्घटादिप्रकाश
स्तथा प्रमाणानां प्रमेयप्रकाशकत्वमन्यथा प्रदीपस्य घटप्रकाशकत्वं प्रदीपप्रकाशकत्वं च वस्तु सज्ज्ञापकम
न्यदित्यनवस्थायां तावत्प्रदीपोपि न घटप्रकाशकत्वमन्यथा स्यात् घटश्च घटप्रत्यक्षेतत्प्रकाशान्तरानपेक्षेतिना
वस्थेत्युक्तं तेन तत्र प्रकृतेपि तुल्यं न हि प्रमाणात्प्रमेयसिद्धौ प्रमाणसिद्धिरपेक्षिता यदा प्रमाणसिद्धिरपेक्षिता
तदा तत्रापि प्रमाणमपेक्ष्यतां तच्चानुमानादिकमेवेति न प्रमाणान्तरकल्पनानवानवस्था सर्वत्र प्रमाणसि
द्धिरनपेक्षितात् क्वचिद्दृष्टान्तं कुरु वरपेक्षापि न क्षतिकरीति भावः । प्रदीपस्य प्रदीपान्तरं विना प्रकाशकत्ववत्
प्रमाणानामपि प्रमाणान्तरं विना प्रमेयप्रकाशकत्वमिति सूत्रार्थे केचन मन्यन्ते तान्प्रत्याह भाष्यकारः क्वचि

सू ३

न्निवृत्तिदर्शनात् अनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः क्वचित्प्रदीपादेः प्रमाणान्तरस्य निवृत्तिदर्शनात् क्वचिद्
घटादेः प्रमाणान्तरानिवृत्तिदर्शनात्प्रमाणान्तरापेक्षैव किं न साध्यते तथा च दृष्टान्तसमा जातीयमितिभा
वः । त्वद्व्याख्यानेकथं नानेकान्त इत्यत्राह भाष्यकारः विशेषहेतुपरिग्रहे सति तु उपसंहाराभ्यनुज्ञाना दृष्टमिति

= दर्शनात्प्रदीपो हेतुरनेकान्तः अनित्यत्वतः तथा च प्रदीपदृष्टान्तात्प्रमाणानां तदपेक्षानिवृत्तिः साध्यते ॥ घटदृष्टान्तेन प्र =
माणान्तरापेक्षे २ =

२३

षेधः मन्यते विशेषविहिताः व्याप्तिपक्षधर्मताश्रयस्य परिग्रहे सत्युपसंहारस्य साध्यसाधनस्याप्यनुज्ञानाद्दुष्का
नैकांतात्मकः प्रतिषेधो न भवति ॥ ॥ समाप्तं प्रमाणसामान्यपरीक्षाप्रकरणं ॥ प्रमाणसामान्यपरीक्षानंतरं प्र
प्रमाणविशेषेषु परीक्षणीयेषु प्रथमोद्दिष्टं प्रत्यक्षं प्राक् परीक्षणीयं तत्र च फलद्वारकं लक्षणमेवमुक्तमतः
फललक्षणं यथाश्रुतमाक्षिपति - प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ प्रत्यक्षस्य यल्लक्षणमिंद्रियार्थसं
न्निकर्षोत्पन्नत्वं तन्नोपपद्यते समग्रवचनात् - अयमर्थः प्रत्यक्षस्य कारणघटितं लक्षणमभिहितं तच्च कारण
कलापघटितायाः सामग्र्या विनिवेशेऽतिव्याप्तिमान् अतः सकं तच्च नाभिहितं समग्रं इंद्रियार्थसन्निकर्षजन्यत्वमा
त्रमभिहितं - आत्ममनःसंयोगेंद्रियमनःसंयोगादिकं तु नाभिहितं तथा चात्मनःसंयोगरूपेंद्रियार्थसंयोगज
न्यतयानुमित्यादावतिव्याप्तिरिति भावः नन्वात्ममनोयोगादेः कारणत्वमेव नास्तीत्याशंकायामाह नात्म
मनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः। शरीरावच्छिन्नस्यात्मनो मनसा यः सन्निकर्षस्तदभावेन प्रत्यक्षोत्पत्ति
र्यतोऽत्र आत्ममनःसंयोगस्य कारणत्वमावश्यकं प्रत्यक्षोत्पत्ताविति [struck out] प्रकृतज्ञा
नोत्पत्तिरिति विवक्षितं - नन्वेवं दिग्देशादीनामपि कारणत्वं स्यादित्याशंकते। दिग्देशकालाकाशेष्वप्येवं प्र
संगः। यथाकथंचित्पौर्वापर्यस्यात्रापि सत्त्वात्तेषामन्यथासिद्धिः [illegible] प्रकृतेप्येवं - अनोत्तरमभिधातुमा

२३

४ स्य कुतो नासमवायिकारणत्वमित्यतो मनसः प्राधान्ये युक्तिमाह ॥ तदयौगपद्यत्वान्मनसः ॥ ॥ ज्ञानयरोध इत्यनुवर्तते इंद्रियमनोः

योग = ४

न १ न १

हा ज्ञानलिंगत्वादात्मनो नार्थवरोधः। आत्मनोर्थवरोधोऽसंग्रहः कारणत्वेनेति न कुतः ज्ञानलिंगत्वात्. ज्ञानं लिंगं य
स्य तत्तथा ज्ञानं ह्यभावकार्यं समवायिकारणं साधयति तच्च परिशेषादात्मैव बुद्ध्यादीनां च कारणत्वेन मान
मिति भावः इत्थं च समवायिकारणस्यात्मनो मनसा संयोगो समवायिकारणमित्यप्यर्थात्सिद्धं आत्मशरी
रादिसंयोगे ह्यात्मज्ञानयौगपद्यनियामकत्वान्मनसोऽपि हेतुत्वमावश्यकमिति शरीरेणायोगोऽस्त्वनतत्वनियाम
कत्वमिति भावः। इत्थं चात्ममनःसंयोगस्यासमवायिकारणत्वं युक्तं। सिद्धांतसूत्रे. प्रत्यक्षनिमित्तत्वाच्चेंद्रिया
र्थयोः संनिकर्षस्य पृथग्वचनं। प्रत्यक्षानिमित्तत्वात् प्रत्यक्षासाधारणकारणत्वात्. अयमर्थः। प्रत्यक्षसूत्रे
इंद्रियार्थसंनिकर्षाभिधानं हि न कारणाभिधित्सया येनात्ममनःसंयोगाद्यनभिधानेन न्यूनत्वमपि तु ल
क्षणाभिप्रायेण तच्च सामग्रीघटितस्यैवासाधारणकारणघटितस्यापि लक्षणस्य सुवचत्वादिंद्रिया
र्थसन्निकर्षस्यासाधारणत्वात्पृथग्वचनं. आत्ममनःसंयोगादेरसाधारणकारणत्वावच्छिन्नघट
लक्षणाघटकतया वचनं युक्तं अयं भावः। इंद्रियार्थसंनिकर्षत्वावच्छिन्नकारणतानिरूपितयौगिककार्यता
शालित्वस्येंद्रियत्वावच्छिन्नकारणतानिरूपितयौगिककार्यताशालित्वस्य वा लक्षणस्य सम्यक्त्वे कृतमा
त्ममनोयोगाद्यनुप्रवेशेनेति परिष्कृतं चेदसमधत्ताव. इदं न सूत्रं किंतु भाष्यमिति केचित्. समाधानांतरमाह।

म ४

२५

सुप्तव्यासक्तमनसां चेंद्रियार्थयोः सन्निकर्षनिमित्तत्वात् ज्ञानस्यातिशेषः सुप्तानां व्यासक्तमनसां च घन
गर्जितादिना श्रोत्रसंनिकर्षाद्वन्यादिना त्वक्संनिकर्षाच्च द्रागेव ज्ञानोत्पत्तेरिंद्रियार्थसंनिकर्षस्य प्राधान्यं
युक्तमंतरमाह तैश्चापदेश्या ज्ञानविशेषाणां ज्ञानविशेषाणां तैरिंद्रियार्थसंनिकर्षैरपदेश्यो विशेषणं व्याहत
आत्ममनोयोगादिकं हि न व्यावर्तकं तज्जन्यत्वस्य ज्ञानांतरसाधारण्यात् एवमिंद्रियमनोयोगजन्यत्वम
पि न लक्षणं मानसेऽव्याप्तेः परंतु तैरिंद्रियैर्ज्ञानविशेषाणां प्रत्यक्षविशेषाणां व्यपदेशो भाषणं यतस्तेनेंद्रि
यार्थसंनिकर्षस्य प्राधान्यं भाषते हि चाक्षुषं प्रत्यक्षं श्रौत्रं प्रत्यक्षमि[illegible]त्याद्युः नव्यास्तु प्रत्यक्षविशेषाणा
मिंद्रियैर्व्यपदेशो यतोतश्चाक्षुषादिघटितविशेषलक्षणान्यपि संभवंति चाक्षुषवृत्त्यनुमित्यवृत्तिजातिम
त्त्वादीनि लक्षणानि तथाप्यपि द्रष्टव्यानि तत्राशयं वर्णयंति इंद्रियार्थसंनिकर्षो न हेतुरन्वयव्यभिचारादि
त्याशयेन शंकते व्याहतत्वाद्धेतुः गीतश्रवणादिकाले च क्षुधर्दसंयोगादेर्विद्यमानेपि घ्राणसुषादेर्व्याहत
त्वेपि इंद्रियार्थसंयोगो न हेतुरित्यर्थः समाधत्ते नार्थविशेषप्राधान्यात् अर्थविशेषस्य गीतादेः प्राबल्या
त् बुभुत्सितत्वात् गीतादिश्रवणानंतरं च गीतशुश्रूषादेश्चाक्षुषादिप्रतिबंधकत्वात्प्रतिबंधकाभावस्य च का
र्योजकत्वात् सहकारिणा चेंद्रियार्थसंनिकर्षस्य हेतुत्वमतः पूर्वपक्षो न युक्त इति परंतु इंद्रियार्थसंनिकर्ष

स८

एम०
४८

= इंद्रियमनोयोगादेरहेतुत्वमिति भ्रांतः शंकते ॥ व्याहतत्वादहेतुः ॥ इंद्रियार्थसन्निकर्षस्यैव हेतुत्वमित्यनयोर्हेतुहेतुकः सनयु=
क्तः व्याहतत्वात् ॥ १ = ५ शग्रहणाल्लकलिंगज्ञानजन्यत्वात् दृष्टादिज्ञानमनुमितिरित्यर्थः। वृक्षादिप्रत्यक्षनिषेधोपि न प्रत्यक्षमात्रनि
षेधः। नदे
कदे ५ =

स्यहेतुत्वमित्यतैरिंद्रियमनोयोगादेर्हेतुतायाअभ्युपगमात्तद्व्याघातापत्तेः। भ्रमं खंडयति नार्थविशेषप्राबल्या
त्। नास्ति व्याघातः कुतः अर्थविशेषस्येंद्रियार्थस्य प्राबल्यात् प्राधान्यात्। तथा चेंद्रियार्थसंनिकर्षप्राधान्या
र्थं हि पूर्वमुक्तं न त्वितरनिषेधार्थमिति। ननु सति प्रत्यक्षस्य प्रमाणांतरत्वे तल्लक्षणपरीक्षा संगच्छेत तदे
व तु नास्तीत्याशंकते। प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः। प्रत्यक्षत्वेनाभिमतं घटादिज्ञानमनुमा
नमनुमितिरेकदेशस्य पुरोभागस्य ग्रहणादुपलब्धेस्तथा चैकदेशस्य प्रत्यक्षस्याभ्युपगमादिति समाधत्ते। ति ५
न प्रत्यक्षेण यावत्तावदप्युपलंभात्। प्रत्यक्षमनुमानस्यैमिति न प्रत्यक्षत्वावच्छेदेनानुमितित्वं नेत्यर्थः। या
वत्तावदप्युपलंभात् यावत्तावतोपि यस्य कस्यचिद्भागस्य प्रत्यक्षेणेंद्रियेणोपलंभात् उपलंभस्य त्वया
प्यभ्युपगमात्। इदमुपलक्षणं। शब्दगंधादिप्रत्यक्षस्यावारणान्न प्रत्यक्षमात्रनिषेध इत्यपि बोध्यं। प
ति ४ रपि [illegible] वृक्षादिज्ञानस्यानुमितित्वमितरदपि दूषयति ॥ ॥ न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ॥ न च वि ४
न चेत्यर्थः न चैकदेशस्यैवोपलब्धिरित्यपि युक्तं अवयविसद्भावात्। यतो ह्यवयव्यस्ति अतस्तस्य यावदप्र
त्यक्षकालेऽवयविसद्भावात्। D विनापि प्रत्यक्षं न व्याहतं तेनापि सह चक्षुः [illegible] संयोगादिसत्वादिति भावः
॥ ॥ समाप्तं प्रत्यक्षपरीक्षाप्रकरणं ॥ ॥ अवयविसद्भावादिति हेतुसाधनायोपोद्घातसंगत्यावयविप्र

स्वा४

२५

४ रकैला

कारणमारभते॥॥ साध्यत्वादवयविसिद्धेरहेतुः साध्यत्वादिति यथा शुतन्तुर्न संगच्छेते वन्ध्या हेत्वसिद्धा
त्तन्मात्रसमर्थः अवयवविनि साध्यत्वाद सिद्धेर्व्याप्त्यसिद्धत्वात्सिद्धेः हेतोः अवयवविसिद्धावाहितत्वा अहेतोः तत्त्वाच सं
दिग्धासिद्धो हेतुरित्यर्थः तत्र च वस्त्रस्पर्शवलं वा अणुत्वमात्रं न वेत्या [illegible] दि [illegible] विप्रतिपत्तयः तत्र च
सकंपाकंपत्वात् कल्पनां तत्त्वानावृतत्वात् हिलसणो [illegible] विरुद्धधर्माध्यासादेकोवयवी न संभवति त
थाहि शाखावच्छेदेन कंपो मूलावच्छेदेन तदभावो व्युपलभ्यते नचैकस्मिन्नेव द्रव्ये एक द्वधर्माध्या
सोहि देव विरुद्धधर्मद्वयसमावेशः संभवतीति तस्मादवयवा एव तथा भूतानन्योवयवी मानाभावा
त् महारजनारक्तैकदेशस्यापि शुक्लस्य रक्तावच्छेदेनारक्तत्वोपलंभादेवमावृतत्वेष्टादेवृतानावृतत्वोपलं
भादेवमेयमितिवोद्धुं नायदर्शपक्षः अत्र च यो हि नाप्यदर्शपक्षः समवायात् [illegible] लिखितानि च वि

तानि

ल [illegible] मपास्तलिख्यन्ते सिद्धान्तसूत्रे॥॥ सर्वाग्रहणमवयव्यसिद्धेः॥॥ अवयवविनोहि हेतौ तदुणकर्मादीनाम
वैषामग्रहणात्तथा च सकंपाकंपत्वात् [illegible] न्नावृतानावृतत्वादिकमपि नास्ति ग्रहे परमाणुगतत्वात् [illegible]
नुलानतहेत्वंतरमाह॥॥ धारणाकर्षणोपपत्तेश्च॥॥ अत्र यवेभ्यो व्यतिरिच्यते न यासति धारणा

एम०

कर्षणे [illegible] पपत्तेस्तथा परमाणुपुंजत्वे एकदेशधारणे न सकलधारणमेकदेशाकर्षणेन सकलाक

२८

नं ५

घर्षणं च न स्यादिति सर्थः । इदमवद्यं । नौकाकर्षणेन नौकास्याकर्षणवत् कुंडधारणेन कुंडस्य दधिधारणं संभ
वत्युपपत्तेर्विजातीयसंयोगबलेनैवावयवावयविभावेप्युपपत्तेरतः एवं तं युक्तिमेव समाधीयसीमन्त्रमा
नत्वेत्यपरे ॥ समाधानमाशंक्य दूषयति ॥ सेनावनादिवदिति चेन्नातीन्द्रियत्वात् कारणानां ॥ अति
हरस्यैकमनुष्यैकवृक्षादेरप्रसक्तत्वेपि सेनावनादिप्रसक्तेर्वदेकपरमाणोरप्रसक्तत्वेपि तत्समूहरूपघट
देः प्रसक्तेः स्यादिति चेद् दूषयति । अणूनामतीन्द्रियत्वात् प्रसक्तेर्महत्त्वस्य हेतुत्वात् तत्त्वाभावनादि
प्रसक्तेर्मुख्यते अल्पाणूनां महत्त्वाभावादिति भावः ॥ समाप्तमवयविपरीक्षाप्रकरणं ॥ अवसरेणाक्रमप्रा
प्तमनुमानं परीक्षितुं पूर्वपक्षयति ॥ रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणं ॥ अनुमा
नस्य त्रैविध्यं पूर्वमुक्तं तत्र त्रिविधस्याप्यप्रामाण्यं साधितं अनुमानमप्रमाणं व्यभिचारित्वात् सिद्धमिति शयेनेदं अ
नुमानं । अनुमानत्वेनाभिमतं न प्रमाणं प्रमितिकरणत्वव्यभिचारि व्यभिचारिहेतुकत्वात् । तत्र त्रिवि
धव्यभिचारं दर्शयति । रोधे सत्यपि नानदीवृद्ध्या पिपीलिकांडसंचारेण मयूररुतेन च वृष्ट्यनुमानं त्रिविध
मुदाहरणं न सम्भवति । नदी रोधाधीन नदीवृद्ध्या आश्रयोपघाताधीनपिपीलिकांडसंचारेण मनुष्यकृते
न मयूररुतसदृशरुतेन व्यभिचारात् । पिपीलिकांडसंचारस्य वृष्टिहेतुत्वाभिप्रायेणेदं । अथ बालक्षणम्

त्रेपूर्ववत् पूर्वकालीनसाध्यानुमापकं शेषवत् उत्तरकालीनसाध्यानुमापकं सामान्यतोदृष्टं विद्यमानसा
ध्यस्याप्यनुमापकमिति समर्थ इत्याशयः ॥ एतेन त्रैकालिकसाध्यानुमापकत्वं संभवति परन्तु पिपीलि
काण्डसंचारेणास्येतोऽयमनुमानेन तत्सम्भवमहास्य तत्वोऽभानुमानं तस्माद्वृष्टिहेतुत्वान्नूतं वृष्टस्यानुमानमिति व
इति एवमन्यत्रापि व्यभिचारशंका संभवात् व्यभिचारेण अस्य यस्यानुमितिहेतोरेव दुर्लभत्वात् तस्मात्सामान्यप
नत्संभवतीत्याशयः समाधत्ते ॥ नैकदेशत्रासमारूप्येभ्यो र्थान्तरभावात् ॥ अनुमानां प्रामाण्यं न युक्तं
एकदेशत्रासोद्भवनं न हीदृक्त्वास्मन् पिपीलिकाण्डसंचारादिरूपं तस्य दृश्यत्वात् बलिग्गीभूतानां न हीदृशा
हीनामिन्नत्वाद्वृष्टेः नवा सर्वत्र व्यभिचारशंका सर्वत्रावतत्स्यान्तर्कैर्णनतदयनपर्यात्रदोष इत्याशयः ॥ न
मामम अनुमानस्य त्रैकाल्याग्रहणात् ॥ अनुमानस्य त्रिकालविषयत्वमभिमतं तत्र युक्तं वर्तमानाभावेन तद
दधीनत्वात् अनयोरतीतानागतयोरभावेन कालत्रयात्मकविषयाभावादित्याशयेन वर्तमानपरीक्षाप्रक
रणमारभमाणो वर्तमानमाक्षिपति ॥ वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ न वर्तमानाभा
वः अतीतानागतमिति त्रैकालत्वाभावः उत्पादयति पततः इति पततः फलादेः वृन्तादधिकः कश्चन देशः
पतितः ध्वान्म्यपृथिवीकः कश्चन पतितव्यः ध्वानं तु वर्तमानस्य प्रसंगोपीति भावः समाधत्ते ॥ नयो

तं ३

३२

प्यभावो यं पर्त्तमानाभावेन दृष्टत्वात् ॥ ॥ वर्त्तमानाभावे तयोरतीतानागतयोरप्यभावः स्यात्तयो
त वर्त्तमानध्वंसप्रतियोगित्वलक्षणातीतत्वं वर्त्तमानप्रागभावप्रतियोगित्वलक्षणानागतत्वमिति भावः । ननु तयो-
पेक्ष्य एव सिद्धिर्न वर्त्तमानापेक्षेत्यत आह ॥ अतीतानागतयोरितरेतरापेक्षासिद्धिः ॥ ॥ अन्योन्याश्रय
दिति भावः । तयोरप्यभावे कारणान्तरमाह ॥ वर्त्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ॥ वर्त्तमानाभा
वे प्रत्यक्षमेव न ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरेषां ॥ अत एवाह संवेदं वर्त्तमाने च गृह्यते चक्षुरा
दिनेति प्रत्यक्षाभावे च सर्वमेव ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरज्ञानानामिति भावः । ननु यदि वर्त्त
मानध्वंसप्रतियोगित्वमतीतत्वं वर्त्तमानप्रागभावप्रतियोगित्वं भविष्यत्वं तदा वर्त्तमान एव घटे कथं श्याम
आसीद्रक्तो भविष्यतीति धीरित्यत आह ॥ ॥ कृतताकर्त्तव्यताप्रागभावप्रतियोगित्वभविष्यत्वेन च वर्त्तमानानु
यतोपपत्तेरुभयथा ग्रहणं ॥ ॥ वर्त्तमानस्यापि घटादेः श्यामरक्तरूपादीनां कृतताकर्त्तव्यतयोरतीतत्वभ
विष्यत्वयोरुपपत्तेर्घटश्यामादेरप्यतीतानागतत्वव्यवहारः पाकप्रागभावध्वंसावधिरित्यर्थः ॥ ॥ समाप्तं वर्त्तमानपरीक्षा
प्रकरणं ॥ ॥ अथ यथावत्प्रत्येकमप्रामाण्यमुपमानपरीक्षितं तद्वदुपपत्ति ॥ ॥ अत्यन्तप्रायैकदेशसाधर्म्यादुपमाना
सिद्धिः ॥ ॥ प्रसिद्धसाधर्म्यादुपमानमुक्तं न च तदुक्तं यतः साधर्म्यमात्यन्तिकं प्रायिकमैकदेशिकं वा न संभवति न

भा३४

२३ नरु

हि आसंनिकृष्टसाधर्म्यज्ञानोपि रस्युपमानं भवतीति · ननु न्यापि विकृष्टसाधर्म्यज्ञानो गौरिव महिषइति · न नायं कंचित्साध
र्म्यज्ञानमेकरिव सर्षपइति साधर्म्यस्य चोपलक्षणत्वात् वैधर्म्योपमानमप्येवं रवेदनीयं · समाधत्ते ॥ प्रसिद्धसा
धर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ प्रसिद्धप्रकर्षेणात्महिद्यादिर्यथा दृष्टान्तासिद्धेस्तेन साधर्म्येण ज्ञा
नस्योपमितिकरणत्वान्नदोषः साधर्म्यं च प्रकरणेन ह्यनुमानात्किंचिल्लिंगविशिष्टमिति अनुमानेन वा रितार्थं नोपमा
नेमानान्तरमिति विशेषिकमतमाशंकते · प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ प्रत्यक्षेणागोसारूप्यविशेषेणाप्र
त्यक्षस्य गवयपदवाच्यत्वस्यानुमितेर्नोपमानं प्रमाणान्तरमिति अत्रोत्तरमाह ॥ नाप्रत्यक्षे गवये प्रमाणार्थमुप
मानस्य पश्याम ॥ अप्रत्यक्षे · व्याप्यवत्तयाऽप्रत्यक्षे · अनुमानत्वेन प्रमाणार्थं पश्यामः · उपमानन्तु सोऽप्रमाणोऽनु
मानत्वेन न पश्यामइत्यर्थः व्याप्तिज्ञानाभावादिति भावः ननु व्याप्तिज्ञानानियमः कथमन्यतापि सा शपेनचेतां ते
रमाह ॥ तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ अनुमानादुपमानस्य नाविशेषः तथेत्युपसंहारात्तथ
था गोस्तथा गवय इति ज्ञानादुपमानसिद्धेरुपमानाधीनसिद्धेरुपमितेः तथा च व्याप्तिज्ञानानपेक्षणात्मा दृश्यज्ञानाधी
नोपमितिरित्यनुभवसिद्धं · किं च नानुमिनोमि किं तूपमिनोमीत्यनुव्यवसायप्रसिद्धोपमितिर्नोपलपितुं शक्या
त इत्याशयः ॥ समाख्यानमुपमानं प्राप्यार्थं पदपदार्थयोः प्राप्तत्करणं ॥ कथमप्रसंगशब्दं पदार्थ्यत्वं पपत्तेरिति ॥ श

६६ २७

एम०

६ प्रमाण प्रयोजनं उपमानस्य न पश्याम इत्यर्थः ॥ अथ वा गा
च यथा गवयं यो गौ अप्रत्यक्षेण गवयपदवाच्यत्वे उपमानस्य प्रामा

ब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ शब्दोऽनुमानं भिन्नस्य शाब्दबोधोऽनुमितिरितिपर्यवसितार्थं लक्ष्या
वशेषः शब्दो लिङ्गविधयानुमितिकरणं · अर्थस्य शब्दप्रतिपाद्यस्यानुपलब्धेरप्रत्यक्षत्वात् अनुमेयत्वादिति त
था च शाब्दज्ञानमनुमितिरप्रत्यक्षविषयत्वात् प्रत्यक्षभिन्नत्वाद्वेत्यत्र तात्पर्यं ॥ हेत्वन्तरमाह ॥ उपलब्धेरद्विप्र
वृत्तित्वात् · उपलब्धेः शब्दत्वेनाभिमतायाः अनुमितित्वेनाभिमतायाश्चाद्विप्रवृत्तित्वात् अद्विप्रकारत्वात् अनु
मितित्वं शाब्दत्वं च न जातिः हृपशब्दस्य लिङ्गविधया बोधकत्वात् लिङ्गजज्ञानवद्द्विजातीयत्वात् अद्विप्रकारकत्वा
त् ॥ संबंधाच्च ॥ संबंधान्नियतसंबंधाज्ज्ञापकादिति शेषः शब्दो हि व्याप्तिग्रहमपेक्ष्य बोधयति तेन शाब्द
बोधोऽनुमितिरिति भावः । सिद्धान्तसूत्रे आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः ॥ आप्तस्याश्रमादि
शून्यस्य य उपदेशः शब्दस्तत्प्रयत्नात् मर्थ्यं आकांक्षायोग्यतादिमत्त्वं तत्र · अथवा आप्तस्य संयदुपदेश
सामर्थ्यं आकांक्षादिमत्त्वं न तत्त्वं हकाराणं साधारणस्वादि निर्दिष्टं शब्दत्वं व्याप्तिनिरूपेक्षाद्याकांक्षादि
भाव· शब्दार्थयोः शाब्दबोधः संभवतीति नानुमानान्तर्भावः शब्दस्य संबंधः शब्दार्थयोः संबंधानुमितत्वानुमिता
त्वनुभवादिति भावः शब्दार्थयोः संबंधाभावमित्याह ॥ पूरणप्रदाहपाटनानुपपत्तेश्च संबंधाभावः
॥ शब्देन सहार्थस्य संबंधाभावः व्याप्त्यभावः हेतुमाह पूरणेति · यदि शब्देनार्थस्य व्याप्तिः स्यात् तदान्नाग्नि

पा ४
भा ५

नार्थे संप्रत्ययः ४ अ १

२८

रामी शब्दे मुखस्य पूरणामुखदाहमुखे पाटनानि स्युः शब्दस्य व्याप्यस्य सत्वेनानुमानादर्थस्याप्राप्तिसत्वात् न त्विति शब्दो
स्ववृत्तमेवार्थं प्रत्याययतीति व्याप्ततेति प्रसंगाद्रत्ताशंकतो ॥ ॥ शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ॥ अप्रतिषेधः ॥ ॥
(अप्रतिषेधः) शब्दार्थयोः संबंधप्रतिषेधानं शब्दार्थयोर्व्यवस्थितत्वात् कश्चिदेव हि शब्दः कंचिदेवार्थं बोधयति
न सर्वः सर्वमिति इत्यर्थसंबंधे वृत्तिमुक्तेन संबंधेन व्याप्तिरवाप्यकोविद्यसंबंधीनमुखस्य पूरणादिनियामक इति
भावः ॥३॥ उत्तरयति ॥ ॥ न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य ॥ ॥ सम्भवेऽपि शब्दार्थयोर्व्यवस्थानस्य शक्त्यधीनत्वात् शब्दार्थसं
प्रत्ययस्य सामयिकत्वात् शक्तिग्रहाधीनत्वात् शक्तिसंबंधेन न च व्याप्तिस्तत्प्रवृत्तिनियामकः संबंधाधीनत्वा
दिति भावः ॥ ॥ जातिविशेषे चानियमात् ॥ ॥ शब्दस्यार्थेन सह स्वाभाविकः संबंधः जातिविशेषे अनियमात्
तस्यानियतार्थकत्वदर्शनात् आर्या हि यवशब्दं दीर्घशूकविशेषे प्रतियंति म्लेच्छास्तु कंगुमिति नियमेतु सर्वः स
र्वं प्रतीयात् आपाततस्त्वेदं नानाकृत्वापि पुत्रेष्टिश्रुतिवहुत्तरत्र दर्शितस्थितेः ॥ ॥ समाप्ते शब्दस्याप्रामाण्य
शंकामवतारयति ॥ ॥ शब्दस्य दृष्टादृष्टार्थकत्वेन द्वैविध्यमुक्तं तत्र वादः दृष्टार्थकशब्दस्य वेदस्याप्रामाण्यं परीक्षितुं
पूर्वपक्षयति ॥ ॥ तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ ॥ तस्य दृष्टार्थकत्वाति कशब्दस्य वेदस्याप्राम
ण्यं कुतः अनृतत्वादिदोषात् तत्र च पुत्रेष्टिकारी यो होक विफलत्वानुपलब्धिदर्शनादनृतत्वे व्याघातः पूर्वापरवि

नं ४

सो ५

न ६

एम०

शिष्टः यथाः उदितेजुहोति अनुदितेजुहोति समयाध्युषितेजुहोति श्यावोस्याहुतिमभ्यवहरति य उदितेजुहोति
शबलोस्याहुतिमभ्यवहरति योनुदितेजुहोति श्यावशबलावस्याहुतिमभ्यवहरतो यः समयाध्युषितेजुहोतीत्य
त्रचोदितानां वाक्यानां निंदानुमितानिष्टसाधनतावोधकत्वात्क्वचिद्विरोधः यो न हि तथा दृष्टान्तमेव यथा त्रिः प्र
थमामन्वाह त्रिरुत्तमामन्वाहेति सत्त्वोत्तमत्वमप्रथमत्वपर्यवसानात् त्रिः कृत्यनेन बाध्यते न हि तथं ते तेषामप्राप्त
तदृष्टांतेन तत्तद्देककर्तृकत्वेन तत्तदेककर्तृजातीयत्वेन वा सर्वं वेदानामप्रामाण्यं साधनीयमिति भावः सिद्धान्तसूत्रं ।।।। न कर्मक
र्तृसाधनवैगुण्यात् ।।।। न वेदानामप्रामाण्यं कर्मकर्तृसाधनवैगुण्यात् फलाभावोपपत्तेः कर्मणः क्रियायाः
वैगुण्यमयथाविधित्वादि कर्तुर्वैगुण्यमविद्वत्त्वादि साधनस्य हविरादेर्वैगुण्यमप्रोक्षितत्वादिः प्रयोक्त
कर्मणः फलाभावे दृष्टेन तत्त्वेन चैवमप्रामाण्यमिति भावः व्याघातपरिहारः ।।।। अभ्युपेत्य कालभेदे दोषवचनात्
।।।। न व्याघात इति शेषः अग्न्याधानकाले उदितहोमादिकमभ्युपेत्य स्वीकृत्यानुदितहोमादिकरणे दूषणो
क्तो दोषः कथं नात्र व्याघात इत्यर्थः यो न हि हृत्यं गी हर्ता ।।।। अनुवादोपपत्तेश्च ।।।। चः पुनरर्थे अनुवादोपप
त्तेः पुनः पुनः वाक्यं निष्प्रयोजनत्वे हि पौनरुक्त्यं दोषः उक्तस्थले त्वनुवादस्योपपत्तेः सप्रयोजनत्वसंभवात्
एकादशसामिधेनीनां प्रथमोत्तमयोः त्रिरभिधाने पंचदशत्वं संभवति तथा च पंचदशत्वं दृष्ट्वानेः इममहं भ्रा

गौ०२०
२९

तत्स्वयं पंचदशावरेणावाप्तेनावबाधे: योऽस्मान्नृषिभिर्येच्चर्ययं हिष्यादिति · अनुवादस्य सार्थकत्वेलोकसिद्धमित्या
हृ ॥॥ वाक्यविभागस्य चार्थग्रहणात् ॥ वाक्यविभागस्यानुवादत्वेन विभक्तवाक्यस्यार्थग्रहणात्स्वयोजन लौका
रात् · श्रिष्टे रितिशेषः शिष्टाहि विधायकानुवादकादिभेदेन वाक्यं विभज्यानुवादकस्यासिद्धमर्पयोजनत्वमन्यंते
वेदेष्वेवमिति मावः ॥॥ वेदे वाक्यविभागे हेतुर्दर्शयति ॥॥ विध्यर्थवादानुवादवचनविनियोगान्मेत्रब्राह्मणा
मर्हृद्धि विधौ वेदस्तत्र ब्राह्मणस्य सार्थविभागः ॥॥ विधिवचनत्वेनाऽर्थवादस्ववचनत्वेनानुवादस्ववचनत्वेन च वे
दस्य विनियोगात् · विभजनात् · अथ वा · विनियोगात् भेदात् · तथा च विध्यादिभेदाद्धेतुस्स्वरूपाभागस्य सिद्धमिति
शेषः · तत्र विधिलक्षणमाह ॥॥ विधिर्विधायकः · इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यं विधिरित्य
हो तेनेतुक्तः प्राशस्त्यगीकारमहस्याहि · अर्थवादः · अर्थस्य प्रयोजनस्य वदनं · विध्यर्थप्रशंसापरं वचनमित्यर्थः ·
अर्थवादो हि स्तुत्यादिद्वारा विध्यर्थशीघ्रप्रवृत्तये प्रशंसति · तत्र स्तुत्यादिभेदादर्थवादं विभजते ॥॥ स्तुति
र्निन्दा परकृतिः पुराकल्पः इत्यर्थवादः ॥॥ स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसा साधकैर्वाक्यैः · यथा सर्वजिता वै देवाः
सर्वमजयन् सर्वस्या ॥॥ प्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयतीत्यादि · अनिष्टबोधनद्वारा विध्यर्थ
प्रवर्त्तके निन्दा · एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते स गर्तपत्यमेव तज्जी

एम०
२९

पुनेतप्रवामीयलर्कृत्वादित्युक्तविशेषनिष्ठमित्योविरुद्धकथनं परस्तिर्युक्तविशेषनिष्ठमित्योविरुद्धकथनं पराहे
ति यथा कृत्वा पूर्वामेवाग्निमिधारयंस्तथा तथोर्षदास्येतद्रुह्यचरकाध्वर्यवः एवतदास्तमेवाग्निमिधारयंस्तथा: प्राणा: एव
दास्तमिस्तमिद्धतीत्वहि: एतन्नित्य: समाप्तिरिति तथा कीर्त्तनं यदुक्तम्: यथान्वम्माहृ एतेनपुत्राद्राह्ल ज्योतिहि
ष्यमान्नमामहसोममम्तोपरपद्ये एतनेनामहहस्यादि: अनुवादनप्रामाण्यम्॥ विधिविहितस्यानुवचनमनुवा
द:॥ प्रमाणस्यानुपश्चात्कथनेप्रयोजनमनुवादइति सामान्यलक्षणेनात्तद्विशेषो विधिविहितस्येति विध्यनुवा
दोविहितानुवादश्चेत्सर्थ: अथ यथार्थवादानुवादइति भागोविधिसमभिव्याहृतोवानस्यानोतनमुताथीर्वादइत्या
दानिवेहातनानवाक्यानामपरिग्रहात् प्रमतानां शङ्कते॥ नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः॥ श
ब्दाभ्यासस्य बोधितार्थकशब्दस्य सोऽभ्यासः पुनः प्रयोगस्तस्योपपत्तेः सत्वादनुवादः पुनरुक्तान्नभिद्यत इत्यर्थः स
माधत्ते॥ शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः॥ अनुवादस्य पुनरुक्तान्नाविशेषः अभ्यासात् अभ्या
सस्य सप्रयोजनत्वात् तत्र दृष्टान्तमाह शीघ्रेति यथा लोके गम्यतामितु लगाम्यतां गम्यतां गम्यतामित्या
दिकमविलंबादिबोधार्थमुच्यते तथा प्रकृतेपीति एवमप्रामाण्यसाधकंनिरस्य प्रामाण्यं साधयति॥ मं
त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्॥ आप्तस्य वेदकर्तुः प्रामाण्यात् यथा आप्तोपदेशके वा दृष्टस्य

५ अ

६४

अ॰ त्रे
३०

तदुक्तलमर्थात्तु लब्धं तेन हेतुना वेदस्याप्रामाण्यमनुमेयं। तत्र दृष्टान्तमाह मन्त्रायुर्वेदवदिति। मन्त्रो विषादिनाशकः
आयुर्वेदश्चारोग्यादिवेदस्यैव तत्तत्र संवादेन प्रामाण्यग्रहात्तद्दृष्टान्तेन वेदत्वावच्छेदेन प्रामाण्यमनुमेयं। आगमग्रहीतप्रा
माण्यपत्र संवेदस्था दृष्टान्ते वेदत्वेन प्रामाण्यमनुमेयमिति केचित् ॥श॥ समासे शक्तिविशेषपरीक्षाप्रकरणं॥
॥इति विश्वनाथ भट्टाचार्यकृतायां तत्त्वचिन्तामणे विभागपरीक्षानिरपेक्षसंज्ञसमासानां वृत्तिज्ञानां नाम सहितीयस्याप
माह्निकं॥ अथ विभागसापेक्षसमासानां परीक्षणं तदेव चाह्निकार्थः। चत्वारि चात्र प्रकरणानि। तत्राद्ये वतु
हुव्रीहिप्रकरणं। समासाश्च तत्र तत्र वर्णिते। तत्राद्ये १ सूत्रं॥ न च तत्पुरुषेति तस्यार्थ्य प्रतिसंभवाभावस्मा
माराणात्॥ समासानां नानवतत्पुरुष समासानां लेनोक्तचतुष्कान्सतमलब्धान्प्यमुत्तान्सर्वनित्यान्त। तत्राम
वृत्तित्वे तुल्यादयति। ऐतिह्येत्यादि। ऐतिह्ये इति हेतुमॆंऽस्यनैव प्रकारेण पदतुल्यैतद्धि- अविशिष्टसवक्तृके
परंपरागते वाक्यप्रवादे वेदेष्वष्टकादिप्रामाण्यमं[illegible] त्वादिष्वपात्रशब्दे तद्भावः इति भावः। अर्थापत्तिरनुप
पद्यमानेनार्थेनोपपादककल्पनं। पश्यावश्यामेव दृष्टानेव ब्रूहाद मे पश्यैव धिक् एषा त्रव्याप्तिरिति नानु
मानेन तद्भावः। संभवो नाम संभवो भूयः सहस्राणधीनत्वानं पश्या संभवति यथा सहस्रे विधा। संभवति सहस्रे शतं
चात्र च व्याप्तिर्नीयपश्चिते साशयः। अभाव स्तु विरोधमात्रज्ञानाधीनविरोधं तात्कल्पनं। पश्यानकुलाभा

६
२
एम॰
३०

वृत्तान्तेन नकुलविरोधिनो व्यालस्य कंपने- अत्रापि नासिनीपक्षिते साशयः अथवा कारणाभावादिनाका
र्याभावादिज्ञाने- अभाव- भावविशिष्टव्याप्तिरेवानुमानांगमित्याशयः सिद्धान्तसूत्रे।। शब्दइति त्वानर्था
न्तरभावादनुमानेर्थापत्तिसंभवाभावानामर्थान्तरभावात्प्रतिषेधः।। नप्रमाणं वनुच्छ्रुसप्रतिषेधः
शब्दइति त्वप्रमाणं नर्थान्तरभावादंतर्भावात् प्रमाणत्वात् आप्तोक्तत्वान्नसंभवादुक्तमाप्तोक्तत्वानेव
शब्दे कारणे किंलाकोप्पारिज्ञाने योग्यताप्रमाधीनाच शब्दप्रमेति अर्थापत्तेर्हि अनुमानेन्तर्भावः उपपा
दककल्पनेहि विनाव्याप्तिज्ञानेन न संभवति- व्याप्तिस्तु ग्रहावपिमेघवृष्ट्यलव्याप्तिरस्त्येव- संभवोपिव्याप्तिम
त्वकत्वादनुमानेव्याप्यमानपक्षितेव व्यभिचारादप्रमाणं एवमभावो व्याप्तिसापेक्षो नुमानं- अभाव
विशिष्टव्याप्तिग्रहानुमानांगत्वेनाविरोधादृतिभाव- सस्यर्थापत्तेः प्रमाणं एवहि भावान्तर्भाव [illegible]र्थापत्ति चिंता
न देवदत्तो नास्तीति तटस्थः शंकते।।।। अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्।।।। असतिमेघवृष्टिर्न भवतीस
नेनसतिमेघवृष्टिर्भवतीत्यर्थापत्तिविषयत्वं च वचनप्रामाण्ये सत्यपि मेघेवृष्ट्यभावादनैकान्तिकत्वात् प्रमा
धत्ते।।।। अनर्थापत्तावर्थापत्त्यभिधानात्।। ।। अर्थापत्तेनैकान्तिकत्वमितिशेषः असत्सुमेघेषुनवृ
ष्टिरित्यनेनसतिमेघेवृष्टिरिति तत्र चवृष्ट्यामेघतान्तस्य भिमतं- पत्रचमेघेनवृष्टिस्तान्तत्रान्थापत्तेः [illegible] नि

गो॰ त्र
२१

तिद्धान्तः असत्त्वमेवेष्टमुक्तमिति सिद्धान्तेन सति मुख्यो भ्रमः न चैतावता प्रामाण्ये विरोधः आप्ताप्ताद्भिन्नभ्रमादुत्पातु
मितिदर्शनात् तथा तस्याप्रामाण्यापत्तेः नानैकान्तिकत्वमर्थापत्तेरिति भाव्यं स्यात् वनात्राशेः कथं तत्रास्त्येके वि
ल्लिखेति प्रतिबन्दीमप्याह ॥ प्रतिपत्प्रामाण्ये चानैकान्तिकत्वात् ॥ तद्दुष्टत्वेऽपि सा लघीयसी निषेधस्याप्रामा
माण्ये स्यात् हेतेनैकान्तिकत्वात् यत्र कुत्रचिद् हेतेनैकान्तिकत्वस्य प्रतिपक्षासाधकत्वात् हेतेनैकान्तिकत्वात् अथ यत्र
कुत्रचिद् हेतेनैकान्तिकत्वं न दोषाय किन्तु स्वविषये इति यदि तदर्थापत्तेरपि तत्प्रामाण्यमित्याह ॥ तत्प्रामाण्ये
तानार्थापत्तेः प्रामाण्यं ॥ अनैकान्तिकत्वस्य स्वविषये साधकत्वाद्यदि स्वहेतोः प्रामाण्यं न स्यात् तेन हार्थापत्ते
रपि स्वविषये प्रामाण्यमिति अभावस्य न प्रमाणतो भूतभाव इति तत्र स्पष्टः शंकते ॥ नाभावप्रामाण्यं प्रमेयासि
द्धेः ॥ अभावनामकं प्रमाणान्तरं स्याद्यदि तस्य प्रमेयं सिद्धं न तदेव तु नास्ति अभावस्य तुच्छत्वान्न तत्प्रमा
णं प्रवर्तितमिति भावः ॥ सिद्धान्तयति ॥ लक्षितेष्वलक्षणेन लक्षितत्वाद्लक्षितानां तत्प्रमेयसिद्धेः ॥ त
त्प्रमेयसिद्धेः तस्याभावप्रमाणस्य प्रमेयसिद्धेः भावप्रधानो निर्देशः किं तत्प्रमेयसिद्धौ तत्राह लक्षितेष्विति
लक्षितेषु घटादिषु लक्षितानां तत्प्रमेयत्वसिद्धेः अलक्षितानां कथं प्रमेयसिद्धिरित्यलक्षणसिद्धेरलक्षणत
श्राहालक्षणेन लक्षितत्वादिति यथा यथा भावस्य गुणकर्मादिभिर्लक्षणान्तरं संभवति तथा तथालक्षणेनैवता

३१

अ २

हम॰

लक्षितं भवति । अनीलमानयेत्युक्ते नीलाभावो हि इतरा व्यावर्तकं यथा लक्षणमतो भावो नाप्रामाणिक इति भा-
वः । आक्षिप्य समाधत्ते ॥ असमर्थेनाभाववृत्तित्वेऽत्रास्मल्लक्षणोपपत्तेः ॥ असति प्रतियोगिप्रभावो न कु-
नेश्वरते प्रति च प्रतियोगिनि कथं न तदभाववृत्तित्वे चात्रास्मत्र लक्षणं न सत्त्वे नाप्यसति प्रतियोगिनः उपपद्यते ऽभावो-
पपत्तेः न हि तत्रैव प्रतियोगिनः सत्त्वमपेक्षितं शक्यते ॥ तन्निष्ठत्वे हेतुहेतुः ॥ लक्षिते षु लक्षणा-
स्य तन्निष्ठत्वं व्यावर्तकत्वसिद्धा लक्षिते स्वभावः च हेतुः अहेतुत्वं चाद्यस्य हेतुत्वे अभावस्य लक्षणाभावस्य
निः स्वरूपस्य न व्यावर्तकत्वमिति भावः । समाधत्ते ॥ न लक्षणावस्थितापेक्षासिद्धेः ॥ न पूर्वपक्षो नयु-
क्तः प्रतियोगिनो लक्षणस्य परत्र स्थितमवस्थानेन तस्यापेक्षापत्रता दृशा सिद्धेः असमर्थः प्रतियोगिस्वरू-
पत्वानां देवाभावस्वरूपनिरूपं संभवताभावलक्षणापेक्षेति भावः ॥ प्रागुत्पत्तेरभावोपपत्तेश्च ॥ अभे-
य सिद्धिरितिसूत्रक सुत्यानुवर्तते । प्रतियोगिन उत्पत्तेः प्राक् अभावस्योपपत्तेः उपलंभात् घटो भविष्यतीत्या-
दि प्रागभावविषयकप्रतीत्यस्य सार्वलौकिकत्वादिति भावः । चकारेण ध्वंसादेरपि प्रमसत्त्वे सिद्धत्वमनुच्चीय-
ते । चेष्टापतिव्यापारत्वेन न प्रमाणत्वं वस्तुतो लिप्यादिवत्सांकेतिकत्वात् तस्याप्यनुमाने शब्दे वान्तर्भाव इ-
ति ॥ प्रमाणसंप्रमाणचतुष्प्रकरणं ॥ वेदस्य प्रामाण्यं मानप्रमाणमापाक्षिद्धं न चैवं युज्यते वेदस्यानित्यत्वादि-

णे ३

ण

प्र

लौकिकप्रत्यक्षविशे ४

गौ॰ त्र॰
३१
३४

स्याच्छंकायां वर्णो नाम नित्यत्वात्कथं तन्मुहूर्तायहृपस्य वेदस्य नित्यत्वमित्याशयेन शब्दानित्यत्वप्रकरणमा
रभते तत्र सिद्धान्तसूत्रं ॥ आदिमत्वादैंद्रियकत्वात्कृतकवदुपचाराच्च ॥ शब्दोऽनित्य इत्यादिः आदिमत्वा
त् सकारणकत्वात् ननु न सकारणकत्वेऽकृतत्वाद्वा घभिघाताद्ध्वंसजनकत्वेनाप्युपपत्तेरत आह । ऐंद्रियकत्वा
दिति सामान्यवत्वे सति बहिरिंद्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः परं तु ऐंद्रियकत्वे [illegible]
आहैंद्रियकत्वे सामान्यसमवाययोरस्तु नत्वेव्याप्तत्वे जातित्वादिना विशेषणत्वे भवतु भोजातित्वादित्यस्य
सत्वान्न व्यभिचारः मनस ऐंद्रियकत्वाभावाच्च नात्मनि व्यभिचारः आत्मन ऐंद्रियकत्वाभावाद्यूलाङ्कः अ
प्रयोजकत्वमाशंक्याह कृतकवदिति कृतके घटादौ यथोपचारो ह्रासनं तथैव कार्यत्वप्रकारकप्रत्यक्षविषयत्वा
दित्यर्थः तथा च कार्यत्वेनानाहार्यलौकिकप्रत्यक्षविषयत्वादनित्यमेवाभिधाति केघटो विनष्टः उपचारा
त् विनाशित्वात् कृतकवदिति दृष्टान्तः इति परं तु कृतकवदुपचारात् कृतके ह्रस्वत्वादिव्यवहारात्
याहि ह्रस्वत्वादेः तीव्रमन्दादिव्यवहारः शब्देऽपि केनतु नित्ये तथैषाङ्कः यथा श्रुते हेतुनो व्यभिचारमाशं
कते ॥ न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ॥ नो कारहेतवो घटाभावस्य घटध्वं
स नित्यत्वादविनाशित्वादादिमत्वं व्यभिचारि ऐंद्रियकत्वं सामान्ये व्यभिचारि नित्येष्वप्यनित्यवदुपचा

स्य१

ग्म॰
३२

अत्स्पृष्णं ३

णत्। यथा यदाकाशसमुत्पन्ने अहं सर्वज्ञानरसादिरिति व्यभिचारोऽपरिहर इति ॥ ॥ ननु भावाभावयोर्नानात्वं विभागादिति व्य-
भिचारः ॥ ॥ तत्त्वस्य पारमार्थिकस्य भावस्य च नानात्वस्य भेदस्य विभागात् विवेकात् तत्र व्यभिचारः ध्वंसे हि तत्स्व-
त्त्विमत्त्वे आदिमत्त्वे त्रैकालिकत्वरूपं नित्यत्वाभावरूपं वा नित्यत्वमस्ति वा विनाशित्वान्नित्यत्वमौपचारिकम् अतो
न व्यभिचारः आदिमत्त्वं प्रागभावावच्छिन्नसत्त्वं न चैतद्ध्वंस इति वार्थः द्वितीयव्यभिचारमुद्धरति ॥ ॥ सन्ता-
नानुमानविशेषणात् ॥ ॥ सन्तानस्यानुमानेनानुमितिकर्मत्वेऽपि लिङ्गविशेषणात् सन्तानः सन्तन्यमानः एकध-
र्मावच्छिन्नत्वेन ज्ञायमानस्तेन सामान्यवत्त्वे सतीति विशेषणशालीयं तृतीयव्यभिचारं वारयति ॥ ॥ कारणगु-
णस्याविशेषशब्देनाभिधानात् ॥ ॥ आकाशे हेतुर्नास्त्येव आकाशेऽप्यादिशिकत्वव्यवहारस्तु गौणः प्रदेश-
शब्दे न कारणगुणस्य कारणवतोऽन्यस्याभिधानान्न चाकाशनाशेनादृशत्वेनासाध्यसत्त्वान्न व्यभिचारः
एवं सर्वज्ञानातीन्द्रियस्यापि सर्वो युक्तिरेव विषय इति भावः नन्वेतौ हेतू नामप्रयोजकत्वं विपक्षबाधकत्वादि-
त्याह ॥ ॥ प्रागुच्चारणादनुपलम्भावावरणाद्यनुपलब्धेः ॥ ॥ शब्दो यदि नित्यः स्यात् उच्चारणात् प्रागप्युपल-
भ्येत श्रोत्रसन्निकर्षसत्त्वात् न चात्र प्रतिबन्धकमस्तीत्याह आवरणेति । आवरणादेः प्रतिबन्धकस्यानुपलब्ध्या-
ऽभावनिर्णयात् । देशान्तरगमनं तु शब्दस्यामूर्त्तत्वान्न सम्भाव्यते अतीन्द्रियानन्तप्रतिबन्धकत्वकल्पनामपेक्ष्य

गो.सू.
३३
33

यसी

शब्दानित्यत्वकस्य नैव लघीरिति भावः ॥ प्रांतस्य हृदये पक्षपरं सत्त्वतुर्यं ॥ न तदनुपलब्धेरनुपलंभादावरणोपल
ब्धेः ॥ अनुपलंभादनुपलब्धिसद्भाववच्चावरणानुपपत्तिरनुपलंभात् यथा त्वया आवरणस्यानुपल
ब्ध्या अभाव इत्युच्यते तथावरणानुपलब्धेरनुपलंभात् तदभाव आवरणोपलब्धिरेव स्यात् यदि वा आव
रणानुपलब्धेरनुपलंभेऽपि नावरणानुपलब्धेरभावस्तदावश्यं तस्यानुपलंभादपि नावरणस्यानुपपत्तिः सि
द्धांतसूत्रं ॥ अनुपलंभात्मकत्वादनुपलब्धेरहेतुः ॥ आवरणानुपलब्धेरनुपलंभादावरणोपलब्धिरि
ति ज्ञानसूत्रं अहेतुः न सम्मतमतिविषयसाधनं अनुपलब्धेरावरणानुपलब्धेरनुपलंभात्मकत्वादुपलं
भाभावात्मकत्वात्तस्य च मनसैव ग्रहणत्वात् तदनुपलब्धिरसिद्धेति भावः ॥ अन्यत्रापि पक्षमाशंकते ॥ अ
स्पर्शत्वात् ॥ [illegible] शब्दो नित्यः । अस्पर्शत्वात् गगनवदिति भावः । न सन्नतिपक्षस्तदीयहेतोरनैकांतिक
त्वादित्याह ॥ कर्मानित्यत्वात् ॥ अस्पर्शत्वेन शब्दनित्यत्वसाधकं कर्मणा व्यभिचारात् अनैकांतिकम
पि साधकं स्यादित्याह ॥ नाणुनित्यत्वात् ॥ अनैकांतिकस्य साधकत्वे अणोः परमाणोर्नित्यत्वेन स्पर्श
वत्त्वाद्धि नानित्यानित्यत्वात् उभयापत्तेरित्यर्थः शंकते ॥ संप्रदानात् ॥ गुरुणा शिष्याय विद्यायाः सं
प्रदानात् तत्र चावश्यं शब्दस्य मायातु सत्त्वं सिद्धं तथा च तावत्कालं स्थिरत्वेनैव कः पश्चात्त्राशयस्य नीति मायया त्रिस

छो ५

एगे०
३३

= अध्यापनात्॥ यद्यंतराले काले शब्दो न स्यात् कथमध्यापनं घटेत॥ अनुप ३

लभमर्थसिद्धमिति भावः॥५॥ सिद्धांतसूत्रं। तदंतरालानुपलब्धेरहेतुः॥६॥ शिष्ये उपसन्ने गुरुरध्यापयतीति यदि शि
ष्यो नित्यः स्यात्तदा शिष्यागमनानंतरमध्यापनात्पूर्वमपि शब्द उपलभ्येत तस्मादनुपलब्ध्या च नास्ति शब्द इत्यत
स्तदुक्तो न हेतुः। पूर्वपक्षसूत्रं॥७॥ अध्यापनादप्रतिषेधः॥८॥ प्रतिषिद्धे हेतोः प्रतिषेधो न युक्तः कुंभेनैव
नुपलब्ध्या चेन्नास्ति शब्द इत्यंतरालेऽदृष्टो न हेतुः। पूर्वपक्षसूत्रं॥॥ अध्यापने हि शब्दस्य कंठताल्वा
द्यभिघातात् व्यंजकाभावादनुपपद्यत इति भावः। आचार्यास्तु सूत्रद्वयमेवं व्याचक्षते विभक्तिव्यत्ययमाह
हेतोस्तदंतरालानुपलब्धेरर्थस्तथा च हेतोः स्वरूपाभावात् तदंतरालस्य सत्त्वे शब्दस्यानुपलब्धिर्लो
नहानमित्यर्थः प्रतिषेधो न युक्तः नहि दाने सममभिप्रेते किंत्वध्यापने तच्चाविद्यमानस्य शब्दस्येव तिष्ठाव
इति सिद्धांतसूत्रं॥॥ उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः॥॥ अन्यतरस्य पक्षस्य नित्यत्वसा
धकस्याध्यापनादप्रतिषेधः न संभवति उभयोः पक्षयोरध्यापनस्य समानत्वादिति शेषः। अध्याप
ने हि गुरूच्चारणानूच्चारणं शिष्योच्चारणानुकूलोच्चारणं वा तच्च शब्दस्य पक्षयोस्तुल्यं न शब्दनित्य
तायाः साहायकं विधातुमलं नत्वध्यापने दाने यत्नस्य तु लब्धं परत्वं पारंपर्येण नोपदेशः प्रमाणं कनीयं
वा संभवतीव द्रव्यादिकं दानादिविधानं परस्य दानासंभवात् तथापि तु न साध्यापनादि उपदेशमात्रमिति भा

गौ सू०

३६

३५

वः पूर्वपक्षसूत्रं ॥ अस्पर्शत्वात् ॥ यद्धि स्पर्शितं तदस्पर्शमानं दृष्टं यथाकाशं शब्दोऽस्पर्शवानित्येवं ज्ञात
द्रूहलोऽनुवाकमधीत इत्यस्पर्शस्य तैर्थ्यं ज्ञायतेति भावः उत्तरयति ॥ नान्यत्वेऽप्यभ्यासस्योपचारात् ॥ पू
र्वपक्षोऽनयुक्तः कुतः अन्यत्वे भेदेऽपि शब्दानामध्यापनाभ्यासस्योपचारात् संभवात् न त्वभ्यासस्थैर्यमाध
यति द्विर्नृत्यतीति त्रिर्नृत्यतीत्यादौ भेदेऽप्यभ्यासदर्शनादिति भावः ॥ अन्यतैव जगति नास्तीति कथमन्यत्वे
ऽभ्यासोपपत्तिरिति तदस्याशङ्कते ॥ अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ॥ यदि त्वन्मते

दृष्टं

यदिदं त्वमन्यदित्यभिमतं तस्मादनन्यत्वादनन्यदिति मतं तस्य प्रथमसदृशाभेदस्योविरिता धारि
तिभावः ॥ स्वात्मेदस्यावगपदवत्वमितिदृष्टं समाधत्ते ॥ तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसि

अनेन

द्धेः ॥ तदभावे ऽन्यत्वाभावे ऽनन्यतापि नास्ति तयोर्भेदाभेदयोः सिद्धेः परस्परसापेक्षत्वात् तच्च सत्त्वं सत्त्वतयो
र्मध्ये इतरस्य एकतरस्य अनन्यत्व[illegible]स्य इतरापेक्षसिद्धेः इतरत्वस्य भेदस्य ज्ञानापेक्षासिद्धिरूपत्वात् शा
त्वादिस्पर्शः प्रोकते ॥ विनाशकारणानुपलब्धेः ॥ शब्दो नित्यः इद्द्रसाहि अनुपलब्धिरप्रसङ्गमन्तेन
वा आघ्नेयमतिवृद्धीमाह ॥ अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ यथा मतसन्धेत्वादभावमि
द्धिस्तथा अश्रवणकारणस्याप्रत्यक्षत्वादश्रवणं न स्यादिति सततश्रवणप्रसङ्ग इत्यर्थः द्वितीयमाह ॥

एम०

३६

पलभ्यमाने चानुपलब्धेरसत्वाद्धेतुरनपदेशः ॥ अनुमानादिनोपलभ्यमाने विनाशकारणे अनुपलब्धे-
रभावात्कृतीयो हेतुरनपदेशः असाधकः असिद्धत्वात् जन्यभावत्वेन विनाशवत्त्वस्य नश्चितिभावः सिद्धे-
रिति: स्पष्टोत्तरं ॥ पाणिनिमित्तप्रश्लेषाच्छब्दाभावेनानुपलब्धिः ॥ शब्दोपमाने कोष्ठाद्यौपाणिह-
पनिमित्तस्य प्रश्लेषात्संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथा-
श्रुतानुयायिनः ॥ [illegible] शालिरूपनिमित्तस्य प्रश्लेषात्संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावको-
रणस्य नानुपलब्धिरिति यथाश्रुतानुयायिनो । परे तु पाणिरूपनिमित्तस्य प्रश्लेषः संबन्धोपनत्रस्य पाणि-
नः शब्दस्य अर्थादुत्तरशब्दस्ततः शब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरिति सर्थं दृसा-
द्रुः । अमेनतु पूर्वं [illegible] शब्दनाशकत्वेके त्यपनेरुत्सर्थः ननु नादृशेऽस्त्वे शब्दस्य नावद्गात्मकः संस्कार विशे-
षो हेतुस्तस्य तीव्रतीव्रतर मंदमंदतरत्वाच्छब्दोपि तादृशस्तत्र चोत्तरशब्दानां पूर्वपूर्वशब्दनाशक-
त्वेकल्पनं तु सर्थः ननु तादृशसंस्कार एव नास्ति सत्त्वादृपालीति नानुपलब्धिः संस्कारस्य तिरोभावः । पा-
णिनिमित्तस्य प्रश्लेषात् घटादिसंयोगात्संस्काररूपकारणाभावद्वारा शब्दाभावे शब्दानुत्पत्तौ नानुप-
लंभः संस्कारस्य सर्थं दृसाद्रुः ननु घटादिपाणिसंयोगस्य शब्दनिवर्तकत्वे घटाद्याश्रयस्य एव शब्दः स्या-

गो॰सू॰ ३५
35

हिंसाशंकायामाह ॥ अस्पर्शत्वात्प्रतिषेधः ॥ ॥ उक्तप्रतिषेधो न संभवति अस्पर्शत्वात् शब्दाश्रयस्ये
ति शेषः शब्दो हि न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावेवा इह कारणगुणपूर्वे
क कार्यत्वाद्धि स्यादाश्रयः ॥ एतदेव स्फुटयितुमाह ॥ ॥ विभक्त्यंतरोपपत्तेश्च समासे ॥ ॥ समासे स्पर्शो हि
समुदाये स्याद्धि सन्नशब्दोऽस्तीति येन गंधादयस्तु विनाग्निसंयोगेन वर्तन्त इति न युक्ते विभक्त्यंतरस्याविभागा
त रसत्वात् आरंभाद्देशोपपत्तेः अयमर्थः एकस्मिन्नेव शंखे देहोत्तरारंभे द्रव्यहिनानाशदर्शनायेन गंधादयस्तु वि
नाग्निसंयोगेन परावर्तंत इति भावः ॥ ॥ समासे शब्दानित्यत्वमकरणम् ॥ ॥ अथ गायत्र्यादीनां यपरिवादेह
सायि तु संशयमदर्शयति ॥ ॥ विकारादेशोपदेशात्संशयः ॥ ॥ विकारोपदेशादेशोपदेशाच्च संशयः
इकोयणचीत्यादिना इकारादेर्विकारो यकारादिरिति सांख्याख्याचष्टेतः परंतु इकारस्य यकारस्य
कारः प्रयोक्तव्य इत्यादिस्मादिशंति अतश्च वर्णो विकारी न वेति संशयः विकारस्य स्वरूपस्यावि
नाशेऽविनाशेवाद्रव्यांतरारंभकत्वं यथा सुवर्णादेर्देश्यारंभकत्वं बीजादेर्वृक्षाद्यारंभकत्वं च स्वर्णादेरपि
लोहाद्यानजन्यावयवसंयोगनाशाद्द्व्यणुकविनाशे सति कुंडलाद्यारंभः कपालादेश्च स्वरूपाविना
शेन घटाद्यारंभकत्वं न च विकारानिराकरणपरसूत्रं ॥ ॥ प्रकृतिविवृद्धौ विकारविवृद्धेश्च ॥ ॥ न वर्णावि

शं ४
नामद्र
८१
गो॰
३५
म ३
कर्तं २

कारणात्तथा सति तत्संहतिरूपादानतामिमं तस्य विवृत्त्या विकारस्यापि तद्व्याप्तेः महदल्पावयवा
रब्धावयविनो महदल्पत्ववत् तद्ध्रस्वकारणारब्धकार्यत्वे ह्रस्वाद्दीर्घकार्यारब्धकार्यस्य विरुद्धिः स्यादित्यशः
तस्मादादेशपक्षः श्रेयानिति भावः आक्षिपति ॥ न नमाधिकोपपत्तौ कारणमहत्त्वं ॥ उक्तो हेतुर्नेतु
कः विकाराणां प्रकृत्यपेक्षयान्यूनत्वस्य समत्वस्याधिकत्वस्य चोपपत्तेर्दर्शनात् यथा तूलकपरिमाणापेक्ष
या तद्विकारस्य तन्तुरूपस्य परिमाणः यथा वा न्यग्रोधबीजादत्युत्कृष्टेन नारिकेलीबीजेन न्यग्रोधादल्पो नारिकेली
तरुर्जन्यते कनककादि समपरिमाणं कनकादि यथा वा न्यूनाधिकं नारिकेलीबीजं चाप्यांसमोऽन्योऽन्यूनपरि
माणो वृद्धिर्बीजान्नाल्पसमोऽन्योऽन्यूनपरिमाणो बृहद्वटबीजाच्च महान् वटतरुरिति ॥ समाधत्ते ॥ नातुल्यप्र
वृत्तीनां विकारविकारित्वात् ॥ नोक्तसमाधानेऽनुक्रमतुल्यप्रवृत्तिकानामित्यत्र प्रवृत्तिकानां हि विकाराणां
विकल्पः वैलक्षण्यं मया अभिहितं न हि बीजाद्दीर्घप्रसव आरम्भादेर्दीर्घप्रसव आदिकं प्रकोष्ठतमतु केवलं हे
राणंतु तदाप्यत्रितस्या च लघुत्वमुपचारस्थलमिति भावः शंकते ॥ इत्यपि विकारवैषम्यवद्रूपं विकारवि
कल्पः ॥ इत्यलं न्यग्रोधादिप्रवृत्तीनां तुल्येपि विकारवैषम्यं यथा एवमेव वर्णेलेन तुल्ययोरपि ह्रस्व
दीर्घयोर्विकारयोर्यौ विकारणकारणस्य विकल्पेऽव रूपं नानुपपन्नमित्यर्थः समाधत्ते ॥ नविकारस्यधर्मा

नुपपत्तेः ॥ नात्रैव विकारस्तुल्यतया विकारोपकारेणां त्वां धर्मोपत्मकत्वमनुविधावंत इदं भेद इति प्रवृत्तेन तदनु
पपत्तिः ह्रस्वदीर्घत्वादीनां ग्रहणमिति भेदोपकाराभेदाभावात् इत्यतश्च न विकार इत्याह ॥ विकारभावाभावानामपुन
रुक्तेः ॥ विकाराणामस्य न पुनः प्रवृत्तिरुक्तत्वात् दृष्टा न खलु दधि क्षीरतां प्राप्तः पु [illegible]
ने विकारतामपद्यते इत्यत्रैतदुक्ता पुनरपि दधि अत्रैतदुच्यत इत्येवेति भावः । आक्षिपति ॥ स्ववर्णादीनां
पुनरापत्तेरहेतुः ॥ उक्तो हेतुर्न युक्तः स्ववर्णादिकं हि कटकीभावं विहाय कुंडलत्वमापन्नं पुनः कटकतां
मापद्यत एवेति भावः । निराकरोति न तत् हि कारणां स्ववर्णाभावात्प्रतिरेकात ॥ स्ववर्णविकारस्यैव हि
स्ववर्णत्वादिना प्रवृत्तिर्नानु कटकत्वादिना तत्रोभयमपि स्ववर्णाभावं न जहातीति यदि हि स्ववर्णतामपजह्या
त्कटकतामापन्नं पुनः स्ववर्णतां न द्रव्याभिवाध्य शक्येत न चैवं यत्तु तेलिकारतां हित्वा यकारतां प्राप्त
स्यापीकारतापत्तिरस्त्येवेति [illegible] परिहार इति भावः ॥ अविकारो मत्वयुक्तिमात्र्या ॥ नित्यत्वेः वि
कारादनित्यत्वे वानवस्थानात् ॥ वर्णजो नित्यत्वे विकारासंभवाद् नित्यत्वे वा विरस्थायित्वेनेकारस्य सत्त्वा
नेन इकार [illegible] विंशाद्धि कारानुपपत्तिरित्यर्थः अत्र जातिवादी नित्यत्वमतमालंब्य परिहरति ॥ नित्यानां
मतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ विकाराणां प्रतिषेधो न युक्तः नित्यानां धर्मविक

त्वाद्द्रूमस्य नानाविषत्वाद्दृष्टोद्भियत्वान्न वकारस्यौत्तुरियकत्वं समुच्चीयते यथा हि नित्यानामाकाशादीनामतीन्द्रियत्वे पिगोत्वादीनां नित्यत्वमेव मन्ये षां नित्यानामसैवि कारित्वे पि वर्णानां विकारिनास्यादिति अनित्यत्वमालंब्य स्वाह ॥ ॥ अनवस्थायित्वे च वर्णोपलब्धिवत्तदुपपत्तिः ॥ ॥ अनवस्थायित्वे पि वर्णानां यथाश्रवणमेव स्वे विकारो पिस्यादिति भावः उभयत्रोत्तरयति ॥ ॥ विकारधर्मित्वे नित्यत्वाभावात्कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ॥ उक्त प्रतिषेधो न युक्तः विकारधर्मित्वे नित्यत्वासंभवात् विकारोत्पत्तौ स्वरूपपरित्यागेन रूपान्तरापत्तिनत्वा लेच नित्यत्वविरोधात्तर्हि घटादेः कपालाद्युपादेयत्ववत्सहते संभवति यकारकाले इकारानुपलब्धेः । अनित्यत्वपक्षेपि प्रतिषेधो न युक्तः यस्य पूर्वं हि वर्तते स्य हि नो पत्त्यात्प्रयुक्ते न विकारस्तु कालान्तरीयो न युक्तं ते दधीति शब्दान्तरमेवेत्यादि शब्दे न तस्य नाशादिति भावः । इतश्च विकारानुपपत्तिरित्याह प्रकृत्यनियमात् विकाराणां हि प्रकृतिनियमो यथा क्षीरं दध्नः प्रकृति विकारभावो न तु वैपरीत्येन प्रकृते न तु दृष्टं तत्रोपादिविकारोपकारप्रकृति विधीयत्यादौ तु यकारः इकारप्रकृतिरिति भावः अत्र छलवादी शंकते ॥ ॥ अनियमे नियमान्नानियमः ॥ ॥ अनियमोप्युक्तः सनयुक्तः कृतः अनियतत्वस्य नियमादित्यर्थः समाधत्ते ॥ ॥ नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥ ॥ अनियमे नियमायुक्तत्वयानियमप्रतिषेधः इतः सनयुक्तः

=४ इति स्वयं ह्रियते ॥ तोने चाह गुणान्तरेति ॥ गुणान्तरापत्तिर्यथा ५

न्यास० ३१

कुतः नियमानियमयोर्विरोधात् अनियमो हि नियमो हि नियमाभावस्तस्मिन्सति नियमाः संभवान्तिति भाव
तरेवं वर्णानां प्रकृतिविकारभावं निरस्य स्वपक्षे विकारव्यवहारमुपपादयति ॥ गुणान्तरापत्त्युपमर्दह्रासवृ
द्धिलेशश्लेषेभ्यस्तु वर्णविकारोपपत्तेर्वर्णविकाराः ॥ तुशब्दः पुनरर्थे एतेभ्यः पुनर्व
र्णविकारोपपत्तेर्वर्णविकाराः एकवर्णप्रयोगेऽन्यवर्णप्रयोगस्योपपत्तेर्वर्णविकाराः ॥ पुनरर्थः
पुनरस्य एतेभ्यः पुनर्वर्णविकारोपपत्तेर्वर्णविकारः समस्य सोपधर्मान्तरापत्तिः यथोदात्तेनुदात्तत्वं उपमर्दो यथा
निवृत्तो धर्मान्तरप्रयोगः यथा अस्तेर्भूः ह्रासो ह्रस्वत्वं वृद्धिर्यथा दीर्घत्वं लेशः अस्तेर्लोपे यथास्त इकारस्य लोपः
श्लेषः आगमः एतैः कारणैर्विकारव्यवहार इति ॥ समासेन शब्दपरिणामप्रकरणं ॥ शब्दबोधपदं न म
पदार्थो यथाप्येवं तुल्यात् इत्यादेनाय पदार्थं निरूपणीयेपरमहि निरूपयति ॥ ते विभक्त्यन्ताः पदं ॥
ते वर्णा विभक्त्यन्ताः पदं वृद्धत्वमपि वर्णितं विभक्तिस्वरूपमनपेक्ष्य तं विभक्तिस्वरूपं वृ रूपमपि ॥ इ
वल्लुप्तलुप्ते पदं शाब्दबोधोपयोगि कि विद्यमानानां स्वरूपं अथवा विभक्तिस्वरूपं तिः संबंध
लोनत्वतिमत्वपदत्वं इत्यं च पदं निरूप्य तदर्थं निरूपणीयमाह ते पदं प्रसंगात्सदार्थानि रूपणामिति तत्र
पदार्थनिरूपणं प्रसंगात्तत्त्वापत्ते एकस्वर्णप्रकरणत्वाभावात् तत्र पदार्थनिरूपितं तद्वाच्यत्वं पदार्थत्वं

दीर्घस्य ह

ह्रस्वस्य ह

न्या० ३२

निरूपितं तत्रापि धात्वाद्यर्थस्य निर्विवादत्वात् कृत्वाद्यर्थे निरूपयितुमाह । तदर्थेष्वनन्यव्यक्तिजातिसंनि
धावुपचारात्संशयः ॥ व्यक्तिरित्यादि । जातिर्गोत्वादि एकत्वनिरवयवत्वसंस्थानविशेषवृत्तित्वीसं निधिमानीमांसि
लनं तत्र संततिरुपचारात् । लालानानत्वात् तत्र पाणिपुगवत्रसयाविमितेषु प्रत्येकं पदार्थ उत समस्तमिति सं
शयः सूत्रार्थः इदं भाष्यमिति केचित् । वस्तुतस्तु लंबोधादिस्वरसात्तत्रैव तदर्थे संशयस्तु भाष्यवृत्तेः इत्य
मिति प्रतिभाति ॥ तत्र व्यक्तिशक्तिवादिनो मतमाह । याशब्दसमूहस्य गणपरियहसंख्यावद्धयवयवत्व
समासानुबंधानां व्यक्तावुपचाराद्व्यक्तिः ॥ पदार्थे इति शेषः । उक्तानामुपचारात् व्यवहाराणां । अनुबंधः
प्रजननं । यातो गोस्तिष्ठतीत्यादिव्यवहारो व्यक्तावेव नान्यस्य । सामस्त्येन तत्वात् एवं गावामसमूहः गावः इति । ताम्
तिरहास्तिष्ठशगावः । गोर्वर्धते बहुशा गोः कपिलो गौः । गोहितं गौः प्रसूत इत्यादिव्यवहाराणां व्यक्तावे
त्र चोद्दिष्टक्रममेवानुयाय षट्कपरीक्षा प्रथमाह्निकार्थः तत्र चतुर्दश प्रकरणानि तत्र चोक्तरूपप्रवृत्तया

प

एम०
५८

अ ३

प्रवृत्तिदोषयोः परीक्षा प्रथमप्रकरणार्थः न चार्थभेदात्प्रकरणभेदः यथा तत्त्वेति परस्परं साकांक्षाभ्यामवयवा
भ्यामुक्तरूपवत्त्वलक्षणैकार्थकत्वकथनात् । प्रवृत्तिपरीक्षायामाकांक्षितायां सूत्रं प्रवृत्तिर्यथोक्ता ॥ अत्र जथेति विशेषं पू
रयन्ति तदयुक्तं तथा सत्यत्रैव यथाशब्दस्याकांक्षाशान्तावग्रिमसूत्रस्य तथाशब्देपि यथाशब्दान्तरस्य पूरणीयत्वात्प्र
करणभेदापत्तेस्तस्मादग्रिमसूत्रस्य तथाशब्देनान्वयो युक्तः । प्रवृत्तिर्यथा उक्तलक्षणवती तथा दोषाश्च पुंलक्ष
णावन्त इत्यग्रिमसूत्रसंवलितोऽर्थः प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इत्युक्तलक्षणसत्त्वान्नासिद्धेल्लक्षणमिति भावः । प्रवृत्तिस्तु
द्वयी कारणरूपा कार्यरूपा च द्वेष्यात्मसमवेते तत्राद्या जन्यत्वेनाविशिष्टा विशिष्टा [illegible] यत्नत्वजातिमती द्वितीय
स्तित्वा द्वितीया तु धर्माधर्मरूपा यागादेर्गम्यागमनादेश्च चिरध्वस्तस्य व्यापारतया कर्मणा शाजूलस शी
हे: आपयश्चिन्त्यादेस्सूनाशपत्नपाकिध्यतीति दोषपरीक्षाणं प्रमायां हि तथा दोषाः । तथा दोषाश्चापि प्रवर्तनालक्ष
णा इत्युक्तलक्षणवन्त एवेति नासिद्धिरिति भावः । समाप्तं प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥ अथ त्रैराश्येन
विशेषेण दोषपरीक्षणाय तत्त्रैराश्यप्रकरणं तत्र सिद्धान्तसूत्रं तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावान्नाजेषां दोषा

मा ३

णां त्रयो राशयः त्रपक्षस्तेनैतु रागद्वेषमोहाख्यानामेकैकत्वं तेषामर्थान्तरभावात्तत्त्वान्तरभेदवत्त्वात्तथा च भयशो
कमानादीनामेषु वांतर्भावात्त्रिविभागनस्तत्त्वं इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मैश्चित्वान्नविभागाधि
कं इच्छात्वादिकं तु रागाद्यावनुभवसिद्धं तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दंभ इति कामो रिंसा
रतिरपि संयोगः नारीगमनाभिलाष इति तु न युक्तं स्त्रियाः कामे व्याप्तेः मत्सरः स्वप्रयोजनानुसंधानं विनाप
राभिमतनिवारणेच्छा यथा राजकीयाडुदयानोन्मोटकं या इत्यादि स्वयं परगुणनिवारणेच्छापि स्पृहा धर्मा
विरोधेन प्राप्तीच्छा तस्माइदं मे न क्षीयतामिति इच्छा अचिन्त्यव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि स्पृ
हाभेद एव वा धर्मविरोधेन परद्रव्येच्छा लोभः परवंचनेच्छा माया कपटेन धार्मिकत्वादिमात्मोत्कर्षख्यापनेच्छा
दंभः द्वेषपक्षः क्रोध ईर्ष्या असूया द्रोहो मर्षोऽभिमान इति क्रोधो नेत्रलौहित्यादिहेतुर्द्वेषविशेषः ईर्ष्यादिसाधारणे
वस्तुनि परस्वत्वान्नष्टहीनविद्वेषः यथा दुरंतदायादानां असूया परगुणद्वेषः द्रोहो नाशपद्वेषः हिंसानु
द्रोहपन्नापरेनृतां द्रोहं मन्यते अमर्षः कृतापराधेऽसमर्थस्य द्वेषः अभिमानो यत्कारि अपकिंचित्कस्याप्य

निर्द्वेषः। मोहपक्षः। विपर्ययसंशयतर्कमानप्रमादभयशोकाः। विपर्ययो मिथ्याज्ञानापरपर्यायोऽयथार्थ
निश्चयः। एकधर्मिकविरुद्धभावाभावज्ञानं संशयः। स एव चिकित्सेत्युच्यते। व्याप्यारोपे मिथ्याज्ञानाय रोपेण
व्यापकप्रसंजनं तर्कः। आत्मन्यविद्यमानगुणारोपेणोत्कर्षधीर्मानः। गुणावति निर्गुणत्वधीरूपं स्मयमपि
मानेऽन्तर्भावयन्ति। प्रमादः पूर्वं कर्तव्यतया निश्चितेष्वकर्तव्यताधीः। एवं वै परीक्ष्य भयमनिष्टहेतूपनिपातेन
त्यागेनेहेत्याज्ञानं शोकः इष्टवियोगे तल्लाभानर्हताज्ञानं शोकः तैनैकत्रत्पलीकभावात्।। रागाभिहेन सक

दी०नी०५

त्रत्पलीकभावात् स केस्मिन् सत्पलीकभावो विरोधित्वं यस्य तत्तथा तेनैकनाशप्रत्वादित्यर्थः एकं हि तत्त्वज्ञा
नमेषां विरोधि समाधत्ते।। व्यभिचारादहेतुः।। एकविरोधित्वं भेदनिषेधेन हेतुर्व्यभिचारात् एकाग्निसंयोग
नाशप्रत्वेन रूपादीनां भेदात्।। किंचैनेतेषामेकनिवर्त्यत्वं तत्त्वज्ञानस्य मोहनिवर्तकत्वात्तन्निवृत्त्यारागादि
निवृत्तेरिसाशयेनाह।। तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः।। पघपि बहूनां निर्द्धारणे इष्टमः तमपोवा
विधानात्तया प्रजमः पापिष्ठइतिचा युक्तं तथापि द्वोद्वाविवक्षितस्य निर्धारणं द्वयोर्निर्धारणेइयसुनोविधानात्ते

नरागमोहयोर्द्वेषमोर्वामोहः पापीयाननर्थमूलंबलवद्वेष इतियावत् हेतुमाह नामूढस्य मोहशून्यस्य रा
गद्वेषयोरभावादित्यर्थः नच तत्वज्ञानिनोपिहिताहितगोचरेच्छाद्वेषजिहितेत्रीरागद्वेषाधीनेइतितत्रव्यभिचा
रइतिवाच्यं धर्माधर्मजन्ययोजकरागद्वेषयोर्दोषत्वेन विवक्षितत्वात् मजन्महभिलाषकमेवासक्तोऽहं पंश्च
मुक्त इत्यादिकमपीतिभावः॥ शंकते" आत्मन्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः। दोषनि
मित्तत्वान्मोहस्य दोषभिन्नत्वं स्यात्प्रमेहेन कार्यकारणभावाभावात् द्वेषेभ्यइत्यांतर्गणिकभेदाद्बहुवचनं
।आत्मन्तर्हीति शस्तु न सूत्रं किंतु भाष्यकृतः स्पष्टमितिपिवदंति निराकरोति" न दोषलक्षणावरोधा
न्मोहस्य। मोहस्य दोषलक्षणाक्रान्तत्वाद्दोषत्वं युक्तिमेहाद्वहेतुहेतुमद्भावो नविरुध्यतइतिभावः॥ व्यप्र
योजक मुक्तानेकांतिकत्वमयाह॥ निमित्तनैमित्तिकोपपत्तेश्चतुल्यजातीयानामप्रतिषेधः। एकजा
तीययोरपिद्रव्ययोर्गुणयोश्चनिमित्तनैमित्तिकोपपत्तेर्हेतुहेतुमद्भावस्वीकारात्तुल्यजातीयत्वमप्रतिषे
धोनयुक्त इति समाप्तदोषपरीक्षाप्रकरणं क्रमप्राप्तत्वात्प्रेत्यभावपरीक्षणीयेप्रेत्यभावःशरीरस्य

वुद्धेरात्मनोवेतिसंशयेपुनरुत्पत्तिःप्रेत्यभावइतिलक्षणाहृत्वाद्विनष्टस्योत्पादःप्रतीयतेनचासौनित्यस्यात्मनः

संभवतीतिशरीरादेःस्यान्नचमृतस्यशरीरादेरुत्पत्तिविरोधान्नेदंदृष्टमितिवाच्यं।प्रेत्यभावइत्यस्यमुख्यंव्याख्याय

स्वपितीतिचस्वव्यत्ययेनभूत्वाअपशमित्यर्थोद्रत्रसिद्धान्तसूत्रेव्यात्मनित्यत्वेप्रेत्यभावसिद्धिः आत्मनःपूर्वोक्त

युक्त्यानित्यत्वेप्रेत्यभावस्तस्यसिद्धोजितिएकजातीयशरीरादिसंबन्धरमसंबन्धनाशयोरुत्याहप्रायेणयोरात्मनः वै ४

संभवात्तत्संबन्धस्त्ववच्छेद्यावच्छेदकभावलक्षणःसचस्वरूपसंबन्धविशेषोजितिरिक्तोवेत्यन्यदेतत्तल्लक्षण

स्तत्रेशुनरुत्पत्तिरित्यत्रपुनःपदंचप्रेत्यभावश्चवाहस्यानादित्वज्ञापनायतज्ज्ञापनापनज्ज्ञानंचवैदेहागमप्र

पद्युज्यतइति नन्वप्रेत्यभावउत्पत्तिनिरूप्यःसाचनसजातीयाद्विजातीयाद्वासंभवति आद्येघटपृथिव्यादौव्य

भिचारान्नित्यत्वेमानाभावाद्व्रतःप्रेत्यभावोसिद्धइत्युपोद्घातीजत्वसंगत्याहोत्पत्तिप्रकारंप्रदर्शयति व्यक्ता

द्व्यक्तानांप्रत्यक्षप्रमाणप्रान्त॥व्यक्तानामुत्पत्तिरितिशेषःव्यक्ताद्व्यक्तजातीयात्पृथिव्यादितःव्यक्तानांव

क्तजातीयानांजन्मघटपृथिव्यादीनामुत्पत्तिरित्यर्थःघटपृथिव्यादेःपृथिव्यादितोरूपवदादितोरूपवदादीना

६१ सुत्पत्तेः असत्त्वासिद्धत्वात्परमाणुरपि कल्प्यते तत्र सरेणोरयक्कृष्टमहत्त्वेन। सावयवावयवत्वसिद्धेस्तस्य लाघववा
न्नित्यत्वमिति भावः अत्रत्याशंकते नघटादिदृष्टानिष्पत्तेः विशेषकार्यकारणभावाभावे सामान्यतोऽपि नत
थेति भावः। विशेषतो व्यभिचारो न विरोधी सामान्यतस्तु नास्त्येवेत्याशयवानुसमाधत्ते व्यक्ताद्दृष्टनिष्पत्तेरप्रति
षेधः सजातीयात्सजातीयोत्पत्तेर्न प्रतिषेधः पृथिवीजातीयात्कपालादितो घटादिनिष्पत्तेः उक्तायाः
हनं चाप्रयोजकमिति भावः समासप्रेत्यभाववरीक्षाप्रकरणं अथात्रोष्टौ प्रकरणानि प्रसंगाद्वक्तान्य
मित्येतत्सिद्ध्यर्थं सुपोह्यानाद्यानत्रादौ शून्यतोपादानप्रकरणं तत्र पूर्वपक्षसूत्रं अभावाद्भावोत्पत्तिर्ना
नुपमृद्य प्रादुर्भावात्॥ ध्वंसकार्याणां भावानामुत्पत्तिर्यतः कुराद्देवीजादिकमनुपमृद्य प्रादुर्भावाभा
वात्तत्र धा चवीजादिविनाशं कुराद्युपादानमिति अत्रोत्तरं नघातादप्रयोगः। उपमृद्य प्रादुर्भव
२न नीतिसुक्तः प्रयोगः व्याघातात्तदुपमहे कस्य सर्वमसत्त्वे भूमत्वे च प्रत्ययः प्रादुर्भावायोगात्॥ पूर्वपक्षो दृष रा०
पजि। नातीतानागतयोः कारकशब्दप्रयोगात्तत्र नायुक्तः प्रयोगः अतीते भागे च कारकशब्दप्रयोगात्तत्के ६१

उपमर्दनत्वा योगात् ... अ१

न्तेकमित्यादिबोधकशब्दप्रयोगात् यथा जनिष्यते उत्पत्स्यते निष्पद्यमानं युक्तमभिनेदृशि अतीते भग्ने चेत्यकु
भूतं कुंभं भिन्नं कुम्भमनुशोचति भग्नाः स्मो भो पचारिकः प्रयोगस्तथापि किं बीजादेर्विनष्टस्योपादा
नत्वं मन्यसे बीजादिविनाशस्य वाङ्कुरं प्रत्येपि तस्योपादानत्वं निमित्तत्वं वा जनत्वाधेयत्वं वा जनत्वाधेयत्वं रां न
विनष्टेभ्यो ऽनिष्पन्नेः इति विनश्यमानां बीजादीनामुपादानत्वायोगादत एव न द्वितीयः तत्र विनष्टं विनाशस्त
तो नोत्पत्तिः ईषद्व्याप्तत्वस्य भावकत्वे समवायिकारणात्तु वक्ष्यमाणहेतुत्वात् ॥ तृतीये त्वाह क्रमनिर्देशादप्रति
षेधः अभावस्य कारणत्वं न प्रतिषिध्यते प्रतिबन्धकाभावस्यैव हेतुत्वोपगमादित्याह क्रमेति बीजे विनष्टे कु
रो जायत इति प्रत्ययाद्बीजस्य प्रतिबन्धकस्याभावः कारणं बीजे विनष्टे तदवयवे जलादिसिक्ते भूम्यवयव
सहिते अङ्कुरस्यारम्भात् अभावमात्रस्य कारणत्वे चर्वितादपि बीजादङ्कुरोत्पत्तिः स्याद्भावस्य नि
विशेषत्वादिति भावः ॥ समाप्तं शून्यतोपादाननिराकरणप्रकरणं ॥ मतान्तरमाह ईश्वरः कारणं पुरुष
कर्मफल्यदर्शनात् ॥ अनेन ब्रह्मपरिणामवादो ब्रह्मविवर्त्तवादो वा दर्शितः इति वदन्ति तथा हि ब्रह्मैव ना

महत्पञ्चपंचभेदेन विपरिणमते मृत्तिकेवोदंचनादिभावेनात्र एव प्राक्तनस्य रूपस्य सत्वस्यापरिमागः अयं वे
घटोदंचनादाविव मृत्तिकात्वस्येति परिणामवादः ब्रह्मैव चानाद्यनिर्वचनीयाविद्यावशान्नानारूपेणा विवर्त्ते
ते मुखमिव नभस्यज्जलाद्यालंबनभेदादिति विवर्त्तवादः ननु पुरुषकर्मैव कारणमस्तु किमीश्वरस्य का
रणत्वेनेत्यत आह पुरुषेति पुरुषकर्मणो हि वैफल्यमपि दृश्यते सहकार्यन्तरमवश्यं वाच्यं तथा च पू
रस्य वपुष्या यथेच्छं जित्वथ्या जगद्धि परिवर्त्तत इत्येवास्तु किं पुरुषकर्मणेति भावः ॥ वस्तुतस्तु केवलेश्व
रकारणतापक्षे कारणान्तराद्युपादानतायां त्वेतु न किमपि मानमाकलयाम इति ॥ समाधत्ते ननु पुरुषक
र्मभावे फलानिष्पत्तेः ॥ केवलब्रह्मण एव हेतुत्वे जगदिष्टापाक्षमितिरिक्तायास्तद्विषयतायाम्प्रानभ्यु
पगमादस्युपगमे हि तदायत्तिरतः सर्वैर्हि वेदास्यात्तस्माद्बूकार्यवैचित्र्यमिति पुरुषकर्मणोपि सहकारि
तावश्यकी ब्रह्मणउपादानत्वेतु न नैसंभवत्यसमवायिकारणसंभवात्तस्य कारणतामात्रं त्विष्यत ए
वेति भावः ॥ नन्वेवं पुरुषव्यापारस्य फलव्यभिचारो न स्यादिति चेत् तत्राह तत्कारितत्वा

द्देतुः फलाभावस्य पुरुषकर्माभावकारितत्वात् पुरुषस्य कर्मण्यदृष्टं तदभावाधीनत्वात् पुरुषकारः अहे
तुः फलानुपधायकः। नन्वीश्वर एव कर्ता इत्यत्र भाष्यं। गुणविशिष्टमात्मान्तरमीश्वरः। गुणो नित्यज्ञानेच्छा
प्रयत्नैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टमात्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिक
र्ता वेदद्वारा हितानाहितोपदेशको जगतः पितेति॥ परे तु प्रसंगादीश्वरप्रतिपादनायेयं त्रिसूत्री तथाहि
ईश्वरः कारणं अर्थाज्ज्ञानजनकस्य अनुमानं तु हिताहितोपदेशको जगतः पितेति। परे तु प्रसंगेनादि
कं सकर्तृकं कार्यत्वाद्घटवच्च हि स्पष्टं ननु जीवानामेव कर्तृत्वमस्त्वत आह पुरुषेति॥ पुरुषकर्मणां वैफल्यं
दर्शनेन तथा च विफले कर्मणि प्रवर्तमानत्वादज्ञं जीवानां यतः उपादानगोचरापरोक्षज्ञानादिमत्त्वं हि क

खं

र्तृत्वं न च क्लिप्तपुण्याद्युपादानगोचरज्ञानं जीवानामिति भावः॥ नन्वदृष्टद्वारा जीवानां कर्तृत्वमस्त्वित्याशंक
ते न पुरुषेति फलस्य कार्यस्य कर्माभावेऽनिष्पत्तेः जन्यं तु पुरुषोपभोगसाधनत्वात् तत्कर्मजन्यत्वमिति स्फो
रणाय पुरुषेति। समाधत्ते। तदिति कर्मणोपि तत्कारि॥ तत्कारितत्वादीश्वरकारितत्वादचेतनस्य चेतनाधिष्ठित

६४

64

सैवजनकत्वादितिभावः।समवायासमवायिरोपादानाभावप्रकरणेयदिचकार्येणासमवायिकत्वंतद्दानप
रमाराद्याद्दीनामुपादानत्वंनचेश्वरस्यनिमित्तत्वमतआकस्मिकत्वनिराकरणप्रकरणमारभतेतत्राय
वैयर्थ्यमहत्वेऽनिमित्ततोभावोत्पत्तिः कंटकतैक्ष्ण्यादिदर्शनात्।अनिमित्ततइतिअथमांजात्रमिलत्र
निमित्ताभावोत्पत्तिरित्यर्थः भावेतिस्पष्टार्थंवदाघुत्पत्तिनैकारणनियमात्उत्पत्तित्वाज्जकंटकतैक्ष्ण्योत्प
त्तिवत्यद्वावतादिकंनसकारणकंभावत्वात्कंटकतैक्ष्ण्यादिवत्तत्रैवांपसंस्थानविशेषः।आदिपदान्म
यूरचित्रादिपरिग्रहः।तदकारणकमेवेत्याशयः।एकदेशोभ्रान्तोदूषयति।अनिमित्तनिमित्तत्वान्नानिमि
त्ततः अनिमित्ततइतिहेतुपंचमीनिर्देशात्निमित्तस्यैवनिमित्तत्वात्तत्कथमनिमित्ततइतिदूषयति
३५: निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः। अनिमित्तस्यनिमित्तस्यचार्थान्तरभावान्नभेदाःतउक्तःप्रतिषे
धःअनिमित्तस्यनिमित्तस्यचार्थान्तरभावान्नभेदात्तत्कथमनिमित्ततइतिदूषयति।निमित्तानिमित्तयोरर्थान्त राम.
रभावादप्रतिषेधः।अनिमित्तस्यनिमित्तस्यचार्थान्तरभावान्नभेदाःतउक्तःप्रतिषेधोनयुक्तः।अनिमित्तस्यनि ६४

मित्तत्वासंभवात्॥ शरीरस्य कर्मनिमित्तत्वदूषणे नैव चतद्दूषितत्त्वाशयमित्याशयेनात्र दूषितमिति। नन्वा
त्मतत्त्वदूषणमेवं चाचष्टे। ममाधत्ते ऽनिमित्तेति अनिमित्तस्य अनिमित्तत्वसाधकस्य निमित्तत्वाद्
निमित्तत्वानुमितिजनकत्वादनिमित्तत इति व्याहतं। अनिमित्तत्वानुमितिजनकानभ्युपगमे ऽनिमित्तत्वं
न सिद्ध्येदिति। कंटकतैक्ष्ण्यादिकमपि नानिमित्तकं अदृष्टविशेषसहकृतैरणुभिस्तदुत्पादनादिति हृ
दयं। दोषांतरमाह निमित्तेति। इदमत्र निमित्तमिदमनिमित्तमिति प्रतीत्या तयोर्भेदसिद्धेर्निमित्तप्रति
षेधो न युक्तः इतरथा च सार्वलौकिकीप्रतीतिर्नोपपद्येतेति भावः॥ ममात्रमाकस्मिकत्वप्रकरणं स
र्वस्य च नित्यत्वे नाप्याहेति अनित्यत्वस्याहतः सर्वानित्यत्वनिराकरणप्रकरणेऽत्रप्रमेयत्वमनित्यत्वव्या
प्यं नवेति संशये पूर्वपक्षसूत्रं सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् अनित्यत्वसाधकस्य पक्षसंशेतत्वं पक्षे
त्वं विनापि उत्पत्तिमत्त्वो विनाशधर्मकत्वात् उत्पत्तिमत्त्वं चाकाशादेरपि मेयत्वात् न सिद्धमिति भावः तेन यद
मनेन न नासिद्धिः यद्वा उत्पत्तिमत्त्वे विनाशधर्मकत्वात् उत्पत्तिविनाशधर्मकत्वात् उत्पत्तिविनाशधर्म

कानां मानसिद्धत्वान्नह्निनमप्रमाणकमिति हृदयं परेतु अनित्यत्वं कादाचित्कत्वं तदुत्पत्तिधर्मे
कत्वादिति हेतुहृदये नानर्थमित्याहुः। हृदयमिति। नानित्यो नित्यत्वात् प्रागुत्पत्तिमत्त्वेन विनाशित्वसाध
कं च नित्यताया ध्वंसस्य नित्यत्वादविनाशित्वान्न तत्र व्यभिचार इत्याक्षिपति। तदनित्यमध्येदोस्यं वि
नाशवत्। तस्मात्प्रतितायाश्चाप्यनित्यत्वं यथा शिद्दीद्यसिंधनादेर्विनाशानंतरं स्वयमपि न श्यति।
ननु दाह्योन्मज्जनं तथा घटादेरपि नाशेन श्यति न तु घटाद्युन्मज्जनं ध्वंसस्यापि श्रुतियोगि ध्वंसत्वात्
ध्वंसप्रागभावानाधारकालस्य श्रुतियोग्यधिकरणत्वमिति व्याप्तेरप्रयोजकत्वात्रोन्मज्जनेन मित्य
न्यो मिसमाधत्ते॥ नित्यस्यापेक्षया ख्यानं यथोपलब्धिव्यवस्थानात्। नित्यस्य नित्यत्वविशिष्टस्य नित्यत्वस्य
न प्रत्याख्यानमिति फलितं यथोपलब्धिरुपलब्ध्यनतिक्रमेणेत्यर्थाच धर्मिग्राहकमानेन लाघव
सहकृतेनाकाशादेर्नित्यत्वव्यवस्थापनादिति समासं सर्वानित्यनिराकरणः प्रकरणं सर्वं नित्यमिति
नपेक्षभावादिसिद्धिरित्यन्निराकरणप्रकरणं मेत्राक्षेपसूत्रं सर्वं नित्यं पंचभूतनित्यत्वात्॥ सर्वं नि

सम्भूकारणं सर्वनित्यत्वेन उत्पत्त्यभावादिसिद्धिरतस्तन्निराकरणाय कारणं तत्राक्षेपसूत्रं सर्वनित्यं पंचभू
तनित्यत्वात्॥ सर्वं नित्यं भूतत्वान्मेयत्वात्तत्र दृष्टान्तप्रदर्शनाय पंचभूतनित्यत्वादिसूक्तं तेन परमाणवा
काशादिदृष्टान्तता लभ्यते। समाधत्ते नोत्पत्तिविनाशकारणोपलब्धेः॥ सर्वनित्यत्वं न युक्तं घटादीनां उत्पत्ति
विनाशकारणानां कपालसंयोगमुद्गरपातादीनामुपलब्धेस्तथा चोत्पादविनाशवाच्यकाविति
पुनः शंकमानमाह॥ तल्लक्षणावरोधादप्रतिषेधः॥ उक्तप्रतिषेधो न नित्यस्य परमाण्वादेर्यल्लक्षणं भूत
त्वादि घटादौ न दृश्यते तन्नस्त्वात्तथा चोत्पादादिप्रत्ययोऽभ्रान्त इति भावः। दूषयति। उत्पत्तितत्कार
णोपलब्धेर्नित्यत्वनिषेधो नैव युक्तं उत्पन्ने तत्कारणात्तस्मात्कारणात्तत्समायकादुपलब्धेः तथा चोत्पादविनाशप्रती
तेः प्रामाणिकत्वात्तन्निषेध इतरथा कादाचित्कत्वप्रतीत्यनुपपत्तेः॥ नचाविर्भावात्तदुपपत्तिस्तस्य चा
नित्यत्वे सर्वनित्यत्वव्याघातात् विवेचयिष्यते चेदं स्पष्टमग्रसूत्रे इष्टाजउत्पादविनाशवस्य सर्वांगत्वं स्या
दिति नाशंक्याह। न व्यवस्थानुपपत्तेः॥ सर्वलौकिकप्रमाणत्वेन सिद्धस्यापि भ्रमत्वशंकापाते माभ्यमव्यवहा

नौ२

६६ विलोपप्रसङ्गादित्यर्थः । समाप्तं सर्वनित्यत्वनिराकरणं । अथ प्रसंगात् सर्वपृथक्त्वप्रकरणं । तत्र सर्वे

66 पृथक्सूत्रैः सर्वं पृथग्भावलक्षणपृथक्त्वात् । सर्वमेव वस्तु पृथक् कर्त्तुं लक्ष्यन्ते नैके ऽपि लक्षणानि समारब्धा पृ

थक्त्वं पृथगर्थकत्वं तथा च प्रयोगः घटादिः समूहरूपः वाच्यत्वात् सेनावनादिवत् अत्रोद्देश्यगतनाहो

मानाभावादात्मनः शरीरव्यतिरेकाद्गुणकर्मणोरगुणभेदाद्विशेषसमवाययोर्मानाभावादभावस्य

तुच्छत्वान्नव्यभिचारः । यद्वा घटादिकं स्वस्मादपि पृथग्भावलक्षणानां तन्तदवयवानां च पृथक्त्वा

त् घटादेस्तु तद्भेदादिति भावः । समाधत्ते ॥ नानेकलक्षणैरेकभावनिष्पत्तेः । अनेकलक्षणैरने

कस्वरूपैरूपरसादिभिस्तन्तदवयवैश्च विशिष्टस्यैकस्यैव भावस्य निष्पन्नेरुत्पत्तेरित्यर्थः तथा चै

कस्य धर्मिणः प्रत्यक्षादिप्रमाणसिद्धत्वात्तत्संघाक्षमत्वात् सत्त्वादिविरुद्धधर्मोऽध्यस्तरूपरसा

द्यात्मकत्वाभावादवयवानां च कारणत्वात् कार्यकारणयोरभेदासंभवाच्च न गजनदात्मकत्वं घटा एम०

देः संभवतीति भावः ॥ हेतुमाह ॥ लक्षणाव्यवस्थानादेवाप्रतिषेधः ॥ लक्षणस्यार्थोऽज्ञापकं घटप ६६

५ न

टादीनां व्यवस्थानाद्यवस्थितत्वाहेकत्वप्रतिषेधः पृथक्त्वव्यवस्थापनं नैतत्पथ्यं कपालसमवेतद्व
त्वादिकं हि घटादेर्लक्षणं कणले घट इत्यादिप्रतीतिसिद्धं न चेदं समूहात्मकत्वे संभवति एवं लक्षणस्य
घटादिस्वरूपस्य महमद्राक्षं तमहं स्पृशामीति प्रत्यभिज्ञेनाव्यवस्थितत्वात् परमाणोश्चाप्रत्यक्षत्वात्तत
संभवः किं च समूहलक्षणाव्यवस्थितेरेव नोक्तं पुष्कं समूहो हि नानाव्यक्तिसमुदायः स चैकव्यक्तेरनभ्युप
गमे सिद्ध्यतीति भावः ॥४॥ समासं सर्वपृथक्त्वनिराकरणप्रकारेण सर्वशून्यत्वेन कार्यकारणभावासंभवइ
ति तन्निराकरणाय कारणमारभते । अत्र ज्ञानाविषयत्वमभावत्वव्याप्यं न चेति संशये पूर्वपक्षसूत्रं सर्वमभावो
भावेष्वितरेतराभावसिद्धेः ॥ सर्वविवादपदमभावस्तुच्छं तत्र प्रमाणमाह भावेष्विति भावत्वाभिमतेषु घ
टादिषु अभावत्वसिद्धेः घटः पटो नेत्यादिप्रतीत्या सर्वेषामभावत्वसिद्धेः ॥ सिद्धान्तसूत्रं ॥ न स्वभावसिद्धेः भावानां
पृथिव्यादीनां स्वभावस्य गंधादेः सत्त्वादेश्च सिद्धेः न हि तुच्छस्य गंधवत्त्वादिकं सत्त्वेन घटतीति वो हि संभवति पु
नः शंकते । न स्वभावसिद्धिरापेक्षिकत्वात् । न हि सर्वेषां भावानामेकः स्वभावः संभवति आपेक्षिकत्वा

व

नभिन्नत्वान्नभिन्नं स्मादपि भेदायन्नेः यद्वाइज्ञरसायेज्ञत्वा नएतटयेज्ञयायं नीलज्ञरएज्ञदपेज्ञपाहृत्वइ
तिप्रतीतेः यद्वसायेज्ञंतहृचल्लुपथ्याजयाप्तायेज्ञंस्फुटिकाहरणं॥ समाधत्ते च्याहृतत्वादसुक्तं सापे
ज्ञत्वस्यनुच्छं त्वचाप्नेर्वाहृतत्वाद्दसिद्धत्वाज्ञवाघटादेः सापेज्ञत्वं संभवति किंच सापेज्ञित्वसायेज्ञंन
चाश्राघेतुसानुच्छत्वान्नसाधकात्वं स्त्रंन्तेत सैवसत्पत्वात्नकुतः सर्वद्वैधानित्यानित्यभेदात् सर्वत्रेधा
सौम्मं सर्वं शकृत्वात्वमितिभावः समाप्त सर्वं स्फुत्वज्ञानिराकरणाप्रकरणं तत्र भाषां स्त्रं प्रथमे सर्वे
कांतवादाः सर्वमेकं सदविशेषात् सर्वं द्वेधा नित्यानित्यभेदात् सर्वं त्रेधा ज्ञाता ज्ञानं ज्ञेयं ज्ञानमिति स्पष्टा
र्थः॥ परेऽवे वव्यावहृतेः एकमित्यद्वैतचादसत्याश्च हेमैचैकनिर्विशेषं सत्त्वं सर्वमन्यास्मिन्नि थ्योप
हासर्वेः प्रांचज्ञातएकंद्वैतं स्फुरत्वं सदविशेषात् घटः सन्पटः सन्निमित्रतीतेः घटाभिन्नसदभिन्नपट एम
स्य घटाभेदसिद्धेः क्रमितरपि कमेवाहपंचव्ह्नेनेहनानास्ति किंचनेत्यादिः क्रमते पीत्यावेन स्वपसंख्यासंख्या हृ०
विहनानुभवाः पंचस्कंदाइतिसौगतिकाद्यपारिसमुच्चयः॥ एतेषां ज्ञेयपुसिद्धांतसत्वं सर्वेकांता

कदेशत्वात् ॥ अवयवावयविनोऽप्यभेदाभावादिति भावः ॥ दूषयति ॥ निरवयवत्वादहेतुः ॥ उक्तो हेतुर्न युक्तः सर्वस्ये

सिद्धिः कारणानुपपत्त्युपपत्तिभ्यां संख्यैकान्तासिद्धिं निकारणस्य प्रमाणस्यानुपपत्तेः उपपत्तौ वा न संख्यै
कान्तः साधनस्य साध्यातिरिक्तस्यापेक्षितत्वात् आक्षिपति ॥ न कारणावयवभावात् ॥ न संख्यैकान्तस्य सिद्धिः
कारणस्यावयवभावात् उक्तस्यैवं यज्ञस्तेनाच शिष्टस्याभावात् पक्षैकदेशस्य हेतुत्वासम्भवादिति भावः ॥ अ
नित्यस्तु ब्रह्मैकः परे निरेते नामरूपं वोचते सर्वे नैक्यमनित्यं नित्यभेदाद्द्वैविध्याद्दे ह्यनुपगतत्वादनित्यस्या
प्यनुमानस्यानित्यसाधकत्वे विरोधाभावात् कथं मितरथा षट्पदार्थी च सिद्ध्येदिति तस्माद्द्वैतवाद
निराकरणपरत्वमवश्यं करणीयं गच्छतइति संक्षेपः ॥ अथापरे सरन्तः फले परीक्षणीये संशयमाह ॥ सद्यः
कालान्तरे च फलनिष्पत्तेः संशयः ॥ पाठादिक्रियायाः सद्यः फलकत्वस्य कृष्यादेः कालान्तरफलकत्वस्य
दर्शनादग्निहोत्रहवनादेर्हिंसादेर्वा साधकस्य कालान्तरीणां वेति संशयः तत्रैहिककीस्येकीहीना
मेव फलं न सम्भवेन्नादृष्टादिकल्पनमिति सर्वे च ज्ञे सिद्धान्तसूत्रं ॥ न सद्यः फलं कालान्तरोपभोग्यत्वा
त् ॥ कालान्तरोपभोग्यत्वेन प्रतिपादनादित्यर्थः स्वर्गो हि फलं श्रूयते स च देहःस्वास्थ्यभिन्नसुखं तच्चैहिकस्य

६८

68

रंचत्तथैवं हिंसादेस्तत्तन्नरकोपभोगः फलं श्रूयते न वेदत्वत्तत्संभवइति भावः। शंकते। कालांतरेण
तत्तत् कर्मणां फलं न संभवति हि हेतोस्तत्तत्कर्मणां चिनाशात्। समाधत्ते। या। क्रियेत्यादि नैव चेत्फलवत्त्वं त
साक्षात्स्वर्गादिनिष्पत्तेः। शंकते। द्वारं स्यादिह ध्वंसमादाय इह फलं चेत् यथा मूलमेकादिनाशे पित्तदधीरसाच
पचोपचयादिद्वारवलेन फलोत्पत्तिस्तथा प्रकृते पि यागादिनाशे पि तत्स्वन्याद्दृष्टरूपद्वारसत्त्वान्न स्वर्गा
द्युत्पत्तिविरोधः। ननु कार्यकारणभावस्यैव न विचारसह इत्याशंकते। नामसन्नसहसत्सहसतोवै धर्मी
त॥ शंकते॥ शाड्ढि॰ षांत्तोरित्यनु चत्तेते फलमित्यध्याहर्त्तव्यं तथा चोत्पत्तेः प्राक् फलं नासत् असत उत्पत्तौ
शशशृंगादेरप्युत्पत्तिः स्यात् स्याद्धि तिकतादृशाहावपि तैलं न वासतदुत्पत्तिविरोधात् अत एव सदसदस
दसतोः सत्वहानाचैव धर्मीत॥ समाधत्ते॥ शंगुत्पत्ते हेत्पत्तिधर्मेकसमहित्यद्धाउत्पादव्ययदेशनाजैउत्प
त्तिधर्मकं उत्पत्तिधर्मकत्वेनोपलभ्यमानं पटादिकमुत्पत्तेः प्रागसदितित्रद्धाजत्वं उत्पादनाशयोः प्र
मितत्वात् इदानीं पटोत्पन्नः इदानीं घटो विनष्ट इति प्रत्ययात् सत्तत्तु नोत्पत्तिसंभवउत्पन्नस्य पुनरुत्पादकस्य

राम·
६८

संयोगानुत्पादप्रसंगात् अस्य घटिनाशस्य तन्नहेतुत्वं तथाप्यनुत्पन्नभावस्य नाशायोगादुत्पादस्य साधकत्वेना
शङ्क्यः अत एवानयोर्नियमो न स्यादित्यत्राह बुद्धिसिद्धं तु तदसत् ततः काप्यत्र यत्प्रागभाव इति
पोगिबुद्धिसिद्धं बुद्ध्या विषयीकृतं तथाहि इह तन्तुषु पटो भविष्यतीति ज्ञात्वा कुविंदः प्रवर्त्तते न तु पटो
ऽस्तीति ज्ञात्वा अन्यथा सति सिद्धत्वेन तत्रेच्छाभावात् प्रवृत्त्यनुपपत्तेः सिकतासु पटो भविष्यतीति ज्ञा
यते किंतु न भविष्यतीति न ज्ञायत एव कुत इति चेदनुभव एवात्रानुभवं पृच्छ किं चात्र मृत्कणेपि कुतो न ज्ञाप
तेऽत्र पटाभावादिति चेत् कथं निवारणाधिपटात् पूर्वं तन्तुसिकतयोस्तुल्यत्वात् तत् तन्तुत्वेनाश्र
यत इति चेत् तन्तुत्वेन कारणत्वे स्याच्च प्रवृत्त्यनुरोधात् अन्यथा तन्तुहेतुफलभावस्य तथापि हेतुफलव
दिति दृष्टान्ते वैषम्यादाह दृष्टसिद्धिरित्याशयेनाशंकते आ अप्रवृत्तिरेकान्तहेतुफलवदिति हेतुः
प्राद्विषये नेहेतुफलवदित्याहेतुः कुतः आ अपव्यतिरेकान्वयेन कार्येण कर्मेक्षणेन स्यनाशान्तदृष्ट
स्य लेशहेतुत्वे समत्वात् न हि लिङ्गमेकादिकं परिकर्मोपयुज्यत इत्यभिमानः समाधत्ते॥ श्रीतेत्पद्य

मि ५

ने ३

६९

69

त्वाह हेतुः। आश्रयव्यतिरेकादिति हेतुर्न युक्तः। शरीरे तु सुखस्य स्वर्गशरीरावच्छेदेन ज्ञायमानस्यात्म
वृत्तित्वायोगादि सामानाधिकरण्यादित्यर्थः। क्वचित्सामानाधिकरण्यसंभवेऽपि सर्वत्र न तथेति
शंकते नपुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादिफलनिर्देशात् सामानाधिकरण्येन संभवतीति भोक्तृय
पि पुत्रादीनामैहिकफलत्वात्तत्र व्यतिरेकभावात् शंका न तथापि यत्र जन्मान्तरीयपश्वादिकमपि फ
लं स्यात्तत्रापि नानुपपत्तिरित्याशयेनाह तत्संबंधात्फलनिष्पत्तेस्तेषु फलवदुपचारः तेन संबंधात्
पुत्रादिसंबंधात्फलनिष्पत्तेः शरीरादित्तेषु पुत्रादिषु फलवदुपचारः फलत्वेन व्यपदेशः यथा
न्नं वै प्राणिनां प्राणा इति ॥ ॥ समाप्तं फलपरीक्षाप्रकरणं ॥ ॥ अथ क्रमप्राप्तं दुःखं परीक्षणी
यं तत्र च बाधनालक्षणं दुःखमित्युक्तं अहर्थे तु दुःखजातिमत्त्वमित्युक्तं तच्च शरीरादौ सर्वकरणां
…दौ दुःखव्याप्तिमित्याशंक्याह ॥ विविधबाधनायोगाद्दुःखं जन्मोत्पत्तिः जननयोगाज्जन्म शरी
रादिकं तद्दुःखमित्येतत्संबंधः विविधबाधनायोगात् दुःखमिति विषयादिशब्देन तु बालत्वमेव तद्दुःखं

न्या० ४

न्या० २

एम०
६९

तथाचविविधदुःखानुषक्ततयाहेयत्वार्थंदुःखमितिभावनीयमुपदिश्यते।ननुदुःखभावनेनकिंसु
खत्यागादिश्यते ~~ननुदुःखभावनेनकिंसुखंत्यागादिश्यते~~ नतेनतच्छक्यमतआह सुखस्याप्यन्तवाल
निष्पन्नेः।।दुःखानीमभ्रोसुखस्याप्युत्पन्नेस्सतत्प्रत्यास्वादस्याशक्यत्वात् ननुसुखदुःखसंबंधाविशे
षात्सुखभावनमेवकिंनेष्यतइत्यत्राह चाधनागनिवृत्तेर्वैराग्योपादृष्टजितेषधः।दुःखभावनस्स
नञ्जितेषधःवेद्गपतःसुखसाधारणत्वंज्ञानतःयप्यैवणाँषीनुपेष्येसतेसुखार्थप्रवर्त्तनेदोषात्सुखा दे५
ध्याभिद्द र्थंप्रवर्त्तमानोहिअर्जनपालनादोविविधबाधनाभिरुपतप्यतेऽतोदुःखभावनेनैवैराग्यहेतुत्वोप
दिश्यते।ननुदुःखमनुभव~~[illegible]~~ःस्वतःसवनिवृत्तेःसंभवात्दुःखभावनोपदेशोव्यर्थइत्यत
आह।।दुःखविकल्पस्तुखाभिमानाच्चा।दुःखस्यविधःकल्पोयत्रतमाहशोषजितिमिद्वहिंसाभोजन
मैथुनादोप्रवृत्तिमोमूद्दिश्यमुपदेशइतिभावः।।समाप्तंदुःखपरीक्षाप्रकरणं।। ।।अथक्रमश
र्वेणायवर्गःपरीक्ष्यणीयः।तत्रचतत्त्वप्रत्यक्षतत्त्वकालाभावात्तदभावइतिपूर्वपक्षयति ऋणक्लेशप्रवृत्त्यनुबं

म

७० 70

वाह्यवर्गाभावः ऋणानुबंधाद्यवर्गानुष्ठानकालाभावे यवर्गाभावः स्यात्तथा च श्रूयते जायमानो
ह वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्य इति ऋषिभ्यः
ऋषिऋणेभ्यो ब्रह्मचर्येण मुच्यते देवेभ्यः देवऋणेभ्यः यज्ञेन मुच्यते प्रजया त्रयस्तेन पितृभ्यः पि
तृऋणेभ्यो मुमुच्यते ऋणापाकरणेनैव च जीवनाय गमः तथा च श्रूयते देवेभ्यः देवऋणेभ्यो मुमुतंस पदेत ४
त्रं पद्वाग्निहोत्रं दर्शपूर्णमासौ च जरया ह्वा एष तस्माद्धि मुच्यते मृत्युना वेतिं ऋणापाकरणमं
तरेण च न तत्र प्रवृत्तिः तथा च स्मर्यते ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अन
पाकृत्य मोक्षं तु सेवमानो व्रजंत्यधः एवं क्लेशानुबंधाद्द्विपुरुषो हि रागादिभिस्तत्र तत्कर्माण्या
रभमाणः क्लेशानुविद्धस्त्व दृश्यते तंत्र तत्कथमपवर्गः एवं हि तत्ानुबंधाद्द्विपुरुषो हि वाग्बुद्धिशरीरैस्त रम॰
त्तत्कर्मेति निमित्तेण धर्माधर्मौ या वज्जीवमनुयाजयन् कथमपवृक्तात्मा भिति समाधत्ते ॥ प्रधा ७०
नशब्दानुपपत्तेर्गुणानानुवादो निंदाप्रशंसोपपत्तेः जायमानइत्याघनुवादो हि न प्रधानशब्दः न हि जा

यस्मात्सः कर्मण्यधिक्रियते तथा च भाष्यं यदाहतु मातृतो जायते कुमारः को नन्वदः कर्मस्वधिक्रियतेऽत्र
र्थिनः शक्तस्य चाधिकारात् हि जिज्ञायमान इत्यनेनैको वाव्यावर्त्तनीयः तथा च भाष्यं जायमान इति गुणा
शब्दो विपर्यये नधिकारादिति तथा च जायमान इत्यनेनोपनीत उच्यते न तस्य ब्रह्मचर्यादावधिकार इत्य
निहोत्रादौ गृहस्थस्याधिकारः ज्योतिष्टोमेन वा मानावादधीयानाभिजिज्ञासते : एवम् च शूद्रोपि न मुख्यः न
ह्यत्र शक्ता देवं कर्म न दृष्टानियरं तु ऋणापाकरण ~~ज्योतिष्टोमेन वा मानावादहवीपासे~~ णवद्धावेशपकत्वरव्याप
नायनथोक्तं त्वाहारिक शब्दश्च योगे वीजमाह निंदा प्रशंसोपपत्तेः । ऋणानपाकरणे भक्षमिवाग्निहो णनत्कुरद
त्रादिकरणान्नकरणाभ्यां निंदाप्रशंसे उपपद्येते न चाउ स्थानकाल्लाभावः जरया विमुच्यत इत्युक्ते न च
जरयाऽशक्ति रूपलक्षणेऽशक्ते तेषां सोमानु हृयात्र लक्षणा हि सत्यरिक्तीत इत्यादिनाऽशक्तस्यापि विधा
नात तस्मादायुष श्चतुर्थभागो जरे त्युच्यते किंच जरामर्यं वादः कामस्याभिप्रायेण तथा च भाष्यं त्र्यर्थित्वस्य
चापरिहाणं मे जरामर्यं वाहो यथाग्निहोत्र जिन्वर्थिकाममनातदयरिणामे तदामर्यं वादोपपन्ने भिजिन्वर्थित्वं का

७१

71.

मिनात्तद्दपरिमाणेन स्वनाशे कर्मैकरणाभिप्रायेणाजरामर्यं वा तदुपपद्यते ननु कामयमानं कामनाविरहे
णास्याग्निसंभवेपि निमित्तानां कथं त्यागः श्रूयते हि यावज्जीवमग्निहोत्रं जुहुयादिति तत्राह समारोप
णमन्यत्र निषेधः अपवर्गः प्रतिषेधो न युक्तः अग्नीनामात्मनि समारोपविधानात् तथा ये तेषां जाप
स्याभिष्टिं निरूप्य जातसां सर्ववेदसं दत्वा त्वन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेदित्यत्र स एव चत्वारः यथ
योहेवयोनाइति चानुरोक्तिरपि संगच्छते नन्वग्निहोत्रस्य प्रतिबंधकत्वेपि तत्फलं स्वर्गः प्रति
बंधकः स्यात्तत्राह पात्रचयांतानुपपन्नेषु फलाभावः ज्ञानिनः फलस्य स्वर्गस्याभावः अग्नि
होत्रं हि पात्रचयांतं पात्राणामग्निहोत्रपात्राणां तेषां चयः अमीतस्य यजमानस्यांगेषु विन्यासः मुखे
तन्मूर्ध्नि स्रुचमिति क्रमेणाभिहोमास्तत्र तदनुपपन्नेः तेन तत्र परित्यागात् अग्निहोत्रफलाभावेपि ज्यो
तिष्टोमगंगास्नानादिहिंसादिफलानां प्रतिबंधकत्वं स्यादित्यतो हेत्वंतरं समुच्चयायापवकार उपन्य
स्यन् यथा च यथा स्वाश्रितानि कर्मणां ज्ञानादेरेव इत्याशयः श्रूयते हि यथा विद्वान् पुण्यपापे विधूय निरंजनः

श्रम्य

गरआपर्व

रामं०

७१

नः परमं स्थानमुपैति। एवं क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे। स्मर्यते ज्ञानाग्निः सर्वकर्माणि भ
स्मसात्कुरुते तथेति। अन्यच्च कामनाशङ्कास्य प्रजातु स्यादेपि नापवर्गविरोधी तथा च श्रूयते एतद्ध स्म
वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयंते किं प्रजया करिष्यामो येषां नोयमात्मा लोक इति ह
स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरंतीति। त्र्यस्येत फलाभावः फ
लस्य मुमुक्षून्प्रति। अग्निहोत्रादेर्योजकत्वाभावस्तथा सति भिक्षूणामपि षाण्ड्वचर्यां जनतास्यादि
त्यर्थे इत्याहुः॥ क्लेशानुबंधं दूषयति। सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववद्दृष्टपवर्गः स्वप्नादर्शनकाले सु
षुप्तस्य यथा हि तत्वभावेन दुःखाभावस्तथापवर्गेपि रागाद्यभावेन दुःखाभावः स्यात्शुद्धस्य तु बंधादपवर्गा
भावं दूषयति न प्रहत्रिप्रवृत्तिसंधानाय हीनक्लेशस्य। क्लिश्यंते नेनेति क्लिष्टयोगादिजं ह्रिरहिणोयाप्र
वृत्तिः साप्रतिबंधाय न भवति धर्माधर्मौ न जनयतीत्यर्थः॥ क्लेशाभावे सहमानः शंकते। न क्लेशसंत
तेः स्वाभाविकत्वात्। क्लेशसंततेरुच्छेदो न युक्तः स्वाभाविकत्वात्॥ एकदेशी समाधत्ते। आगुणसत्वेरभा

प्राग१

७१ वनित्यत्ववज्जातिभेदेऽप्यनित्यत्वं अणुक्षणमात्रानित्यत्ववद्धा ॥ प्रागुत्पत्तेरभावनित्यत्ववत् स्वनोदेः प
रमाणुक्षणमात्राया विनाशवद्वा विनाशः ॥ अनित्यत्वं विनाशिभावत्वं न च तत्प्रागभावे न चाणुक्षणा
मात्रादिस्तथा च भावध्वंसनादिरणुक्षणमेवेति हेत्वभावादयुक्तमिति ॥ अतो मतद्वयमुपेक्ष्य सिद्धान्तमा
ह नसंकल्पनिमित्तत्वाद्रागादीनां ॥ नोक्तं पुरस्तात् कुतो रागादीनां संकल्पनिमित्तत्वात् संकल्पो मिथ्या
ज्ञानं निमित्तं येषां तथा च तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ रागादिनिवृत्तिरुत्पन्न एवेति भावः ॥ ॥ समाप्तमपव नर्५
र्गपरीक्षाप्रकरणं ॥ ॥ समाप्तं चतुर्थाध्यायस्य प्रथममाह्निकं अथ शास्त्रस्य परमप्रयोजनमपवर्गः स चो
द्दिष्टो लक्षितः परीक्षितोऽप्य किंचित्करः कारणानिरूपणात् न तत्त्वमिति हि जन्मैव दुःखादिहेतुकारणा
नो शक्तमेण दुःखाभावोऽपवर्ग इत्तीति च न मतं मिथ्याज्ञानापगमे हेतुः कोऽभिहितं तत्त्वज्ञानं जन्महेतुरिति एम०
चेत् कस्य तत्त्वं ज्ञातव्यमित्यभिधानीयमित्याशयेन तत्त्वज्ञानपरीक्षासैव चाह्निकार्थः तत्र च षट्प्रक ७१
रणानि आदौ तत्त्वज्ञानोत्पत्तिप्रकरणं अन्यानि च यथायथं वक्ष्यन्ते ॥ तत्र सिद्धा

नो

तस्तत्रं॥ दोषनिमित्तानां तत्त्वज्ञानादहंकारनिवृत्तिः। अहंकारोऽहंमित्यभिमानः स च शरीरादिविषयको मिथ्या
ज्ञानमुच्यते तस्य दोषनिमित्तानां हि तत्त्वज्ञानादहंकारनिवृत्तिः। शरीरादीनां तत्त्वस्यानात्मत्वस्य ज्ञानान्निवर्त्तते
आत्मभूतेन हि शरीरादौ मुमुक्षुर्रंजनीयेषु रज्यति कोपनीयेषु कुप्यति। केचित्तु दोषनिमित्तानां रागादीनां तत्त्व
ज्ञानादहंकलेवरनिरासानुबंधित्वज्ञानादहंकारस्याहमिलाषस्य निवृत्तिरित्यर्थ इत्याहुः॥ ननु केतावहनु रंजनी

याविषयेषु रज्यन् संसरतीत्यतो विवेकाय तत्रानुपदिष्टे दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः संकल्पः
समीचीनत्वेन भावनं तद्विषयीकृता रूपादयः। दोषस्य रागादेर्निमित्तं सुंदरीयमिति ज्ञानन् रज्यति शत्रुरय
मिति द्वेष्टि ते रूपादयो हेयत्वेन भावनीयाः प्रथमं ततः शरीरात्मविवेकः॥ ननु मोहं प्रत्यादिकं प्रपश्यतो रागा
दिजे ह्यगोपि दुःपरिहरः तदुक्तं चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढमित्यतो रागादिनिवृत्त्युपायं दर्शयि
तुमाह तन्निमित्तं त्ववयवमभिमानः अवयविनि तद्रागादि शरीरेऽभिमानः स परिष्कारबुद्धिस्तन्निमित्तं रागादि
निमित्तं तथावस्था बुद्धिर्हेया॥ अत एव भाष्यादौ परिष्कारबुद्धिरनुमंतनसंज्ञास्मि हेया दोषदर्शनमशुभसंज्ञा भाव

नीयेतिस्त्वनुसंजनसंज्ञापथ्यार्थमात्रबुद्धिर्हेया॥ अनन्तप्रोविलसत्सर्वंजननयनापरिणामविंबाधिराहग्रुओरागीकमलमुकु
लत्तनीयं पूर्णेन्दुमुखीस्तुस्वापमेभवि।जेति।अशुभसंज्ञायथाचमेनिर्मितं पर्षोपमांसास्टकशरीरं।अस्मारम
न्तियोसदः पिशाचः कल्तजोधिकः।शरीरादौ अप्यशुभसंज्ञैवभावनीया एवं कोपनीयेपि शुभसंज्ञानुमांसा
स्वक्को।कस्मोयादेहः किमेपराध्यति।एतस्मात्परः मन्नास्किन्नेनीपः कथं मेयेति॥ समाप्तं तत्वज्ञानोत्पत्तिश
करणं॥ अथप्रसंगाद्‌चयविप्रकारणं चक्षुर्जलंशरीरेधर्मद्वयसंवद्धे एकं धेयमपरं हेयमितिनिर्दुक्किकं
स्वतोचयवीतास्तिकिंनुपरमाणुपुंजइतिजत्वंनहेवनतत्त्वकृभिर्भोवनीयंपरमाणुपुंजइत्यप्यापातनः परमा
णोरप्यग्रेनिराकरिष्यमाणत्वादितिसौगतक्षंकामयाकुर्नुमयमारंभः।यद्यपिक्षितौयाधारेवावस्यापितसावाव
यवीतथापिलक्ष्यक्षित्वादौर्धेनसौत्रांतिकस्यांवैभाषिकस्यावात्रप्रतववस्थानमिति॥ तत्रसंशयप्रदर्शनायस्त्रं॥ विद्या
विद्याद्वैविध्यात्संशयः॥ संशयइत्यस्यावयविनीत्यादिः।अवयविनः प्रत्यक्षेसोऽदृत्वानस्यपलायाद्रुः शक्यइत्यत
उक्तं॥ विधेतिप्रमाप्रमभेदेनज्ञानद्वैविध्यानज्ञानत्वोमेतल्लक्षणसाधारणधर्मदर्शनाद्ज्ञानप्रामाण्यसंशयात्तद्वयवि
निसंशयइत्यर्थः॥

समाधत्ते तदसंशयः पूर्वहेतुप्रसिद्धत्वात् तत्तन्नावयविनि न संशयः पूर्वहेतुप्रसिद्धत्वात् इति यावत्। योक्त
युक्तिभिरवयविनः प्रकर्षेण सिद्धत्वात् अवयविनि साधकं शंकोत्थानानुपपत्तेः अपि हि संशयानुपपत्तिः। अ
पि रवधारणे तत्र हि संशयानुपपत्तिर्वृत्त्यनुपपत्तितो ऽवयव्यभावाद्वस्तादित्यस्य तु वचनात् वृत्त्यनुपपत्तेर्वि
हन्तेति भाष्यकारः। कार्त्स्न्यैकदेशवृत्तित्वाद्वयवानामवयव्यभावः। अवयवी हि एकैकावयवे कार्त्स्न्येन
एकदेशेन वा नाद्यः। विषमपरिमाणत्वात् अत्रैवापि तैलैर्वावयवेनान्येन चानाद्यः। तस्मिन् वृत्तिर्विरोधा
दनात्यः अवयवान्तरस्यावयवान्तरावृत्तेः। तथापि कथमवयव्यभाव इत्यत्र भाष्यं तेषु चावृत्तेरवयव्य
भावः। तेषु अवयवेषु पूर्वोक्तप्रकारेणावृत्तेः अवयविनो ऽस्ति न ह्यसाववृत्तिरस्त्यभ्युपेयत इति भावः। सूत्र
मेवेदमित्यपि वदन्ति। नन्वास्तामवृत्तिरेवावयविनि शंकायां पूर्वपक्षिसूत्रं पृथक्चावयवेभ्यो वृत्तेः।
अवयवेभ्यः पृथक् अवयवी नास्तीति शेषः। तेषु चावृत्तेरित्यस्य स्पष्टत्वे अवयव्यभाव इत्यनुवर्तते कु
तः अवृत्तेः वृत्त्यभावे ऽवयविनो नित्यत्वप्रसंगः न च नित्यो ऽवयव्युपलभ्यते तेनानास्त्यवयवीति भावः। यद्वा

५२ ॥

अ१

७४

74

कार्त्स्न्यैकदेशाभ्यामवयवी न वर्त्तते किं तु स्वरूपेणैवेति शंकायां स्वेष्टरूपेणासंबंधः स्यादिति अवयवेभ्यः पृथग
वयवी नास्ति कुतः अवृत्तेः अवृत्तित्वप्रसंगात् तत्र यास्तीति नित्यं स्यादिति भावः। कश्चित्तु अवयवातिरेकोऽ
वयवी वर्त्तते अभिमतस्तत्र सर्वपक्षिणः सूत्रे पृथगिति पूर्वोक्तयुक्त्या चावयवेभ्यः पृथगप्यवृत्तेः नन्ववयवा
वयवानां अवयविनोस्त्वाधारात्मैव संबंधः स्याद् दृष्टाहैनत्वावयवावयवाः। न हि तंतुः पटः तंतुषु पट इति क
श्चित् प्रत्येति न चाभेदेनाधाराधेयभाव उपपद्यते। सिद्धांतसूत्रं। एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगा
नुपपत्तेरप्रश्नः। अवयवी कार्त्स्न्येन वा एकदेशेन वा वर्त्तत इति प्रश्नोऽनुपपन्नः एकस्मिन्नवयविनि भेदा
भावाद्भेदनिबंधनशब्दप्रयोगस्यानुपपन्नत्वात्। अनेकस्याशेषता हि कार्त्स्न्यं समुदायिनां किंचन्त्वमेकदेश
त्वं न चैकस्य तत्संभवतीति भावः। दूषणान्तरेण विकल्पोत्तरं युक्तमित्याह। अवयवांतराभावेऽप्यवृत्तेरहेतुः॥
स्यावयवेषु नैकदेशेन च वर्त्तते अवयवांतराभावादिति यः परेषां हेतुः स न युक्तः कुतः अवयवांतराभावे
प्यवृत्तेः अवयवांतरस्य त्वेऽपि तस्यैव परं वृत्तिरप्यानतिनत्ववयविनापीति। यद्वा अवृत्तेर्वर्त्तेनाभावस्य

राम०
७४

न्नैकदेशाविकल्पोनहेतुः कुतः अवयवांतरस्यावयविभिन्नस्यावयवस्याभावेपि सत्वेपि संभवात् घटत्वादि
वत् स्वरूपेणैवावयविनोवृत्तेः संभवात् वृत्तेः कृत्स्नैकदेशान्यतरनियमो घटत्वादौ व्यभिचारी अप्रयोजकश्चे
ति भावः ॥ ननु संशयः पूर्वहेतुत्रयमसिद्धत्वादित्यनेन सर्वाग्रहणमवयव्यसिद्धेरिति पूर्वोक्तयुक्तिः स्मारिता पूर्वे
यस्त्रीणां दूषयितुमुपक्रमते केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः यथा तैमिरिकस्य तिमिरग्रहण
चक्षुषो यथानेकः केशः अप्रत्यक्षः किंतु तत्समूह एव तथैकः परमाणुरप्रत्यक्षस्तत्समूहरूपो घटादिः प्रत्य
क्षः स्यादित्युत्तरयति ॥ स्वविषयानतिक्रमेणेंद्रियस्य पटुमंदभावविषयग्रहणस्य तथाभावो नाविषयेवृत्ति
ः इंद्रियाणां पाटवे विषयग्रहस्य पाटवे अपकर्षे इंद्रियाणां मंदे ग्रहणस्य मांद्यमपकर्षः न तु पटुतरं चक्षुः
शब्दं गृह्णाति जडादिरमुक्तं स्वविषयानतिक्रमेणेति फलितार्थमाह नाविषये प्रवृत्तिरिति तथा चावयवि
प्रसंगस्यैवमावश्यकत्वात् एवमुक्तावश्यकोभेणाहन्निकल्पदोषो चावयविन्यवयवे च प्रसक्त आवश्यकत्वात् तुल्यः
भावस्तथाच सर्वाभाव एवात्वेकस्यापि ग्रहणमिति साधूक्तं सर्वाग्रहणमवयव्यसिद्धेरिति ॥ अस्तु सर्वा

३ चक्षुर्विषयपरमाणुसमूहमपि चक्षुः कथं गृह्णीयादिति भावः ॥ दोषांतराभिधानाय सू
त्रं ॥ अवयव =३

भावइत्यत्राह। प्रलयोनुसद्भावात्‌ आश्रयनाशाद्वाघभावेन यरमाणोर्नाशो भावेतज्जसंभवात्‌। प
द्यानन्ववमवावयविद्भवाहत्वयाप्रलयपर्यंतंस्थीकार्य्यः प्रलयेचनिखिलपृथिव्यादिनाशेनपुनःसर्गो
नस्यादित्याशङ्केन शंकते। अवयवेतिसमाधत्ते गेतिनमकलपृथिव्यादिनाशयरमाणुसद्भावादित्य
र्थः परमाणुरेवकइत्यत्राह्मपरं वात्रुटेः त्रुटेःपरंयदृतिसत्त्वंतत्परमाणुर्वाशङ्क्षेऽवधारणो अथवा
त्रुटेरवयवचसदवयवेयावयवोचापरमाणुरितिविंत्याथोवाशङ्क्यप्रहात्रुटेः परंसत्त्वं परमाणुत्वद
वेववाविश्रामइतिविकल्पोभिमतः॥ समाप्त्रसमवायादिक्रकारणं अथविभ्वसपशल्पत्वानकोप
रमाणुसंभावनेतिमतनिराकरणायनिरवयवपञ्चकारणं। तत्रपूर्वंयत्नसद्ध्वंआकाशव्यतिभेदानन्तु
पपत्तिः। नत्समनिरवस्पाणोरनुपपत्तिःकुतः। आकाशेवाव्यतिभेदान्‌ अंतर्बहिश्चाकाशसमावेशा
नत्त्याचसावयवत्वंतत्वाच्चानित्यइति। अथनाकाशव्यतिभेदत्वहिं आकाशमसर्वगतं स्यादित्याह
आकाशासर्वगतत्वंवा स्यादितिशेषः। समाधत्ते अंतर्वहिरिति कार्य्यद्रव्यसकारणंतत्रावच

नाद्कार्येतद्भावः अंतःशब्दो बहिः शब्दस्य कार्ये द्रव्यस्यावयवविशेषवाचीन चाकार्ये ऽवयवच समं भवद्
त्यर्थेः बहिर्भिन्ति दृष्टान्तार्थे आकाशस्यासर्वगतत्वंस्यादित्यत्राह शब्दसंयोगविभवाच्च सर्वगतं शब्दस्य संयो
गस्य च योविभवः अथवा शब्दजनकसंयोगस्य यो विभवः सार्वत्रिकत्वं तस्मात् पुनः सर्वगतं आकाशमि
ति शेषः ॥ससर्वदेशेसर्वीत्यस्मात्तज्जनकसंयोगानुमानात्सर्वमूर्त्तसंयोगित्वरूपं सर्वगतत्वं तस्य सिद्धं ॥
आकाशेस्य सर्वसंयोगित्वेस्य हन विष्टंभोस्यात्तामतआह अव्यूहाविष्टंभविभुत्वानि आकाशधर्माः ॥
व्यूहः अभिहतस्य परावर्त्तनं विष्टंभमउन्नरदेश इति प्रसिद्धं आकाशे तयोरभावः किं सशीत्वात् विभुत्वं सर्व
गतत्वं यद्यपि तत्स्यादेशस्य तावाद्दिमतेनसंगच्छते आकाशादेस्तेरनभ्युपगमात्तद्यापित्वन्मतइति द्रष्टव्य
त्वाच्या ख्येये एवं वेयसी पुनरप्युत्तरमाशंकते मूर्त्तिमतां च संस्थानोपपत्तेः एवमप्यसद्भावः परमाणोरि ति
शेषः हेतुमाह संस्थानोपपत्तेः संस्थानवत्त्वात् परमाणुर्हि परिमंडलाकारः संस्थानवत्त्वे मानम
प्यादर्शितं मूर्त्तिमत्तामिति मूर्त्तिमत्त्वात [illegible] संस्थानवत्त्वमित्यर्थः चः पूर्वोक्तहेतु

२

७६ 76

समुच्चिनोति मूर्त्तत्वस्य समुच्चयार्थो वा चकारः पुनरन्तरमाह । संयोगो यत्र स्याद् अवयवसद्भाव इत्यनुवर्त्तते संयो
गवत्वादिति हेत्वर्थः । संयोगवत्वात् कथं सावयवत्वमिति चेत् आह इत्थं संयोगस्याव्याप्यवृत्तित्वात् अव्याप्यवृत्ति
त्वं चावच्छेदभेदं विना नोपपद्यते अवच्छेदकश्चावयव इति ननु परमाणोरवयवेष्वप्ययं दोषः स्यात्तथा चानवस्था
नपरंपराप्रसंग इति चेत् तत्र तर्हि परमाणुव्यसनं स्वीकुरु शून्यता वा हंत निरवयवं माकाशादिकमपि
नास्तीति भावः समाधत्ते अनवस्थाकारित्वात् अनवस्थानुपपत्तेश्चानवस्थानिषेधः । पूर्वोक्तयुक्त्या परमाणोर्नि
रवयवत्वप्रतिषेधो न युक्तः कुतः अनवस्थाकारित्वात् प्रामाणिकीयमनवस्था इति आह अनवस्थानुपपत्ते
श्चेति सर्वेषामनवस्थितावयवत्वे मेरुसर्षपयोस्तुल्यपरिमाणत्वापत्तेरित्यर्थः च तत्र तत्संयोगावच्छेदका
दिरिष्यमाणो न चाशून्यताप्रसक्तौ निष्प्रमाणसत्त्वे शून्यत्वविरोधात् निष्प्रमाणकशून्यताभ्युपगमे किमप
राद्धं प्रमाणैरित्येतदिति दिक् । समाप्तं निरवयवप्रकरणं ॥ ॥ ननु वाच्यार्थाभावात् कुतोऽवयवावयविव्यवस्थे
ति मतं पाकर्तुं वाच्यार्थभंगनिराकरणप्रकरणमारभते प्रमेयत्वज्ञानत्वं व्याप्यं न चेति संशयः तत्र पूर्वे

व ४

स्या ६८

एम०

७६

म १

यस्तत्त्वं बुद्ध्या विवेचनात्तु भावानां यथास्तोऽनुपलब्धिस्तं तत्त्वयकर्षेणोयं टसद्भावानुपलब्धिवत् ॥ नु:अकरणा
विच्छेदार्थः भावानां बुद्ध्या विवेचनाद्विभावानां यथास्तोऽनुपलब्धिणां तत्त्वयकर्षेणोयं टसद्भावानुपलब्धिवत् ॥ नैतु
प्रकरणत्वित्रिदं भेदोऽल्लेखाज्ञानयायाम्प्यस्य ज्ञानभेदे नलक्षणास्यानुपलब्धिरनुपपत्तिः ॥ घट इति ज्ञानं मम जातमिति
न्वयनुभूयमानेन च घट इति ज्ञानमित्यनेन ज्ञानघटयोर्भेदउल्लेख्यमानेन ज्ञानातिरिक्तो विषयः यथा घटे वि
विच्यमाने ज्ञानमेवापकर्षणाद[illegible]तिरिक्तं न वस्तु एवं तन्तुरीपनोशुव्यतिरिक्त इति घटत्वादिस्तु ज्ञानस्थै
वाकारविशेष इति भावः समाधत्ते व्याहतत्वादहेतुः कोहेतुर्वे युक्तः व्याहतत्वात्तं न हि बुद्ध्या विवेचने
पटस्य स्वरूपता सिध्यति ॥ तन्तुतः पट इति हि प्रतीयते न तु तन्तुः पट इति एवं यदेन प्रावरणं न तन्तुनं तन्तु
भिः ॥ किं च तन्तुपटविवेचनादेव बाह्यार्थसिद्धिः ज्ञानेन तु सम्भिन्नघटाभेदो नोल्लिख्यते त्वाविषय
कत्वादनुव्यवसायेन तु घटविषयकत्वं व्यवसायेऽपि समुल्लिख्यते ॥ ननु ते तन्तुपटयोर्भेदे यार्थे केन ग्रहणं
स्यादित्यत आह गताश्रयत्वादस्य ग्राह्यणे स्यग्राहणं पदितं त्वविषयकमन्यस्य विषयत्वं पटस्य

=२ ननु अज्ञानस्योभयवादिसिद्धत्वात् तन्मात्रपदार्थकल्पने लाघवान् इतरातिरिक्तपदार्थाभावसिद्धिः स्यादत आह ॥ प्रमाणं तत्त्वार्थप्रतिपत्तेः ॥ यः पूर्वोक्तहेतुं समुच्छिनत्ति ॥ अर्थस्य घटादेः प्रतिपत्तेः प्रमाणाधीनत्वात् ॥ तथा च प्रमाणसिद्धे थे

११

पाद्येजेतत्त्वेनरंतत्राश्रयत्वादिति पदो हि तंत्वाश्रितः तेन सामग्रीसत्त्वात् पटवत्यस्य स्वतंत्रविषयकत्वंप
दिव भेदप्रत्ययस्यापाद्येतेन दाभवत्येवेति भावः ॥ अज्ञानमपि न सिध्येद्धोरवादिति शून्यतापत्तिः ॥ नवाचा
त्याभावसाधनं संभवतीत्याह ॥ प्रमाणोपपत्त्युपपत्तिभ्यां वाधानांन्नवात्याभावइतिशेषः ॥ वाह्यं नास्ति
त्यत्र यदि प्रमाणमस्ति तदा प्रमाणस्य सत्त्वोवात्याभावः ॥ अथ प्रमाणं तत्रो यथ घटेन तदा निष्प्रमाणक
त्वात्तत्सिद्धिरित्यर्थः ॥ यद्वा यदि घटादेः प्रमाणमस्ति तदा तत एव वात्यसिद्धिरथ न प्रमाणं तदा कथं
घटइति ज्ञानस्य घटाकारत्वं मन्यसे ज्ञानस्यैवानुत्पन्नेरिति   ननु प्रमाणप्रमेयव्यवहारेण पारमार्थि
कः परं तु विज्ञानानि तत्तदाकारकारिणा चामनपरिपाकवशादेव स्वाभ्रमत्पपवदैंद्रजालिकवतीनवस्थावि
भेवंतीत्याशयेन शंकते सूत्राभ्यां ॥ स्वप्नविषयाभिमानवदेतत्प्रमाणप्रमेयाभिमानः ॥ मायागंधर्वनगरमृग
तृष्णावद्वास्यं ॥ समाधत्ते ॥ हेत्वभावान्नसिद्धिः ॥ वात्याभावस्य सिद्धिः स्यादिति भावः ॥ अत्र यद्वा हेतोरद्व ॥
हेत्वादेरनभ्युपगमे घटादयमित्यादिज्ञानानामसिद्धिरित्यर्थः ॥ न च वासनावशात् स्यादिति वाच्यं ॥ वासना

गोरथं नवा
धकृमिति
भावः ३१
यथा २=

७७
नं ४

एम०
११

३ या

पात्र्यतिरिक्तत्वे वान्योपगमश्च संगात्तवासनायाः संतन्यमाना तथा च क्षणदेरपि संतानापत्तिरिति दिक् ननु स्वाहि
षया अहं तु काश्यपि स्वान्नभक्षणपाभावनानाप्रत्ययाइवयरेपि अन्ययाभवेत्पुरित्यत आह स्मृतिसंकल्पवद्वस्व
प्नविषयाभिमानः पूर्वोपलब्धविषयः तथा स्वान्नप्रत्ययो योगितानिर्विषयः न च तत्त्वेस्वमोपस्वादितनिजशि
रः खंडनमपि पश्यति न त्विदं पूर्वोपलब्धमिति वाच्यं स्वस्य स्वादनस्य च निजशिरसः खंडनस्य च पूर्वोपल
ब्धत्वात् संसर्गभानस्य च भ्रांतत्वात् न वाहेतुत्वं स्मृत्यादिदृष्टांतेन संस्कारसमुत्पन्नत्वे विशिष्टबुद्धौ च हे
तुत्वस्याभिमतत्वात् तत्र भ्रमे दोषः कालविशेषो दृष्टविशेषो द्वा धो वेत्यप्यवधेयम् ननु स्वप्नविषयाभिमान
प्रणाशवत्प्रतिबोधो मिथ्योपलब्धेर्मायागंधर्वनगरादिस्थानस्य तत्त्वज्ञानादनारोपितत्वस्तु प्रत्ययाद्धि
नाशः प्रतिबोधः भ्रमत्वज्ञानं वा एवं स्वप्नप्रत्ययस्यापि दर्पणमुखविभ्रमस्य तत्त्वज्ञानेनाप्रतिबोधेपि
भ्रमत्वज्ञानं भवत्येवेति भावः मायामेकस्तु वान्याः सत्त्वमसाध्यतेन दृष्टांतेन बुद्धेरप्यसत्त्वं साधयतीत्यं
प्रत्याह बुद्धेश्चैवं निमित्तसद्भावोपलंभात् ॥ एवं वा स्यद्बुद्धेरपि न प्रतिषेधः निमित्तसद्भावोपलंभात्

स्म ५

भ्रमस्यापि सद्विषयत्वे तत्प्रतिबोधः कथं स्यादित्याशंक्याह ॥ मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् ६ =

३ मनति प्रयोजनकं ॥ न वा मिथ्याबुद्धिदृष्टान्तेन ज्ञानमात्रस्यासन्मात्रविषयकत्वं सद्विषयत्वाभावो वा संभवतीत्याह ३

७८ भ्र

सहेतुकमसद्भिन्नत्वान्न त्वलीकं सहेतुकं संभवति आह हेतुकत्वे क्वाचित्कत्वव्याकोपः रकेवि
र्वेमस्य सद्विषयत्वे प्रमात्वं स्यादित्यत आह बुद्धेरिति एवं प्रमात्वं भिन्नस्य प्रकारस्य सद्भावः तत्त्वं तत्त्वपदेन तथा च शु
क्तिरजतयोः सत्यत्वेपि शुक्तौ रजतत्ववैशिष्ट्याभावान्न तद्बुद्धेः प्रमात्वमिति भाव इत्याहुः अत्र चोयलंभयदं तत्त्व
प्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः तत्त्वं धर्मिस्वरूपं प्रधानं स्वावोधीत याव अमेधर्मांशे प्रमात्वमारोप्य
स्तत्त्वं धर्मांशे च भ्रमत्वं दृष्टं नासिद्धिरिति भावः केचित्तु प्रमात्वघोर्धितेषान्नैकत्र समावेशः इत्यत आह तत्त्वेति भ्रमत्व ५
तथा च विषयभेदान्न विरोध इति भाव इत्याहुः समाप्तं बाह्यार्थभंगनिराकरणप्रकरणं ननु शास्त्राधी
नं तत्त्वज्ञानं श्रवणमननसत्ताशे मिथ्याज्ञानं स्यादेव न हि तादृशं किंचिद्देवज्ञानं दृढभूमिसवासनमिथ्या
ज्ञानसमुन्मूलनक्षममतस्तत्त्वज्ञानविवृद्धिप्रकरणमारभते तत्त्वज्ञानविवृद्धिस्तत्त्वज्ञानवासनानां तत्त्वज्ञा
नं तत्कोपि मिथ्याज्ञाननाशः तत्र तत्त्वज्ञानविवृद्धौ हेतुमाह समाधिविशेषाभ्यासात् समाधेर्विजस्ता एम०
भिमतविषयनिष्ठत्वं तस्य प्रकर्षो विषयान्तरानभिष्वङ्गलक्षणस्तस्याभ्यासात् पौनःपुन्यात् तत्त्वज्ञानवि ७८

हृद्धिः नैरंतर्य चिरकालाभ्यासनमादरं चित्तस्यात्तविवृद्धेश्च मिथ्याज्ञानवासनाक्षिपरो भावकस्तथा च योगसूत्रं तज्जः
संस्कारोन्यसंस्कारप्रतिबंधी । प्रतिबंधः कार्योत्पत्त्यसामर्थ्यं विनाशो वा । नन्वनुरागादिभिः प्रतिबंधात्समाधिरेव नो
दीयतामित्याशिपतिसूत्राभ्यां नानार्थविशेषप्रावल्यात् क्रोधादिभिः प्रवर्त्तनाच्च अर्थविशेषस्यानेनयवृत्तिता
दिरागस्य प्रावल्याच्चिरकालानुबंधात्तदनुसंधानमवर्जनीयं स्याच्च घनगर्जितादिज्ञाने प्रतिबंधः एवंकृतनगरस्ता
मयादिभिः प्रतिबंधस्तदुपशमाय प्रवर्तितयरिहरति पूर्वकृतफलानुबंधात्तदुदयसिद्धिः जन्मांतरकृतसमाधिजन्य
संस्कारवशात्समाधिरित्यर्थः अत एव चानेकजन्मसंसिद्धइत्यादि संगच्छते । चयंतु पूर्वकृतस्य प्रथमतः कृ
तस्येष्टसाधनस्य फलं धर्मविशेषस्तत्संबंधादित्यर्थः । तथा च योगसूत्रं समाधिसिद्धिरीश्वरप्रणिधानात् सूत्रां
तरं च ततो चैव ततः प्रत्यक्चेतनाधिगमोप्यन्तरायाभावश्च ततईश्वरप्रणिधानान्नविषयप्राप्तिकृत्यनेनविज्ञावस्था
नं प्रत्यक्षाभावश्चेत्यर्थः योगाभ्यासस्थानमुपदिशति अरण्यपर्वतपुलिनादिषु योगाभ्यासोपदेशात् तत्र स्थिरचि गुहा २
त्ततास्यादिति भावः इदं न सूत्रं किं तु भाष्यमिति केचित् तटस्थः शंकते अपवर्गेप्येवं प्रसंगः एवं च संगः अर्थ

७९ 79

विशेषज्ञावल्पाद्विषयावभासप्रसंगः। समाधत्ते ननिष्फलावश्यंभावित्वात् विष्फलस्य उत्पन्नस्य शरीरा
देः अवश्यंभावित्वात् कारणत्वात् ज्ञानादिष्विति शेषः। ननु किमेतावता तत्पत आह तदभावश्चापवर्गः। तस्य
शरीरादेरभावः तदारंभकधर्माधर्मविरहादिति भावः। ननु समाधिमात्रादेव निःश्रेयसेहोपवर्गः स्यात् तत्सा
धनांतरं वापेक्षणीयम् अत आह तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्या
त्मविध्युपायैः। तदर्थं मयपवर्गार्थमिति भावः। आदौ तदर्थं समाध्यर्थमिति वा। यमानाह योगसूत्रे। अहिंसासत्यास्ते
यब्रह्मचर्यापरि ग्रहा यमाः। नियमानाह शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। स्वाध्यायः
स्वाभिमतमंत्रजपः। निषिद्धानाचरणात् तत्तदाश्रमविहिताचरणात् यमनियमाद्युपन्ये आत्मसंस्कारः आ
त्मनोपवर्गाधिगमसमर्थतानुपपत्तिप्रमाचेव साधनेउद्दो ऽन्यदस्तीत्यत आह योगादिति आत्मविधिः
आत्मसाक्षात्कारविधायकवाक्यं आत्मा वा अरे द्रष्टव्य आत्मानं चेद्विजानीयादित्यादि योगादिति
यजिपाद्युक्त पंचम्यर्थः तत्तद्वयोगशास्त्रोक्तात्मतत्त्वाधिगमसाधनेन आत्मसंस्कारः कर्त्तव्य इत्यर्थः। न

५६

८३
राम०
७९

ख्यातव्योऽत्र सूत्रं योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः। अत्रार्थे योगांगानां यमनियमादीनां
अनुष्ठानाद्विज्ञसाशुद्धेरविद्यादिरूपसंक्षये सति ज्ञानस्य दीप्तिः प्रकर्षः स चाविवेकख्यातिपर्यन्तो जायते
सा च सत्त्वपुरुषान्यतासाक्षात्कारः॥ अस्मन्मते तु देहादिभिन्नात्मसाक्षात्कारः स चेदानीमविद्याशक्तिवे
धोर्देहात्मनोर्भेदेन स्वरूपावधार्यमाणत्वाच्चेद्भवति वा सो योगधर्मात्। योगांगानि चोक्तानि। यमनियमासनप्रा
णायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि। आसनं पद्मासनादि कुशासनादि चैवैलाजिनकुशो
त्तरमिति भगवद्वचनात्। प्राणायाममाह योगसूत्रं तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणाया
मः तस्मिन् आसनस्थैर्ये प्राणवायोर्बहिर्गमप्रवेशरूपक्रियाविशेषात् श्वासप्रश्वासव्यये देशः बहि
रिन्द्रियाणां स्वस्वविषयेभ्यो मुख्येनावस्थानं प्रत्याहारः। धारणामाह योगसूत्रं देशबन्धश्चित्तस्य धारणा देशे
नाभिचक्रादौ चित्तस्य वृत्तिविषयान्तरैरमुख्येनावस्थानं। ध्यानमाह तत्र प्रत्ययैकतानता ध्यानं। धारणैव
धारावाहिनी ध्यानमित्यर्थः। समाधिमाह तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। अर्थस्य ध

। श्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ॥ तं तद्विद्यं सब्रह्मचारी महाध्यायी विशिष्टः अरूढ़ ज्ञानवान् श्रेयोर्थी मुमुक्षुः विशि ५

८० मोक्षज्ञानस्वरूपं यदि ध्यानेनात्मनि तदा समाधिरित्यर्थः ॥ हृज्ज्ञांतरं चायमन्तरङ्गं सर्वेभ्यः। वरमच्चयं साक्षादुपका

80 रकमित्यर्थः ॥ ननु वै किमानुविशिष्टोक्षत आह ज्ञानग्रहणाभ्यासाभ्यां तद्विद्भिः सह संवादः ॥ तदर्थमित्य

नुवर्तते ज्ञायतेऽनेनेति ज्ञानं शास्त्रं पश्चात्प्रकृतं तस्य ग्रहणमध्ययनधारणोऽभ्यासो दृढतरसंस्कारः तद्विद्भि

स्तदभिज्ञैः संवादः स्वानुभववादो घोषणं हियोगाग ज्ञानायततस्यायेक्षत्वेन प्रकृतशास्त्रे वैफल्यं ध्येय

स्वरूपेवलक्षतया तासंवादप्रकारमाह तं शिष्यसुरूतब्रह्मचारिविशिष्टः सर्वोत्कृष्टमित्यर्थः इति कश्चि

न्नोविजिगीषुव्याहन्त्यर्थं अनसूयुभिरिति संवादप्रकारं दर्शयितुमाह प्रतिपक्षहीनमपि वादप्रयोजना

र्थमर्थित्वेवाशङ्कोनिस्वपार्थः अर्थित्वेन तत्त्वबुभुत्सायां समानप्रयोजनार्थं तत्त्वनिर्णयार्थं प्रतिपक्षहीनं प्रतिक यो ४

३ स्या तथा लपक्षहीनं यथाभ्युपेयात् तथा च भाष्यं स्वपक्षमनवस्थाप्य परदर्शनं परिशोधयेदिति तत्त्वनिर्णीषु तपा

नयस्त्यात इति भावः समाप्तं तत्त्वज्ञानविवृद्धिप्रकरणम् तद्विद्यैः सह संवाद इत्यत्र अपीवान्यैः सह संवा रा म०

दः कर्तव्य इति भ्रा मो मा भूदिति तत्त्वज्ञानपरिपालनप्रकरणमारभते तत्त्वाध्यवसायसंरक्षणार्थं ज ८०

ल्पवितंडे वीजप्ररोहसंरक्षणार्थं कंटकशाखावरणवत्   तत्वाध्यवसायस्य तत्वनिर्णयस्य संरक्षणं परो
क्तदूषणास्कंदनेनाप्रामाण्यशंकाविघटनं तदर्थं जल्पवितंडे पूर्वमुक्ते इति शेषः ननु ताभ्यां किं कार्य
मित्यत आह । ताभ्यां विगृह्य कथनं   अयमर्थः जयीवादैः न तद्दर्शनाभ्यासाहितकुज्ञानैरपरैर्वादिभिः स्वपक्षश्रा
सिध्यनेत्तदा ताभ्यां जल्पवितंडाभ्यां सावधारणं चैतत् अध्यतः पाजिनामो सैयेन तु वाद जल्पवितंडाभिर्यथेच्छं
कथयेदिति भावः वस्तुतस्तु मुमुक्षोर्न तादृशैः सह संवादो वीतरागत्वात् किं शास्त्रपरिपालनमपि न तु हेश्यंनवा
तद्वैयेव शास्त्रं गच्छति किंतु शास्त्रमभ्यसतोऽपि त्वविमति   समाप्तस्तत्वज्ञानपरिपालनप्रकरणं समाप्तं चतुर्था
ध्यायस्य द्वितीयमाह्निकं   इति महामहोपाध्यायश्रीमद्विद्यानिवासभट्टाचार्यात्मजश्रीविश्वनाथसिद्धा
न्तपंचाननभट्टाचार्यकृतायां न्यायसूत्रवृत्तौ चतुर्थोध्यायः   नत्वा शंकरचरणौ दीनस्य दुर्गमे तरणौ । संक्षेपात्
निरूपयामः पंचममध्यायमतिगहनं अथ जातिनिग्रहस्थानयोर्हि दृष्टयोर्लक्षितयोर्बहुत्वं तद्विक
ल्पाज्जातिनिग्रहस्थानबहुत्वमित्यनेन न सूचितं वलवाच्छप्रिसूत्रितासानुसारिप्रमाणादिपर्व्हीस्यंतारितं

६ पेश

८१

४।

संप्रत्यवसरतः प्राप्तं च नीयं तत्र च वं जातिपरीक्षासहितजातिनिग्रहस्थानविशेषलक्षणमध्यायार्थः। जाति
परीक्षासहितजातिविशेषलक्षणं प्रथमाह्निकार्थः। अत्र दशवाक्यप्रकरणानि तत्रादौ सत्प्रतिपक्षदेशना
भासप्रकरणं अन्याप्तिवय व्याख्यानं वक्ष्यते तत्र च विशेषलक्षणार्थं जातीर्विभजते साधर्म्यवैधर्म्यो
त्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्व
र्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः। अत्र च साधर्म्यादीनां कार्यान्तानां द्वंद्वे
तेः समा इत्यन्वयो न साधर्म्यसमादयः चतुर्विंशतिर्जातय इत्यर्थः। अत्र च जातेर्विशेषत्वात् समाशब्दं मत्वं नैभा ध्य ६
ष्यवार्त्तिककारौ तु समशब्दः प्रत्येकं मसूत्रे तु समसमशब्दौ मिथ्याविवादं एव तत्र च जाति शब्दस्पष्टी लिंगेन साध
र्घपि नान्वयस्तथापि प्रतिषेधो विशेष्य इति भाष्यादयः। वयं तु तद्विकल्पादि सूत्रस्य विकल्पसे च
पि विशेष्यत्वं चिंत्यः कल्पः प्रकाशे विकल्पस्तर्याचेत साधर्म्यसमादयो जातिविकल्पा एवमग्रिमसूत्रे एम०
र्घपि इत्येव जातेर्विशेष्यत्वे साधर्म्यसमेत्यपीति क्रमः समीकरणार्थं प्रयोगः समरति वार्त्तिकं यद्यपि ८१

नैतावता समीकरणं तथापि समीकरणोद्देश्यकत्वमस्त्येव अथवा साधर्म्यमेव समं पञ्च साधर्म्यसमः एक
त्वान्तराक्षिकेऽपि साधर्म्यसममेवेति भावः। सूत्रवज्जातिपरीक्षासहितजातिनिग्रहस्थानविशेषलक्षण
(व्याख्यायार्थः तत्र तावद्विपरीक्षासहितजाति। शेषलक्षणं च प्रथमाह्निकार्थः। सप्रदर्शनाप्रकरणानि तत्रादौ
सत्प्रतिपक्षदेशनाभासप्रकरणं अन्यानि च यथापर्यवसितं चेति) साधर्म्यवैधर्म्यसमौ लक्षयति साधर्म्यवैध
र्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ। उपसंहारः साध्यस्योपसंहरणं वादिना कृते
तद्धर्म्मस्य साध्यस्य धर्म्मस्य यो विपर्ययो व्यतिरेकः तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यां
मुपपादनं ततो हेतोः साधर्म्यवैधर्म्यसमावुच्येते इत्यर्थः वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधि
ते प्रतिवादिनः साधर्म्यमात्रप्रयुक्तेन हेतुना तदभावापादनं साधर्म्यसमा वैधर्म्यमात्रप्रयुक्तहेतुना तदभावापा
दने वैधर्म्यसमा। तत्र साधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वात् घटवत् व्यतिरेकेण वा व्योमवदित्यु
पसंहृते नैतदेवं यद्यनित्यघटसाधर्म्यान्नित्याकाशविशेषवैधर्म्याद्वाऽनित्यः स्यान्नित्याकाशसाधर्म्या

म

८२

दमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्यः। वैधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वात् घटवत् अत्राकाशव
द्वेति स्थापनायां अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्य इति अत्र साधर्म्यमात्रं वैधर्म्य
र्म्यमात्रं चागमकं तत्रोपाधिकमित्यभिमानात्। सत्प्रतिपक्षदेशनाभासे चेमे अनैकान्तिकदेशनाभासे नि
वान्निके त्वनैकान्तिकपदं योगात्तत्र प्रतिपक्षपांसकोनातः साध्यसाधकत्वाभावात् अनयोः समुत्तर
त्वबीजमाह गोत्वाद्गोसिद्धिवत्तत्सिद्धिः। गोत्वात् गोसिद्धिर्गोव्यवहार इति संप्रदायः। वयं तु गोत्वा
रूपेतरासमवेतत्वे सति गोसमवेतत्वान्न साध्याहितः एतेन व्याप्तिपक्षधर्मते दर्शिते गोर्गोत्वस्ता
दात्म्येन तो गोरेव वा सिद्धिपर्यायतया च कृतकत्वादपि व्याप्तिपक्षधर्मतोपाहितादनित्यत्वसिद्धिर्न
तु व्याप्तिपक्षधर्मतारहितात्साधर्म्यादिमात्रादन्तेषामसतीत्यष्टषट्कसाधर्म्यान्तर्भेदपरत्वादित्यसद्वचनम
प्यष्टषट्कसादिसर्पयविशेषः। इति सत्प्रतिपक्षदेशनाभासप्रकरणम्। क्रमप्राप्तं जातिषट्कं निरूप
यति साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यस

राम०
८२

म१

माः। उत्कर्षेण समः उत्कर्षसमः एवमपकर्षसमोपि वर्ण्यावर्ण्यसाध्येति भावः वक्ष्यमाणो निर्देशः वर्ण्यत्वादिना स
मो वर्ण्यसमादिरिति हृद्भावोऽवर्ण्यत्वविकल्पौ हेतुविधेयसाध्यत्वं यथा वर्ण्यत्वं च साधनीयत्वं साध्यदृष्टांतयोर्धर्म
विकल्पाद्विविधं वानानुमानबीजं उभयसाध्यत्वादिति षष्ठस्यांतस्य पमर्थः साध्यतेऽनेनेति साध्यं पक्षः तथा
च साध्यदृष्टांतयोरिति पक्षदृष्टांतान्यतरत्र विक्षिप्तार्थः धर्मविकल्पो धर्मोऽस्त्येवेति चिन्त्यं ततश्च क्वचित्सत्त्वं
क्वचिदसत्त्वं शक्यते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात् सत्त्वाद्योऽरूपस्य धर्मस्य धनान्यतरविकल्पा
त्संशयो ऽविद्यमानधर्मारोपः उत्कर्षसमः अपकर्षसमः व्याप्तिमत्पुरस्कृतान्यपक्षदृष्टांतान्यतरस्मिन् साध्यसा
धनान्यतरेणाविद्यमानधर्मसंजननमुत्कर्षसमः इति फलितार्थः यथा शब्दोऽनित्यः कृतकत्वादित्यादि स्थाय
नायां अनित्यत्वे कृतकत्वं घटे रूपसहचरितमतः शब्दोपि रूपवान् स्यात् तथा च विवक्षितविपरीतसाध
नादि दोषविशेषो हेतुसदेशनाभासावयं वंध्या यथा शब्दसाधर्म्यात् कृतकत्वात् घटोपि श्रावणः स्या
द्विशेषाभावात् तस्य घटे श्रावणत्वाभावादनेऽयं तरमत उत्कर्षलक्ष्ये सोदृष्टांतपदं साध्यपक्षेऽध्येदं पंच

यस्त्कर्षसमायां तु धर्म्मविकल्पः धर्मस्य सहचरितधर्म्मस्याविकल्पोऽसत्त्वं ततोऽपकर्षः साध्यसाधनान्यत
रस्याभाववशसंजननं तु यावपक्षे दृष्टान्तान्यतरस्मिन् व्याभिमपुरस्कृत्य सहचरितधर्माभावेन हेतुसाध्यान्यतरा
भाववशसंजननमपकर्षसमा यथा शब्दोऽनित्यः अनित्यः कृतकत्वादित्यत्र यघनित्यत्वसहचरितघटधर्मो न
कृतकत्वाद् नित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मेरूपचत्वस्याव्यत्याशब्दे कृतकत्वस्या
नित्यत्वस्य च व्याप्तिर्नस्यात् अघटे सिद्धिदेशनाद्वितीयेवा घटेशना एवं शब्दे कृतकत्वसहचरितश्रा
वणत्वस्य संयोगाद्यावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्या घटेऽनित्यत्वकृतकत्वे च
व्यावर्त्तेते इति दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासापीयं यत्तु वार्त्तिके शब्दो नीरूप इति घटोऽपि नीरूपः
स्यादित्यपकर्ष इति तन्न हस्तन घटे नीरूपत्वापादनस्यार्थान्तरत्वात् आचार्यस्वरसोऽप्येवं वर्णहेतुवेधर्म्यसमा
या त्वत्रैवान्तर्भावः स्यादिति तन्न उपधेयसंकरेऽप्युपाधेरसंकरात्। वर्ण्यसमायां तु साध्यः सिद्धभा
ववाहसंदिग्धसाध्यकादिर्वर्णनस्य धर्म्मः संदिग्धसाध्यकादिर्वर्ण्ये हेतुमत्स्याविकल्पात्सत्त्वात् दृष्टा

नैवर्ण्यत्वस्य संदिग्धसा साध्यकत्वस्यापादनं वर्ण्यसमा तदुपमर्षः पक्षदृष्टान्तैर्हेतुर्हि गमकः पक्षस्य संदिग्ध
कत्वं तथा च संदिग्धसाध्यकदृष्टान्तैर्हेतुरुद्भावयाद् दृष्टान्तेऽपि स्वीकार्यत्वं तथा च दृष्टान्तस्यापि संदिग्धसाध्यकत्वात्स
यस्तहीनत्वान्निष्पादसाधारणो हेतुरुक्तदेशत्वाभासा [illegible] चेऽपि हेतुः संदिग्धसाध्य
कदृष्टान्तैर्यदि न दृष्टान्तेन तदा गमकहेत्वाभावात् साधनविकलो दृष्टान्तः स्यादिति भावः। अवर्ण्यसमायां
तु हेतुदृष्टान्ते सिद्धसाध्यके यो धर्मो हेतुत्वस्य सत्त्वात् पक्षेऽशाद्याद्यावसंदिग्धसाध्यकत्वापादनमवर्ण्यसमा
दृष्टान्ते हेतोर्यो दृष्टान्तेन तादृशो हेतुरेव गमक इत्यभिमानेन एवमापादनं दृष्टान्तेऽपि हेतुः सिद्धसाध्यकदृष्टान्तैः
स चेन्न पक्षे तेन गमकहेत्वभावान्न स्वरूपासिद्धिः स्यादत्राह यो हेतुरवश्यं पक्षत्वाभिमते स्वीकार्यस्त
स्य च संदिग्धसाध्यकत्वलक्षणायस्तुनाभावादाश्रयासिद्धिः असिद्धिदेशनाभावेऽपि। विकल्पसमायां तु प सा २
क्षे दृष्टान्ते च यो धर्मस्तस्य विकल्पो विरुद्धः कल्पो व्यभिचारित्वं उपलक्षणं चैतत् अन्यदृष्टान्ते धर्मस्यापि व्यो
र्ध्यं व्यभिचारेऽपि हेतोर्धर्म्यन्तरं प्रति धर्मान्तरस्य सा साध्यं प्रति धर्मान्तरस्य धर्मान्तरं प्रति वा तथा च कास

८५ विरुद्धमैसपक्षेपिचद्धात्रिचीध्यं व्यभिचारेऽपिहेतोर्धर्मोतरं इति धर्माव्यभिचारदर्शनेन धर्मत्वाविशेषात शक्तो हे
तोः शक्यसाध्यं शृंगि व्यभिचारापादनं विकल्पसमाय याशाहेोऽनित्यः कृतकत्वात्‌ त्वात कृतकत्वस्य गु
त्व३ रुत्वव्यभिचारदर्शनाद्गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्यापि गुरुत्वव्यभिचारदर्शनाद्धर्मत्वावि
शेषात्कृतकत्वमप्यनित्यत्वं व्यभिचरेदित्यनैकांतिकदेशनाभासावेयं पक्षदृष्टांतादेः शक्तसाध्य
५ प्र समानत्वापमाशयः एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वेन तथा च पक्षादेरनुमितिविषयत्वान्न साध्यव
देतत्प्रयोगसाध्यत्वं अतः साध्यमानतया हि पक्षादेः पूर्वं सिद्धत्वे एतत्प्रयोगसाध्यत्वाभावान्नानुमितिवि
षयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्ध्यादयस्तद्देशनाभासा एवेयं प्रसूत्रार्थः स्तु उभयसाध्यत्वान्नते
उभयं यस दृष्टांतो तद्धर्मो हेत्वादिश्च तन्न साध्यं नत दर्शीनानुमितिविषयत्वं साध्यस्यैव पक्षादेरपीति तुल्य
तापादनमिति। लिंगोपहितभानियमतो लिंगस्याप्यनुमितिविषयत्वात साध्यसमत्वं हेतोश्च साध्यत्वे हे
तुमानदृष्टांतोऽपि साध्य इत्याशयः। एतासामसदुत्तरत्वे बीजमाह किंचित्साधर्म्यादुपसंहारसिद्धेर्वै

३ साधक

धर्म्मोऽप्रतिषेधः। किं चित्साधर्म्यविशेषान्न्यूँ [illegible] न्निसहिताद्रुपक्षे हारसिद्धेः साध्यसिद्धेर्वे
धर्म्मादेतोऽहेतयोरीतान्यूव्याप्तिनिरपेक्षसाधर्म्यमात्राङ्गवत्ताकृतः प्रतिषेधो न संभवतीत्यर्थः अन्यथाऽप्रमेयत्वद्
यो साधर्म्यात्सहृषणामप्यसम्यक्त्वादिति भावः। तथा वायं क्रमः। अनित्य [illegible] त्वव्याप्यात्कृतकत्वा
च्छद्धे नित्यत्वमुपसंहारमाणेन तु कृतकत्वं तथस्यापि व्याप्यं येन ततो रूपमप्यापादनीयं शब्दे एवं अनित्यत्वन
रूपव्याप्यं येन तथाभावादनित्यत्वाभावः शब्दे स्यात्। एवं वर्ण्यसमेऽपि किंचित्साधर्म्यमप्यन्तावच्छिन्नाद्धे
तोः साध्यसिद्धिः तादृशाभावादनित्यत्वाभावः शब्दे हेतुमत्त्वं च दृष्टान्ततावच्छेदकं तत्तु पक्षे याचितद्विशेष
णावच्छिन्नो हेतुस्तावदवच्छिन्ने हेतुमत्त्वं अन्यथा त्वयापि दूषणोपादृष्टान्तीकर्तव्यः सोऽपि न स्यात् एवमवर्ण्य
समेऽपि व्याप्याज्ञाच्छेदकावच्छिन्नदृष्टान्तदृष्टस्य पक्षे सत्त्वात् साध्यसिद्धिर्न तु दृष्टान्तवृत्तियावद्धर्मावच्छि
न्नस्य पक्षे सत्त्वं। एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिः लद्धेर्धर्म्योपगत किं
चिद्व्यभिचारात्कृतः प्रतिषेधो न संभवति न हि यत्किंचिद्व्यभिचारादेव प्रकृतहेतोः प्रकृतसाध्यसाधक

वच्छेदका ५
तादृशा ६

८५

85

न्वमग्निवत्संमानाः सर्वं साध्यसमोऽपि व्याप्याद्धेतोः। सिद्धे पक्षे साध्यसिद्धिर्न तु पक्षदृष्टान्तयोरप्यन्वयेन सा
ध्यं। तेन यथा सत्त्विक्वचिदपि साध्यसिद्धिर्न स्यात्तत्त्वद्वीयं दूषणमपि विलीयेत। वर्ण्यावर्ण्यसाध्यसमासु मा
ध्यंतरमप्याह तत्साध्यातिदेशाच्च दृष्टान्तोपपत्तेः। दृष्टान्तोपपत्तिर्दृष्टान्तत्वोपपत्तिः साध्यातिदेशात् दृष्टान्ते हि
साध्यमतिदेश्यते तेनोवैते व दृष्टान्तत्वमुपपद्यते नन्वशेषधर्मैः पक्षदृष्टान्तयोरभेदाय ज्ञेः पक्षादेशीयसाध्य
सत्त्वमेतेन प्राप्तत्वं दृष्टोऽन्तो दृष्टान्तः। यस्तः तस्माद्धीहूमानिसंतेयसौ ऽन्कोन्नैनानंतेयथावत्साध्यस्यातिदे
शान्न साधनान्यत्र सत्त्वमवेतेन तु यत्सोऽपि साध्यतेऽतिप्रसंगादिति भावः। समाप्तं जातिषट्कप्रकरणं ॥ क्रम
प्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति प्राप्यसाध्यमप्राप्य हेतोः प्राप्त्याविशिष्टत्वात् प्राप्त्याऽसाधकत्वात् प्राप्त्यप्रा
प्तिसमौ हेतोः साधकत्वमिति शेषः। आक्षिपक्षे दोषमाह प्राप्याश्च विशिष्टत्वादिति द्वयोरपि प्राप्तत्वाविशे
षात् किं कस्य साधकं अप्राप्तिपक्षे दोषमाह अप्राप्येति अप्राप्तस्य साधकत्वेऽतिप्रसंगात्। साधकत्वं
चात्र कारकज्ञापकसाधारणं तथा च कारकज्ञायकलक्षणं साधनं कार्यज्ञाप्यलक्षणेन साध्येन सं

४ प्र।

स २

एम०

८५

४ षा

वद्धं तस्माद्धकं चेन्न दोषसत्वाद्विशेषात्र कार्यकारणभावः तन्मते वंधस्य प्रागेव सत्वात्त्वात्कत्वाप्यनाशकभावः क
स्मिन्नेनाशकत्वं तत्र सिजनकत्वं · तदपि तावत्तेषु चपरस्त्वं कौशम योनेर्जनकभावः प्राप्तत्वेन लवणोदकयोरिवा
भेदादित्याशयइत्यन्ये। तथा वृत्तासाः विशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा प्राप्तिविंशाप्तं लिंगं साध्य
बुद्धिं न जनयति साध्याभाव बुद्धिमेव किं न जनयेत् तत्र प्राप्तत्वाविशेषात्। तथा चाप्राप्तस्यात्र साधकत्वादनिष्टा
पादनमप्राप्तिसमा प्रत्यवस्थानं कृते तत्र देशनाभासे चेमे अनयोरसदुत्तरत्वे बीजमाह घटादिनिष्पत्तिदर्शना
त् पीडने चाभिचारात्प्रतिषेधः दंडादिनो घटादिनिष्पत्तेर्दर्शनात्सर्वलोकप्रत्यक्षसिद्धत्वादभिचारात्
श्येनादिनः शत्रुपीडने चाभिचारतत्त्वदर्शनेप्रतिषेधः संभवति नहि कारणं दंडादि प्रागेव घटादिनासंब
द्धमपि तु महादिनाश्येनादिरस्तु देशपतनपापीडां जनयति एवमन्यथा लोकवेदप्रसिद्धकार्यकारणभावोच्छेदः त्वदुक्तो
हेतुरप्यसाधकः स्यादिति इति प्राप्तिसमं प्रमाजातिद्वय प्रकरणं नानाप्त प्रसंगप्रतिदृष्टांतसमे जाती ल
क्षयति ~~[illegible]~~ दृष्टांतस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टांतेन प्रसंगप्रतिदृष्टांतसमौ दृ

स्य·प्रा २

८६

ष्टांतस्य कारणानपदेशात्प्रत्यवस्थानं प्रसंगसमः ॥ कारणं प्रमाणं अनपदेशोऽनभिधानं अभिधानं चान
तिप्रयोजनकं तथा च दृष्टांतस्य साध्यत्वे प्रमाणाभावात्प्रत्यवस्थानमर्थः यद्यपीदं सदुत्तरमेव तथापि
दृष्टांते प्रमाणं वाच्यं तत्रापि प्रमाणांतरमित्यनवस्थाया प्रत्यवस्थाने तात्पर्यं तदुक्तमाचार्यैरनवस्थाभासः
प्रसंगसम इति एतन्न मनोहरं नो हेत्वंतरमित्यनवस्थापि प्रसंगसम एवं पूर्वमते तु हेत्वनवस्थादिकं वक्ष्य
माणं हि निग्रहस्थानं तदभिमतमिति विशेषः अनवस्थादेशनाभासा चेयं प्रतिदृष्टांतेन प्रत्यवस्थानात्तु पुनः प्र
तिदृष्टांतसमः प्रत्येतव्यः सावधारणं चेदं तेन प्रतिदृष्टांतमात्रबलेन प्रत्यवस्थानमर्थः तेन साधर्म्यसमा
द्भेदः ॥ परिदृष्टदृष्टांतबलेनानित्यः शब्दस्तदाकाशदृष्टांतबलेन नित्य एव स्यात् अनित्यः किं न स्यात्
इति वाक्यः प्रतिरोधो वा यादृशो यः हेतुरनेन दृष्टांतमात्रबलादेव साध्यसिद्धिरित्यभिमानः बाध प्रतिरोधा
न्यतरदेशनाभासा चेयं ॥ प्रसंगसमे प्रत्युत्तरमाह प्रदीपोपादानप्रसंगे लोकसिद्धा युक्तिसिद्धा वा अन्यथा
घटादिप्रत्यक्षाय प्रदीपवत् प्रदीपप्रत्यक्षायार्थमनवस्थितं प्रदीपयस्य परंपरा प्रसज्येतैतच्च दीपसाधनमपि व्या
विनिवृत्तिवत्तद्विनिवृत्तिः ॥ दृष्टांतो हि निदर्शनस्थानत्वेन साध्यनिश्चयार्थमपेक्ष्यते । न तु दृष्टांतानवस्थितपरंपरा २ =

त

एम०
८६

हृत्येत प्रतिदृष्टांतसमेप्यत्तुत्तरमाह प्रतिदृष्टांतहेतुत्वेवनाहेतुर्दृष्टांतः यद्वायमुत्तरक्रमः प्रतिदृष्टांतस्त्व
याकिमर्थमुपादीयते मदीयहेतोर्बाधार्थं साध्याभिपसिततत्त्वार्थं वानाद्यः पक्षः प्रतिदृष्टांतस्य हेतुत्वेचनाहे
(तुर्दृष्टांतः यद्वायमुत्तरक्रमः। प्रतिदृष्टांतस्त्वयाकिमर्थमुपादीयहेतोर्बाधार्थं साध्याभिपसिततत्त्वार्थं वाना
द्यः पक्षः) प्रतिदृष्टांतस्य हेतुत्वे स्वार्थसाधकत्वेमहीयोदृष्टांतः नो हेतुः नासाधकस्तथा च तुल्यबलत्वाद्बा
धः न द्वितीयोपि यतः प्रतिदृष्टांतस्य स्वार्थसाधकत्वेउप्यमानेनाहेतुर्दृष्टांतः मदीयो दृष्टांतस्तत्सदृश
त्वादधिकबलः वस्तुतो हेतुं विना दृष्टांतमात्रेणन सतत्प्रतिपक्षसंभावना न दृभावव्याप्यवत्ताज्ञानाभावात् हे
त्पाधाने तु सदुत्तरत्वमेवेति भावः अस्य च प्रतिदृष्टांतसमप्रकरणम् क्रमप्राप्तमनुत्पत्तिसमं लक्षयति प्रागुत्प
त्तेः कारणाभावादनुत्पत्तिसमः प्रागुत्पत्तेरिति साधनांगस्येति शेषः कारणाभावात् हेत्वभावात्। तथा च सा
धनांगपक्षहेतुदृष्टांतानामनुत्पत्तेः प्राक् हेत्वभावइत्यनुत्पत्त्याप्रत्यवस्थानमनुत्पत्तिसमः यथा घटोनित्यवा
न्गंधात्पटवदित्युक्ते घटोत्पत्तेर्गंधोत्पत्तेश्च पूर्वं हेत्वभावादसिद्धिः पटे च गंधोत्पत्तेः पूर्वं हेत्वभावेन दृष्टा

८१

तासिद्धिः एवमाद्यदूषणेनूयाभावाद्बाधस्यमनुत्पत्त्याप्रत्यवस्थानस्यात्रापि सत्वात् अनुत्पत्तेः पूर्वं हेत्वाद्यभा
वेन प्रत्यवस्थानस्यैव लक्षणत्वात् जातित्वे सत्तीतिविशेषणीयं तेनोत्पत्तिकालावछिन्नो घटो गंधवान् इत्य
त्रबाधेन प्रत्यवस्थाने नास्ति व्याप्तिः असिद्ध्यादिदेशनाभासावेपं   अत्रोत्तरमाह तथाभावादुत्पन्नस्य का
रणोपपत्तेर्न कारणप्रतिषेधः उत्पन्नस्य तथाभावात् घटाद्यात्मकत्वात् तत्रकारणस्य हेतोरुपपत्तेः सत्वात् क
थं कारणप्रतिषेधः पक्षाद्यपक्षेत्वभावोऽसिद्धिः नन्वनुत्पत्ते हेत्वभावः स भवति अधिकरणाभावात् न
हि हेत्वभावमात्रमसिद्धिस्वरूपं हेतोरपि कश्चित् अभावसत्वादेतेन दृष्टान्तासिद्ध्यादिर्व्याख्यातः यदा कदाचिव
द्धेतुसत्वेनैव दृष्टान्तत्वोपपत्तेः एवं हेत्वादीनां यदा कदाचित्सत्वादेव हेत्वादिभावो न तु सार्वकालिको
न दूषणे सेमि अनुत्पत्तिसमप्रकरणं [illegible] संशयसमं लक्षयति सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नि
त्यानित्यसाधर्म्यात् संशयसमः। नित्यानित्यसाधर्म्यादिति संशयकारणोपलक्षणं तेन समानधर्मदर्शनादि
पन्न किंचित्संशयकारणबलात् संशये न प्रत्यवस्थानं संशयसमः। अधिकं तदाहरणपरं न पक्षि शाहोस्वित

एम०
८१

त्यः कार्यत्वाद्घटवदित्युक्ते सामान्ये गोत्वादौ दृष्टांते घटस्यैवेंद्रियकत्वं तुल्यं तथा च यथा कार्यत्वान्निर्णायकत्वमिति
त्यत्वेऽभिर्णीयते तथा सेंद्रियकत्वात्संशयकादनित्यत्वसंदिग्धतां एवं शब्दत्वाद्घसाधारणधर्म्मदर्शनादपि सं
शयो वो ध्यस्तथा च हेतुज्ञाने ऽसाधारण्यज्ञो काध्यान ह्यासाध्यसंशयात्सपक्षविपक्षदेशनाभासेपं स्वत्रोत्तरं सा
धर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽनंतसंशयप्रसंगो नित्यत्वानभ्युपगमाच्च सामान्यस्या
व्यतिरेकः साधर्म्यात्साधर्म्यदर्शनात्संशयस्यापादमानेऽपि न संशयः वैधर्म्याद्वैधर्म्यदर्शनाद्यदि च कार्य
त्वरूपविशेषदर्शनेऽपि संशयस्तदाऽनंतसंशयप्रसंगः संशयानुच्छेदप्रसंगः न च तथाभ्युपगंतुं शक्यमि
त्याह नित्यत्वेति सामान्यस्य समानधर्मदर्शनस्य नित्यत्वानभ्युपगमान्नित्यसंशयजनकत्वानभ्युपगमान्न तथा
सति नित्यदोषो हेतुरपि न परपक्षप्रतिषेधकः स्यादिति भावः सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमात् नित्य
त्वानभ्युपगमप्रसंगात् ज्ञेत्रापि साधारणधर्मेऽभ्युपगत्वादिना संशय एव स्यादिति केचिद्वत् संशयसमप्र
करणं क्रमप्राप्तं प्रकरणसमं लक्षयति उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः उभयसाधर्म्यात्प्रत्यय

सहचाराद्व्यतिरेकसहचाराद्वा प्रकृते पावकोष्णक्रियासाधनं विपरीतसाधनमिति फलितार्थः ॥ असिद्धेस्तस्य
पूर्वमेव सिद्धेस्तथा चाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः ॥ यथा शब्दो नित्यः
कृतकत्वादित्युक्ते नैतद्देवं श्रावणत्वेन नित्यत्वसाधकेन वा धात् बाधदेशनाभासश्चेयं अत्रोत्तरमाह प्रतिप
क्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतियक्षोपपत्तेः ॥ प्रतियक्षाद्विपरीतसाध्यसाधकत्वेनाभिमतात्
श्रावणत्वादिनः प्रकरणसिद्धिद्वारा मदीयपक्षस्य यः प्रतिषेधस्त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिप
क्षोपपत्तेः त्वत्पक्षोपि मया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात् अपि माशयः श्रावणत्वेन पूर्वं नि
त्यत्वस्य साधनाद्बाधउच्यते मनोपपद्यते पूर्वं साधितत्वस्य बलत्वाभावात् कदाचित् कृतकत्वेनानित्य
[illegible] त्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोपि स्यात् प्रकरणसमप्रकरणं क्रमप्राप्तमाहे
तुसमं लक्षयति त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ त्रैकाल्यं कार्यकालतत्पूर्वापरकालाः तेन हेतोरसि
द्धेः हेतुत्वासिद्धेः अयमर्थः दण्डादिकं घटादेर्न पूर्ववृत्तितया कारणं तदानीं घटेरभावात् कस्यका

अ६

२१ ८३

रणं स्यात् एवं न घटः अन्तरकालवर्त्तित्वात् यथापि न वा समानकालवर्त्तित्वात् वा तुल्यकालवर्त्तिनोः सव्येतरविषाण
णयोरिव विनिगमनापत्तेः तथा च कालसंबंधखंडनेनाहेतुतया अन्यथा स्थानमहेतुसमः । कारणमात्रखं
डनेन साध्यहेतोरपि खंडनात्तत्संग्रहः प्रतिकूलतर्कदेशनाभासश्चेयं अतोत्तरमाह नहेतुतः साध्यसिद्धेस्त्रै
कालासिद्धिः त्रैकाल्यासिद्धिर्हि त्रैकाल्येन पाशसिद्धिः तत्का सा न कुतः हेतुतः साध्यसिद्धेस्तथाभूतगमात् ।
पूर्ववर्त्तित्वमात्रेणैव हेतुत्वसंभवात् अन्यथा त्वदीयहेतोरपि साध्यं न सिध्येदित्याह प्रतिषेधानुपपत्तेश्च
प्रतिषेद्धव्याप्रतिषेधः । हेतुफलभावखंडने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रति
षेधकत्वमर्थः अहेतुसमप्रकरणम् । क्रमप्राप्तमर्थापत्तिसमं लक्षयति अर्थापत्तितः प्रतिपक्षसिद्धेर
र्थापत्तिसमः अर्थापत्तिरर्थापत्त्याभासः तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्था
नमर्थापत्तिसमः अयमाशयः अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति तत्र यावशोनुक्तो नित्यश्चेत् तेनोक्ते ऽ
र्थो दृष्टान्तः पक्षेऽन्यस्मिंस्त्यक्त तथा च दृष्टान्तासिद्धिर्विरोधः स्फुटतया तत्कृत्वादनित्यश्चेत्तेनो ऽर्थो दृष्टान्तमत्र ममास्या

६

भासान्वेयं ॥ अन्त्रोत्तरं ॥ अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तस्याहने कांतिकत्वाच्चार्थापत्तेः ॥ द्वि

८९ 89

हेतोर्नित्यइति बाधः सतु प्रतिपक्षो वाऽनुमानादनित्यइत्युक्तौऽर्थादापन्नं प्रत्यक्षान्नित्यइति च बाधः विशेष
विधेः शेषनिषेधफलकत्वमित्यभिमानः सर्वेदोषदोषदेशानामनुक्तौ नानुक्तं पतन् किंचिदेवार्थादापद्य
त उक्तोपपादकं वाध्याहार्यं त्वन्यत्र हानिरर्थापत्तानुक्तत्वात् अन्त्ये स्तस्यार्थापत्तेरनैकांतिकत्वं ए
कांतिकत्वं स्वकार्यस्य साधकत्वेन नास्तिनहि अनित्यसाधकं नित्यत्वमिति नहि विशेषविधिमात्रं शे
षनिषेधफलकमपि तु सति तात्पर्ये क्वचिदेव हि नीलो घट इत्युक्ते सर्वमन्यदनीलमिति कश्चित्प्रतिपद्यते
णं अर्थापत्तिसमप्रकरणे अविशेषसमं लक्षयति एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसंगात् सद्भावोप
पत्तेरविशेषसमः एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्वाद्यदि[illegible] शब्दघटयोरनित्यत्वेनाविशे
षवच्चेत्तदा सर्वेषामविशेषः प्रसंगः कुतः सद्भावोपपत्तेः सतः सन्मात्रस्य भावधर्मोः सत्वप्रमेयत्वाद्य
स्तेषामुपपत्तेः सत्वात् तथा च सर्वेषामभेदे पदार्थविभागः सर्वेषामेकजातीयत्वेऽवांतरजात्युच्छेदः सर्वेषा
मनित्यत्वे जात्यादिविलय इत्यादि तथा च सन्मात्रवृत्तिधर्मेणाविशेषापादनमविशेषसमेतिफलितं

एम० ८९

स्त्रत्वाविशेषसमः इति लक्षणनिर्देशः सद्भावोपपत्तेः सर्वाविशेषप्रसंगात् इति लक्षणशेषं व्याख्यास्यादर्कं प्रलत
कदेशनाभासाचेयं अस्योत्तरमाह क्वचित्तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः तद्धर्मः स्वसहेतो
र्धर्मो व्यासादिः तस्य क्वचित् कृतकत्वादेः उपपत्तेः सत्त्वात् क्वचित् तत्त्वादेः अनुपपत्तेः अभावात् प्रकृतस्य
प्रतिषेधस्याभावः असंभव इत्यर्थः क्वचित् कृतकत्वादेः उपपत्तेः सत्त्वात् क्वचित् तत्त्वादेः अनुपपत्तेः अभावा
त् प्रकृतस्य प्रतिषेधस्याभावः असंभव इत्यर्थः अविशेषसमं प्रकरणं उपपत्तिसमं लक्षयति। उभयका
रणोपपत्तेः उपपत्तिसमः उभयपक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्योपपत्तेः सत्त्वात् तथा चव्या
प्तिमत्तरस्य तत्पक्षे किं विरुद्धधर्मेणापरपक्षस्य दृष्टान्तेन स्वपक्षसाधनेन प्रत्यवस्थानं उपपत्तिसमः यथा शब्दो
ऽनित्यः कृतकत्वादित्युक्तेऽपि यथा त्वन्यपक्षे नित्यत्वे प्रमाणमस्ति तथा मन्यपक्षेऽपि प्रमाणं कः त्वन्यसं
मन्यस्यान्पतरस्य त्वात् तत्त्वस्य स्ववर्गतः यथाचवाधः प्रतिरोधोवा तद्देशनाभासावेयं अस्योत्तरमाह उपपत्ति
कारणाभ्यनुज्ञानादप्रतिषेधः अपं त्वनुमानस्य प्रतिषेधोन संभवति कुतो मन्यस्योपपत्तिकारणस्य

मत्यस्य साधकप्रमाणस्य त्वयाऽभ्युपगतानात्त्वयापि हि मत्पक्षस्य दृष्टांतीकरणेन प्रमाणत्वमभ्युपगतमतः
कथं तत्प्रतिषेधः शक्यते ~~कर्त्तुं कर्त्तुं~~ कर्त्तुं अनुज्ञातस्यापि प्रतिषेधे तथैव किं न प्रतिषिध्यते अपि च प्रति
समर्थकरणोपलब्धिसमं लक्षयति निर्दिष्टकारणाभावेऽप्युपलब्धिसमः। वादिना निर्दिष्टस्य कारणस्य
साधनस्याभावेपि साध्यस्योपलंभात् प्रत्यवस्थानं उपलब्धिसमः इत्यर्थः। तथाहि पर्वतो वह्निमान् धूमादि
त्याहि कैश्चिदवधारणार्थं उच्यते न चैतत्सम्भवति धूमं विना आलोकादितोऽपि वह्निसिद्धेः। तथा चैतस्य साध
कत्वमिति प्रतिकूलतर्कः। न वा धूमाद्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात्। न वा पर्वत
एव वह्निमान् पर्वतस्यापि सत्वाद्बाधः इत्यादितद्देशनाभासा चेयं अत्रोत्तरमाह कारणान्तरादपि तद्धर्मो
पपत्तेरप्रतिषेधः। कारणान्तरात्साधनान्तरात् आलोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्तदुक्तः प्र
तिषेधो न संभवति अप्रमाणात्। न हि वयमवधारणार्थं वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे अपि तु संदि
ग्धस्य वह्नेः सिध्यर्थं अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यात् साधकतासाधकेतरस्यापि स

नुपलब्धेरप्य ५

त्वान्न उपलब्धिसमप्रकरणं अनुपलब्धिसमं लक्षयति तदनुपलब्धेरनुपलंभादभावसिद्धौ तद्विपरीतोपप
त्तेरनुपलब्धिसमः ।५। यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च तथाप्यनुपलब्धिसमा जातिरेवमिति तत्राप्युक्ते
रत्रक्रमप्राप्ताभिधीयते तत्राद्यं क्रमः नैयायिकेः स्तात्रवद्द्रव्याणि त्यमेवं साध्यते यदि शब्दो नित्यः स्यादुच्चारणात्प्रा
क्कुतो नोपलभ्यते न हि घटादावावरणकुड्यादिवच्छब्दस्यावरणमस्तीति तदनुपलब्धेरभिन्नत्वैवं जातिवादी वक्त्य
वति छन्ने यथावरणानुपलब्धेरावरणाभावः सिद्ध्यति तथा आवरणानुपलंभादावरणानुपलब्धेरप्यभावः सि
द्धो न यथावानुपलब्धिप्रमाणकत्वावरणाभावो न स्यादपि त्वावरणो यथा निरेव स्यादिति शब्दानित्यत्वे नोक्तं वाधकं
उक्तं मन्वेनुपलब्धान्तरानपेक्षणात्तत्कथमेवमिति चेद्दृ[illegible]त्यं अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणात्स्वयमेवस्व
स्मिन्ननुपलब्धिरूपेतिवा व्यंतथांतये वानुपलभ्यानुपलब्धित्वसंभवान्नदभावसिद्धेः स्वान्मनानुपलब्धिरूपत्वा
भावेऽनुपलब्धित्वमेव न स्यात् अनुपलब्धेरनुपलब्ध्यन्तरापेक्षणे न वस्यास्सहेच यत्त्वं चैवं रूपेणाभावत्यवस्था
नमनुपलब्धिसमइत्यर्थः अतिक्रान्तकं देशनाभासावेप अन्योन्यरमाहा अनुपलंभात्मकत्वादनुपलब्धेर

नुपलब्धे
२७

हेतुः अनुपलब्धिः स्वात्मन्यनुपलब्धिरिति कोऽर्थः स्वयमनुपलब्धिरूपेति चेत् भवत्येव स्वविषयिण्यनुप
लब्धिरिति चेत् नेदं युक्तं अनुपलब्धेरनुपलम्भात्मकत्वात् अभावस्य च निर्विषयकत्वात् स्वात्मन्यनु
पलब्धित्वाभावे अनुपलब्धित्वमेव कथमस्या इति चेत्कतमो विरोधः न हि घटः स्वविषयो न भवतीति नायं घ
ट आवरणाभावः कथमनुपलब्धिविषय इति चेत् एवमाह किं त्वनुपलब्धिसहकृतेन्द्रियग्राह्यत्वादनुपलब्धि
ग्राह्यत्वमुपचर्यते अत एवानुपलब्धेरनुपलम्भादित्यादिकमहेतुः अन्यथा त्वत्साधनमपि दोषानुपलब्धे
रनुपलम्भात्मदोषमेवस्यादिति ननु अनुपपत्तेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिद्ध्येदत आह
ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मं अध्यात्मं आत्मन्यधिष्ठितानां विकल्पानां ज्ञानविशेषाणां भा
वाभावयोर्मनसा संवेदनात् घटं साक्षात्करोमि न साक्षात्करोमि वह्निमनुमिनोमि नानुमिनोमीत्येवं ज्ञान
विशेषतद्भावाभावानां मनसैव संग्रहत्वादिति भावः अनुपलब्धिसमप्रकरणं अनित्यसमं लक्षयति साधर्म्या
त्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसंगादनित्यसमः यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात्तेन सह तुल्यध

र्मतो यथ घत इत्यत: शब्देऽनित्यत्वं साध्यते महासर्वस्यैवानित्यत्वं स्यात् सत्वादिरूपसाधर्म्यसंभवात् न चे
दं नयोंतरं यत्नानिति वाच्यं सर्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणोत्तात्पर्यात् परस्यान्वयव्यतिरेकि
त्वानुमानत्वादित्याशय: ।। तथा शय: ।। तथा च व्याप्तिमनुरस्कृत्य यत्किंचित्तद्धर्मेण साधर्म्येण सर्वस्य सा
ध्यवत्वापादनम् अनित्यत्वसाध्ये पक्षादविशेषसमाजातेषवृच्छेदस्तैसर्वाविशेष एवापाद्यते न तु सर्वस्य सा त्र ४
ध्यवत्त्वं पन्नु अनित्यत्वेन समानित्यसमेति भावप्रधानो निर्देश: कथा च अत्र पर्वतो लक्षणमेव न लक्षणमिति नन्व
वह्निमान् धूमादित्यादौ महानसाधर्म्याद्य सत्वात् सर्वस्य वह्निमत्त्वं स्यादित्यस्याजात्यन्तरत्वापत्ते: आवाप्तौ
सकसाधर्म्यवैधर्म्यसामुपपत्तेस्त कंपयाऽकाशवैधर्म्यात् हात्तकात्वा । छेद्दे ऽनित्यस्त्याकाशवैधर्म्योदाका
शभिन्नत्वादित: सर्वस्यानित्यत्वं स्यादित्यपवलक्षणेयत्किंचिद्धर्मेणापवाच्यमित्याहु: ।। अत्र च वैधर्म्यस्यावि
पक्षाद्भिन्नत्वात् सर्वस्य साध्यवत्त्वापादनं किंत्वात्मादीनामप्यनित्यत्वं स्यादित्यनन्तरं चार्थान्तरमित्यवधे
यं प्रतिकूलतर्कदेशनाभासा चेयं तत्रोत्तरमाह साधर्म्यादिति सिद्धे: प्रतिषेधात्साधर्म्यान्तरं यदियत्किंचि

प्रतिषेधासिद्धि: १

९२

स्साधर्म्यात्सर्वस्य साध्यवत्त्वमायातमिति साध्यते ऽन्ये दूषयतः सत्त्वसाधकत्वमभिमतं तत्तदा त्वं ज्ञातत्वमिति षधसा
ध्यसिद्धिः तस्यापि प्रतिषेध्यसाधर्म्येणाप्रहतत्वात्तव्याप्त्येवं साध्यते ज्ञातकत्वं न साधकं दृष्टांते साधर्म्यरूप
त्वात्सत्त्वादिवत्। अयं च त्वदीयो हेतुस्त्वत्प्रतिषेध्येन मदीयहेतुना ज्ञातकत्वेन सत्त्वेन च सह साधर्म्यरूपस
त्त्वादयमपि न साधकः स्यात्। यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितमित्यभिमतं तदा ज्ञात
कत्वे तद्दर्शितं तु सत्त्वं इति विशेषं भ्याह। दृष्टांते च साध्यसाधनभावेन प्र[illegible] ज्ञातस्य धर्मस्य हेतुत्वात्तस्य
चोभयथाभावान्नाविशेषः साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टांते प्रज्ञातस्य प्रमितस्य हेतुत्वात्साध
कत्वात्तस्य हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावा[illegible] त्तम
दीयहेतोः सत्त्वात्। सत्त्वादिना विशेष इति यदुक्तं तन्न भवति॥ अनित्यसमप्रकरणं॥ नित्यसमं लक्षयति
नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः। अनित्यभावः अनित्यत्वं तस्यानित्यस्य सर्वकालं स्वी
कारे ऽनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमः। अयमाशयः अनित्यत्वस्य नित्यमभावः अनित्यत्वं न स्व

न्या० ९२

स्वीकारे ऽनित्यत्वाभावदर्शनयां तस्यानित्यत्वं न स्यात् न हि दंडाभावदर्शायां दंडी मुच्यते ततो ऽनित्यत्वं नित्य
मेवास्तीत्यभ्युपगंतव्यं तथा च शब्दस्यापि नित्यत्वापत्तिः तेन बाधः सत्प्रतिपक्षो वा तद्दृशनाभासा चेयं एवम
नित्यत्वं यदि नित्यं कथं शब्दस्यानित्यतां कुर्यात् न हि रक्तं महारजनं परस्य नीलतां संपादयति अथ यो नित्यं तद
तद्भावदर्शायामनित्यत्वेन स्यादित्यादिकमूह्यं एतदनुसारेण लक्षणमपि कार्यमित्याचार्याः वयं तु अ
नित्यस्य भावो धर्मस्तस्यानित्यमभ्युपगमे ऽनित्यत्वेनाभ्युपगतस्य नित्यत्वस्यातपस्थापितिः सकर्तृकेत्यत्र अ
नित्यस्थितेर्धर्मः सकर्तृकत्वं तत्र यास्थितो नित्यमुपेयते न चानुचेततदासाध्याभावादृशनो बाधः अथास्थितो
नित्यमेव सकर्तृकत्वमुपेयं तदा स्थिते नित्यत्वं स्यात् इति सकर्तृकत्वविरुद्धं तद्दृशनाभासा चेयमिति सूत्रं अ

ते ति

चोत्तरमाह प्रतिषेधानि[illegible]त्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः प्रतिषेध्यम
त्यत्वे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्दे नित्यत्वं उपपद्यते न हि संभवति अनित्यत्वं नित्यम
स्ति अथ यच्च नित्यमिति व्याघातात् न च नित्यमिति बाधे कालमित्यर्थः तथा च शब्दस्यानित्यत्वे कथं सर्वका

९२

93

अनेककविध
प्रत्यातु ५

त्वमनित्यत्वसंबंध इति वाच्यं सर्वकालमित्यस्य यावत्सत्त्वमित्यर्थः तत्र स्वरूपतः प्रतिषेधो न संभवति
मतान्तरे तु अनित्ये नित्यत्वोपपत्तेर्हेतोः स्वव्याघातः प्रतिषेधव्याघातः सन्भवतीत्यर्थः । नित्यानित्यसमयोः किंभि
न्नमेतल्लक्षणाकरणे किं बीजमिति चेत् इदं अस्य च क्रमः सूनाद्यर्थे को न चेह तथेति स्थापनार्थं । नित्यस
मथ करणं कार्यसमलक्षयति प्रयत्नकार्यानेकत्वात् कार्यसमः प्रयत्नकार्यस्य प्रयत्नेन संपादनीयस्या
नेकत्वात् अयमर्थः शब्दोऽनित्यः प्रयत्नानंतरीयकत्वात् इत्युक्ते प्रयत्नानंतरीयकत्वं प्रयत्नकार्ये घटादौ उपल
नरो यत्नलभ्यमाने कीलकादावपि दृष्टं तत्र हि नीपं न तज्जन्यत्वं साधकमाधेनु असिद्धं तथा च सामान्यतउ
क्ते हेतावनभिमतविशेषविरूपकरणेन व्यवस्थाने कार्यसमो असिद्धदेशनामासौ चेयं । अथवा प्रयत्नका
र्याणां प्रयत्नकर्तव्यानां कर्तव्यप्रयत्नानामिति पाचनादृशानां अनेकविधत्वाद्धान्यस्य व्याघातकस्तु त
त्कार्यसमानत्वात्यावास्याश्रामुनिगणत्वात् सूत्रानुपदर्शितानामपि परिग्रहः तथाच्छन्यत्र हि किं विद्रू
पणं भविष्यतीति शंका पिशाचीसमाकारणभावस्योपकारं नित्यत्वेऽनवस्थोत्पत्त्युपकारसमा इत्या

राम०
९२

कार्य १

कार्यान्यत्वे सयत्नाहेतुत्वमनुपलब्धिकारणोपलब्धेः॥ शब्दस्य कार्यान्यत्वे अकार्यत्वे च ऽप्रयत्नस्याहेतुत्वं अ १=

त १ या ३ २

रिश्चयोत्तरं कारणत्वं इदं चैतस्यान्यथानुपपत्तिकारणमारणादिकमुपपद्यते न च तत्र छद्मस्थेत्यर्थः॥ आत्मैक
जिगणपक्षेऽनुकार्याणां जातीनामन्यत्वेनानाविधत्वे इदमुत्तरं शपत्वस्यत्वदोपदूषणापत्तस्यत्रहेतुत्वं असाधक
नासाधकत्वाभावउपलब्धेः कारणस्य निर्दोषवाकास्यैश्वर्यनिर्दोषवाकाधीनोपपादनो ऽभावाजत्वहाक
सात्वव्याघातकत्वादित्यर्थः कार्यसमप्रकरणं। एवं गावज्ञाजिवादिने मे प्रतिसर्वत्र सदुत्तरे रोगो वोद्धारः कार्य
इत्यभिहितेन देवाभिमततत्त्वनिर्णयविजयफलकत्वकथायाः असदुत्तरे ऽज्ञावनेनुवेध्ययोः संप्रयोगवत्वाभि
मतफलसिद्धिरिति व्यक्त्यादपि तु कथाभासरूपा यावदूपक्षी शिक्षार्थे प्रदर्शयन्ति प्रयतिषेधे विप्रमानो दोषः॥
प्रयत्नानन्तरीयकत्वेन शब्दानित्यत्वसाधये जिज्ञै नैकान्तिकत्वादित्यभ्यो देषः सात्वन्यक्षे पिलुत्यः प्रयत्नाभिव्यंग्य
त्वस्याप्यसाधकत्वान् अथवाऽनैकान्तिकत्वात् साकइति अत्र यायः प्रतिषेधः कार्त्स्न्येनापायदोषः समा
नः नेत्यनैकान्तिकत्वम् सर्वे से वा साधकता साध्यमिति स्वस्ये वा साधकत्वासाधनत्वात् ॥ मतानुज्ञा किं का
यत्ता माममेवं नेत्याह॥ सर्वे चैवं एवं विधमसदुत्तरं सर्वत्रैकजातौ संभवतीत्यर्थः यथाशब्दो ऽनित्यः शब्दत्वादि

प्रमाण
स्य २

त ३

या

स्तन्नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्यादिति साधर्म्यसमायामाकाशसाधर्म्यान्नित्यत्वेऽप्याकाशवद्वृद्धे
परममहत्त्वं स्यादित्युत्कर्षसमा एवमन्यत्राप्यूह्यं यद्यप्यपमतिहेशः षट्पक्ष्यानंतरमेव कर्तुमुचितस्तथापि प्रस्ता
दिकमपि सूच्यपि तमत्रैवोक्तं उभयपक्षसाम्यत्वादौ फलाभावात् षट्पक्षीन्निपक्ष्यादौ वापि तन्नत्कतत्त्वं तुल्यमिति भा
वः तर्हि त्रिपक्ष्यामेव मध्यस्थेन पर्यवसेयोऽपेक्षणास्योद्भावनेकया समानो कुतः षट्पक्षीति चेन्न पुंसां स्फुरणा
वैचित्र्येण तत्संभवात् प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः । तुल्यबलविरोधाद्विप्रतिषेधस्तथा च प्रतिषे
धस [illegible] योविप्रतिषेधस्तत्र प्रतिषेधदोषवद्दोष इत्यर्थः । तथाहि शब्दोऽनित्यः प्रयत्नानंतरीयक
त्वादिति स्थापनावादिनः प्रथमः पक्षः प्रयत्नकार्यानेकत्वात्कार्यसम इति प्रतिवादिनो द्वितीयः पक्षः प्रतिषे
धः प्रतिषेधे यानेकांतिकत्वं तत्तुल्यमिति वादिनस्तृतीयपक्षो विप्रतिषेधस्तत्रापि तैर्थैवानेकांतिकत्वं तत्स
मानदोषोद्भावनं वा चतुर्थः पक्षः पंचमं पक्षमाह प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समा
नदोषप्रसंगो मतानुज्ञा प्रतिषेधं द्वितीयपक्षं सदोषमभ्युपेत्य तन्न मदुक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषे

२ लक्ष

येमदीयपक्षे न त्वत्पक्षे समानं दोषं प्रसंजयतस्तवमतानुज्ञानामकं निग्रहस्थानमित्यर्थः । षष्ठपक्षमाह । स्वपक्षे रणापेक्षोपपत्त्युपसंहारे हेतुर्निर्देशे यश्य परदोषाभ्युपगमात्समानो दोषः । स्वपक्षः स्थापनारूपः प्रथमः पक्षः । तं लक्षीकृत्य प्रवृत्तो द्वितीयपक्षः । स्वपक्षलक्षणा तस्यापेक्षा तस्मादुत्पन्नः दोषानुद्धावनमिति फलितार्थः । तथा च मदीये पक्षे दोषमनुद्धाव्य त्वत्पक्षेऽपि पापादनं कर्तुंप न्यायाहेतुर्निर्दिष्टः । अस्मिन्पक्षेऽपि समानो दोष इति तावता न त्वापि मतानुज्ञा प्रसज्जेवेत्यर्थः । तदेवं षट्पक्षीमुभयोरप्युक्त्वा उदाहरणादयो सिद्धिर्वादितुस्थायनावादीनामिति वाद्विनेसङ्कीर्णेव दूषणानि तथा षट्पक्षी न प्रवर्तत इति । इति षट्पक्षीरूपकथाभासप्रकरणं । इति श्रीविश्वनाथशर्मकृतायां [illegible] न्यायमौक्तिके ग्रन्थे [illegible] निग्रहस्थानविशेषलक्षणाभिधानं तत्र देवग्राह्यकार्थः । अत्र च सप्तप्रकरणानि तत्रादौ न्यायाश्रितनिग्रहस्थानपंचकं भूर्णान्यन्यानि वपत्यास्थानं वक्तुं तेन तत्र विभागोद्देशसूत्रं । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञात

४५

५६

विभअले ८

मपार्थक १

विशेषलक्षणप्र ३

२

९५ 95

भाविशेषोमतानुज्ञापर्यनुयोज्योपेक्षणंनिरनुयोज्यानुयोगोऽपसिद्धांतोहेत्वाभासाश्चनिग्रहस्थानानि
अत्रवः त्वर्थेतेनएतन्निग्रहस्थानानिनत्रनरयस्माएदिनाननुभाषणादिकंलवांहितिसंचरणेनति
रोहिताचसरणंपात्मर्थोलभ्यतइति॥चः॥नच्चास्कचकाएतुक्तसमुच्चयेतेनदृष्टांतेसाधनचैकल्यादीनां
परिग्रहः॥ तत्रक्रमेणप्रतिज्ञाहान्यादीनांलक्षणोपुवक्ष्येषुप्रथमोद्दिष्टांप्रतिज्ञाहानिंलक्षयति प्रति
दृष्टांतधर्माभ्यनुज्ञास्वदृष्टांतेप्रतिज्ञाहानिः॥ प्रतिकूलोदृष्टांतोयत्रसप्रतिदृष्टांतः। स्वपक्षः स्वः स्वीयोदृ
ष्टांतोयत्रसस्वदृष्टांतः स्वपक्षतयाचस्वपक्षेपरपक्षस्यधर्माभ्यनुज्ञाप्रतिज्ञाहानिः स्वयंविशिष्याभिहि
तयोरित्यागइतिफलितार्थः सिद्धांतस्तुस्वयंविशिष्यनाभिहितयाचस्वपक्षेपरपक्षस्यधर्माभ्यनुज्ञाप्रति
ज्ञाहानिः स्वयंविशिष्याभिहितयोरित्यागइतिफलितार्थः सिद्धांतस्तुस्वयंविशिष्यनोभिधीयतइतिना
यसिद्धांतसांकर्यंमेवंपक्षेहेतुदृष्टांतसाध्यतदन्यहानिभेदात्पंचधाभवतियथाशब्दोऽनित्यःऐंद्रियकत्वा
दित्युक्तेप्रत्यभिज्ञयाबाधितविषयोयमित्युक्तेरितेअस्तुतर्हिघटएवपक्षइतिएवंतत्रैवऐंद्रियकत्वा

५२

१५

एम॰
९५

दितिहेतावनैकांतिकत्वादितिप्रयुक्ते च सत्कृतकत्वादितिहेतुरित्युक्तो हेतुदृष्टान्तरएवात्मभूतासत्वस्वर

सान्नयावव्यक्तो एवं पर्वतोच क्लिमान् धूमादयोगोलकवदित्युक्ते दृष्टांतःसाधनविकलइतिप्रयुक्तेऽव्यक्ततर्हि

महानसवदिति एवंमत्रैवसिद्धसाधनेप्रयुक्तेऽव्यक्ततर्हिइंधनवानितिअन्यहानिरुक्तविशेषणहान्यादिर्यथा

नत्रैवनीलधूमादित्युक्तेऽप्यसमर्थविशेषणत्वेनप्रयुक्तेऽव्यक्ततर्हि धूमादितिहेतुरित्यादि प्रतिज्ञांतरंलक्षण

तु प्रतिज्ञातार्थे प्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञांतरं तं प्रतिज्ञातस्यार्थस्य प्रतिषेधे कृते तद्दूषणो

द्दिधीर्षया धर्मस्य धर्मान्तरस्य विशिष्टः कल्पो विकल्पस्तस्माद्विशेषणान्तरादिति फलितार्थः तदर्थस्य

प्रतिज्ञार्थस्य निर्देशः यथोक्तदोषोद्दिधीर्षया पूर्वोक्तविशेषणविशिष्टतया प्रतिज्ञार्थस्य कथनमिति फ

लितार्थः प्रतिषेध इत्यनेनाक्लिष्टसंवरणो विलंबेनापि स्वयं दूषणं विभाव्य विशेषणेन दोष इत्युक्तं प्रति

ज्ञार्थस्येत्युपलक्षणं हेत्वादिरित्यर्थस्य स्पन्नत्वोनोदाहरणान्तरस्तुपनयान्तरनिगमनांतरं च प्रति

ज्ञांतरत्वेनसंग्रहीतं भवति ज्ञांतरं न चेदमर्थान्तरं प्रकृतोपयोगात् न चैवं प्रतिज्ञाहानिः पूर्वोक्त

धन ४

= इदं च पक्षसाध्यविशेषणभेदात् प्रत्येकं द्विविधं। यथा शब्दोऽनित्य इत्युक्ते ध्वनौ बाधेन परेण प्रत्युक्ते वर्णात्मकः शब्दः

पक्ष इति प्रति = १

पर ९६

९६

पर्वतो वह्निमान् १

स्यापरित्यागात् एवं पर्वतादिशब्दो वह्निमान् साध्योऽपि सुरभिमलिनधूमवत्त्वादित्युक्ते असमर्थविशेषणत्वेऽपि न
च परेणाप्युक्ते कस्यापुरुषधर्मं वह्निमानित्यत्र एवं नादशब्दो साध्यः सुरभिमलिनधूमवान् स
वह्निमान् सुदाहरणोऽन्यूनत्वेन प्रयुक्ते समनादशब्दो वह्निमानित्यत्र एवमन्यदप्यूह्यं प्रतिज्ञाविरोधं ल
क्षयति प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः अत्र च प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे तथा च
कथायां स्ववचनार्थविरोधः अविज्ञाविरोधः यथापि काञ्चनमयः पर्वतो वह्निमान् पर्वतः काञ्चनम
य [illegible] वह्निमानुक्तो वह्निमानुक्तत्वात् पर्वतो वह्निमान् काञ्चनमयधूमादित्यादिः सा
दो हेत्वाभासान्तरसांकर्यं तथापि प्रकृते साङ्कर्याद्दोषः न चासंकीर्णस्थानाभावः पर्वतो वह्निमान् यो यो
धूमवान् स निरग्निरित्युदाहरणे निरग्नित्वाप्रसिद्ध्युपनयेव तत्स्तत्वात् एवं निगमनेऽपि बोध्यं प्रतिज्ञासंन्या
संलक्षयति पक्षप्रतिषेधे प्रतिज्ञान्तरं प्रतिज्ञासंन्यासः पक्षस्य साभिहितस्य परेण प्रतिषेधे कृते सति
तत्परिजिहीर्षया प्रतिज्ञाया अर्थस्यापनयनमपलापइत्यर्थः यथा शब्दो नित्यः ऐन्द्रियकत्वादित्यु

थोपनयर

राम०

९६

पुधेपसंकरे ४

क्ते सामान्ये च व्यभिचारे तत्र दोषे परेण शब्दस्तु क्तेक एवमाह शब्दो ऽनित्य इति हेत्वन्तरं लक्षयति अविशेषोक्ते हे
तौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरं अत्र च हेताविति अनेन न हेत्ववयवांशो ऽपि विवक्षितो ऽपि तु साधकांशः स च हे
त्ववयवस्यादुदाहरणादिस्थो वा अविशेषोक्त इति पूर्वोक्त इत्यर्थः विशेषमिच्छत इति सामिप्रायं तेन
परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ विशेषणान्तरप्रक्षेपो न्यहेतुकरणं चा हेत्वपि हेत्वन्तरं तथा च परोक्त
दूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनं हेत्वन्तरं हेतो विशेषणा
दानस्य हेत्वन्तरमिति प्राचः पूर्वोक्ते हेत्ववयवे उदाहरणादौ वा यथा शब्दो ऽनित्यः बाह्येन्द्रियप्रत्यक्षत्वा
दित्युक्ते सामान्ये अनैकान्तिकत्वेन परेणोक्ते सामान्यवत्त्वे सतीति विशेषणं एवं विशिष्टहेतूक्तौ पक्षान्त्ये
प्रत्यक्षं ३ न्द्रियत्वेन दृष्टान्ते त्यमि तदुदाहरणे न च न त्वेन शब्दस्तु नो विशिष्टोक्तौ एवमुपनयादिविशेषणेऽपि समानं अन्यापाश्र
५ ते निग्रहस्थानं च कर्मरणं ॥ अर्थान्तरं लक्षयति प्रकृतादर्थादसंबद्धार्थमर्थान्तरं प्रकृतात् प्रकृतोपयुक्तात् अ
प्रकृतोपयुक्तमिति प्रकृतोपयुक्तमर्थमपेक्ष्य असंबद्धार्थाभिधानमर्थान्तरं प्रकृतानानाकांक्षिताभिधानमिति

२४

जंबं २

६७

९७

फलितार्थः। यथाशह्वोऽनियमः स्तनकान्त्यादिस्वस्काश शेषगुणाः स्वकाकाशसेत्यादि निरर्थकं लक्षयति व
र्णो क्रमेति हैशवन्निरर्थकं वर्णानां क्रमेणानिर्देशो औगउदेशेत्यादिप्रयोगस्तन्तु लोनिर्देशो निरर्थकं निग्र
हस्थानं स्ववाचकथ्यप्रयोगरोहि फलितार्थः वाचकत्वं शक्तत्वाभिन्नूहलहणपाशास्त्र परिभाषया वाचो
ध्येसमपर्वेषव्यतिरेकेणेति विशेषणोपंते न पत्रापभ्रंशेन विवारः कान्नैव्यइति समपचेषस्तत्रापभ्रंशे
नविवारः कान्नैव्यइति समपचेषस्त्रापभ्रंशेन दोषः स्पेति संवरणो मुनदोषइत्युक्तापं अस्यच संभवः
वमाद्याहितइत्यंथे पं अविज्ञातार्थं लक्षयति परिषत्स्विति चादिभ्याचिरभिहितमप्यविज्ञातमविज्ञाता
र्थे चिरभिहितं वादिनेति शेषः। चिरभिधानं चानवधानादिनाऽवीधनि रासापपरिषत्स्विति वा घन्य
नैरेणाविज्ञानेहुनाविज्ञातार्थमिति भावः। तथा वअवहिताविकलब्धुसत्रपरिषत्प्रति वा विरोधानु
कूलोपस्थित्यजनकवाचकसाकाङ्क्षप्रयोगोऽविज्ञातार्थमिति। वाचकेत्यनेनेनिरर्थकापार्थकन्यु
दासः। अत्रच परत्ज्ञानापादने ममजपो भविष्यतीति अमादुक्तिसंभवः। नचपथाकार्यविन्यरोजेतव्य

प

राम०

६७

रस्यैरौनापादनंन्यायप्राप्तमेवेतिवाच्यंतथासतिभंगकालेपरमाणुर्वोर्वैयत्किंचिदभिधानेनैवसर्वेजगपंसंभ
वात्। एतत्सर्वेधासंभवः असाधारणत्वेनाभ्युपगमसिद्धं। यथापंचस्कंधात्मकोपोद्घातानांज्ञानरूपालयः पंचेंद्रि
माणावरूपस्कंधः सविकल्पकंसंज्ञास्कंधः रागद्वेषाभिनिवेशाः संस्कारस्कंधः। सुखदुःखेवेदनास्कं
धः निर्विकल्पकंज्ञानसंवंधः द्वितीमतिचसज्ञयोगममैनयेल्लितत्रूटिकंपतनपाशूतिद्वेतुरयंत्रि
नयननयनसमाननामधेयवान्तत्केतुमन्वादितनीयंषिन्निहृंयथाश्वेतोधावतीत्यादि एवंअतिदु
नोचरितादिकपीतिमाध्यंचवनोपसंभवउभयंतंचाभिनेतंमध्यस्थमतिउभयातंच्चाभिज्ञयोरेवंवि
चारसंभवादितिचेत्तन्न। तथापिपचैनेयायिकमीमांसकयोविचारेअपतरीबोद्धतंत्रादिपरिभाव
यावदंतितत्रनियहहइस्याशयः ॥ तत्रापिवेतसपाकपाचित्यादिभावयोचयतोमितिपरः श्रोद्धावदंति
तत्रापसोपदानमिति। उत्तरंयोत्सुनसर्वथैव ॥ अपार्यकलुक्षपति। पोर्षापपोपोगादश्रुतिसं
वंद्धाथेमपार्थकं। पौर्वापर्यकार्यकारणाभावः जसापोगादसंभवात्शावद्वोधजनकाकांक्षा

पं ४
द्वित्या

यथाकं
रुप ४

ज्ञानाद्यभावादिति फलितार्थः । अप्रतिसंबद्धोऽसंबद्धोर्थः अर्थो यैर्जनं शाब्दबोधरूपं यत्र यद्यपि दशदा
डिमानि षडपूपाः कुंडमजाजिनम् इत्यादाववांतरवाक्यार्थबोधसत्त्वाद्व्याभिचार इति वा । मिश्रभिरर्थैकेऽन्वया
प्यभिमतवाक्यार्थबोधानुकूलाकांक्षादिरूपान्वयबोधजनकपदत्वं ज्ञात । अविज्ञातार्थे तु स्वरूपबोधो भव
त्येवेति नातिव्याप्तिः उदाहरणं तु अपोण्यानामसंज्ञानाकांक्षावाक्यं समासमभिमतवाक्यार्थो प्रतिपादक
निग्रहस्थानवत्तु ष्टयप्रकरणे अप्राप्तमप्राप्तकालं लक्षयति अवयवविपर्यासवचनमप्राप्तकालं अवय
वरूपकथैकदेशस्य विपर्यासो वैपरीत्यं तथा च स्वमपवंधविषयीभूतकथाक्रमविपरीतक्रमेणाभिधानं प
र्यवसन्नं तच्चापक्रमः । वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासाः उद्भावनीया इत्येकः पादः प्रतिवादि
नश्च नवोपालंभो द्वितीयः पादः प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणं चेति तृतीयः पादः जे
यपराजयव्यवस्था चतुर्थः पादः । एवं तं प्रतिज्ञाहेत्वादीनां क्रमः तत्र समभासोऽभव्या मोहादिनाव्युत्पत्त्या
भिधानं अप्राप्तकालमिति न्यूनं लक्षयति । हीनमन्यतमेनाप्यवयवेन न्यूनं अवयवत्वेन स्वशास्त्रसिद्धे

नत्वं ॥ नन्वयमहीनत्वं अवयवत्वावच्छिन्नाभावस्तथा चाकथनमेव स्यादत आह न्यूनमे नापीति ॥ तथा चायमस्ति किंचिदवयवस्त १ =

नात्तेन सौगतस्य ह्यवयवाभिधानेऽपि न न्यूनत्वावयवाभिधानं फलितं ॥ न चायमपसिद्धांतः सिद्धांतवि
रुद्धानभ्युपगमात् अपि तु सभाक्षोभादिनाऽनभिधानात् अधिकं लक्षयति हेतूदाहरणाधिकमधि
कं हेतूदाहरणोऽस्तु पलक्षणं दूषणाद्याधिकामपि बोध्यं तथा च कृतकर्तव्यास्तु पुनरुक्ताभिधानमिति
फलितं ॥ अनुवादस्तु न कृतकर्तव्यः साभिप्रायत्वात् ॥ प्रतिज्ञाधिकं यथा न पुनरुक्तं धूमादालोकान्महा
नसवच्चत्वात् वह्निरित्यादिकं हेतुविनासमय ॥ वंधदाधीदिममाह क्रमधिकं यथा महानसं महानसवह्निरिति हेतु
नाधिकं किं तु पुनरुक्तं समानेऽस्वसिद्धांतानुरूपप्रयोगाभावात् निग्रहस्थानाधिकत्वकरणं ॥ पुनरुक्तं लक्ष
यति ॥ शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥ पुनर्वचनं पुनरुक्तं ॥ तस्य विभागार्थं शब्दार्थयोरि
ति ॥ तेन शब्दपुनरुक्तमर्थपुनरुक्तं च लाभ्यते अनुवादेऽतिव्याप्तिवारणायान्यत्रानुवादादिति ॥ अनु
वादान्यत्वे सतीत्यर्थः ॥ निःप्रयोजनपुनरभिधानं हि पुनरुक्तं अनुवादस्तु व्याख्यारूपः सप्रयोजनक
स्वेति भावः ॥ तथा च समानार्थकसमानानुपूर्वीकशब्दप्रयोगः शब्दपुनरुक्तं समानार्थक भिन्नानु

हृषीकेश इत्यस्य निःप्रयोजनं पुनरभिधानमर्थपुनरुक्तं। आद्यं यथा धवो धव इति द्वितीयं यथा धवः कल
श इति। एतत्त्रयस्य च मालादिना संभवः। पुनरुक्तं प्रभेदान्तरमाह। अर्थापत्त्यस्य शब्देन पुनरभिधानं पुन
रुक्तमित्यनुवर्त्तते। यत्रास्मिन्नुक्ते यस्यार्थे स्यां अर्गीकी प्रतिपत्तिर्भवेत्तस्यैतेन रूपेण पुनरभिधानं पुन
रुक्तं इदमेव वाच्यपुनरुक्तमिति गीयते यथा वहिस्त्वमिति पूर्वपदाक्षिप्तोक्तिरियं। उक्तो वहिरि
ति तत्र पदाक्षिप्तोक्तिः। एवं वहिरस्ति गेहे नास्तीति विध्याक्षिप्तोक्तिः। जीवन् गेहे नास्ति वहिरस्तीति
निषेधाक्षिप्तोक्तिः। पुनरुक्तं चैविध्यं चेदं भाष्यादिसंमतं। अन्ये तु शब्दपुनरुक्तं द्विविधं तस्यैव शब्दस्य पु
नरभिधानं पर्यायेणाभिधानं पुर्यायेणाभिधानं च अन्य तु नरर्थपुनरुक्तमित्याहुः पुनरुक्तं चर्वितं
अननुभाषणं लक्षयति। विज्ञानस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणं परिष
दा विज्ञातस्याविशिष्टबुद्धार्थस्य वादिना त्रिरभिहितस्यापि यथा च प्रथमवचनेऽननुभाषणे वादिना
वारत्रयं वाच्यमिति दर्शितं तथा च त्रिरभिधानेऽपि यच्चाननुभाषणं विरोधी व्यापारस्तच्चाननुभाषणं नि

ग्रहस्थानमित्यर्थः। अस्थानसांकर्यनिरासाय स्थानमाविष्कुर्वतेति विक्षेपसांकर्यनिरासाय कर्मवि
च्छिंदतेति च विशेषणीयमित्यर्थः। न वाऽभिज्ञाभासांकर्यं उत्तरत्र जिपत्नावपि स्वभाक्षोभादिनानुभा
षणे संभवात्। तद्धिदं चतुर्थीसंकेते शानुवादात् विषयानानुवादात् केवलदूषणोक्त्या स्तंभेन चेति।
सर्वनामपदेनानुवादात् एवमामित्याचार्याः। क्वचिद्दृष्टानाश्रितिभानुभाषणासांकर्यमत्र (अभिहिते
न ५ चैतन्नुशकात्तेदेवोद्धार्यं। अस्थानेलक्षपति। अविस्थानेवास्थाने भावेक्तः चकारस्त्वपरिषदाविज्ञाजसो
न्याद्युत्कर्षणार्थं स्तथाच परिषद्दाविज्ञातस्यवादिनाचिरभिहितस्यापविस्थानमित्यर्थः। इदंच
किंवदसि वुध्यत एवनेस्याद्याविष्करणेन ज्ञातुंशक्यत इति। अत्र प्रतिभांलक्षयति उत्तरस्याप्रतिपत्तिरप्र
तिभा उत्तराहं परोक्तं वुध्वापि यत्रोत्तरसमये उत्तरं न प्रतिपद्यते तत्राप्रतिभानि ग्रहस्थानं। न वाज्ञानानु
भाषणस्यावश्यकत्वात्तदेव दूषणमस्त्विति वाच्यं। परोक्तानानुवादेन तत्र परोक्तमनूद्यापि नोत्तरं हि २
प्रतिपद्यते तत्रासांकर्यात्। एवमत्र नश्लोकपाद्युद्दे पाचेयं। विक्षेपयति। कार्यव्यासंगात्कथाविच्छेदोवि

पं.लक्ष्मी

क्षेपः कार्यव्यासंगात्कार्यव्यासंगमुद्भाव्येत्यर्थः ल्यब्लोपे पंचमी कार्यव्यासंगस्यासंभवात्कालान्तरकर्त्त-
व्यो[..]पितः तेन तादृशकथाविच्छेदो विक्षेपः। तेन गुरुतृषादिभिराकारणे गृहजनादिभिर्वावश्यककार्या-
र्थमाकारणे गुरुतृहाहादिकं यद्यद्योगमने वास्तवशिरोगादिनाशक्तिवंधे वान विक्षेपः। ननु कार्यव्या-
संगोद्भावनं कुतः सभाक्षोभादिना चेदननुभाषणमेव उत्तराशक्तिप्रयोज्यं चैवं अज्ञितिर्भैवेतिचेन्न। उत्तरणवसरामा-
वात्। वस्तुतस्तु नरस्फुरणाविषितदूषणासंभावनया विक्षेपसंभवात्। तपथ्याख्यातिः सकर्तृकाकार्यत्वादित्यनु-
के श्रवंकुरेव्यभिचारस्यावनयोद्भाव्यत्वचेदपंपक्षसमं ब्रूपात्र नहामों किंसु नर मतो उमहार्णवलिखि-
ते मपाचोक्तव्यभिचारिते किंचित्कार्यमुद्भाव्य गृहेगत्वा दूषयते इत्येवं विक्षेपसंभवात्। तु नृणादिरोधिनिग्रहस्था-
नववंक्तप्रकरणं मतानुज्ञां लक्षयति। स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसंगो मतानुज्ञा। दोषा-
भ्युपगमात् दोषमनुद्धृत्येत्यर्थः। पथ्या शब्दो नित्यः श्राव[illegible]
णत्वादित्युक्ते ध्वनावनैकान्तिकत्वेन हेत्वाभासोपन्यासः शब्दोऽनित्यः कृतकत्वादिति साधिते ध्वने

णंतु क्ष २

नुपियक्षस्त्वाभूरोषड्नुक्ते अप्सिद्धत्वात्तथापिहेत्वाभासोपनिस्तुन्नोसोपंमतानुज्ञयाभिगृहीतःस्यादप्रति
षिद्धमनुमतंभवतीतिस्वपक्षेदोषाभ्युपगमात्।पर्यनुयोज्योपेक्षणंपति।निग्रहस्थानप्राप्तस्यानिग्रहःपर्यनुयो
ज्योपेक्षणं।निग्रहस्थानेप्राप्तेपोऽनिग्रहः।निग्रहस्थानानुद्भावनमित्यर्थः।यत्रत्वनेकनिग्रहस्थानपातेस
कत्तरोद्भावनेतत्रनपर्यनुयोज्योपेक्षणं।अवसरेनिग्रहस्थानोद्भावनेत्वावच्छिन्नाभावस्यैवतत्वात्।ननुवादिनाकथ
मिदमुद्भाव्यं।स्वकौपीनविवरणास्यायुक्तत्वादितिचेत्।सत्यंमध्यस्थेनैवेदमुद्भाव्यं।वादेनस्वयमुद्भावनेप्यदो
षः।निरनुयोज्यानुयोगंलक्षयति।अनिग्रहस्थानेनिग्रहस्थानाभिवनाभियोगोनिरनुयोज्यानुयोगः॥
अवसरेयथार्थनिग्रहस्थानोद्भावनापिरिक्तंपत्रिग्रहस्थानोद्भावनंतदित्यर्थः।एतेनानवसरेनिग्रहस्थ
नोद्भावनेएकनिग्रहस्थानेनिग्रहस्थानांतरोद्भावनेचनाव्याप्तिः।सोपंचतुर्दशकल्लेजातिराभासोऽनवसर
ग्रहणंच।आभासोव्यभिचारादिस्त्वसिद्धाद्युद्भावनेएकनिग्रहस्थानेनिग्रहस्थानांतरोद्भावनेनेवनाव्याप्तिः।
सोपंचतुर्दशोक्तो अनवसरग्रहणंचाकालेवोद्भावनं।यथान्यस्यासिद्धेत्प्रतिज्ञाहानिर्विशेषपक्षेवेद्वेत्वे

न ५

नरं। एवमवसरमतीत्य कथनमपि यथा उच्यमानग्रन्थस्यार्थं शब्दादेः परिसमाप्तौ एवमनुक्रियाद्याख्या
नाघननुभाषणावसरे उद्भावबोधाधिक्करणानुभाषणाप्रवृत्ते वादिनि तदुद्भावनमित्यादिकमूह्यं दोषनिग्र
ह्यनिग्रहस्थानविकथ । अपसिद्धान्तलक्षणं सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसंगोऽपसिद्धान्तः। सिद्धान्तं स्व
शास्त्रकाराभ्युपगतमर्थं स्वीकृत्य नियमात् तदविरुद्धमवचनवादकथाप्रसंग इति तथा च कथायां स्वीकृतसि
द्धान्तप्रच्यवोऽपसिद्धान्तः। तथा च सांख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायां कथायां आविर्भावस्याविर्भा
वाभ्युपगमे ऽनवस्थेति दूषणोद्धाराय आविर्भावस्यासत एव उत्पत्तिमभ्युपैति तदापसिद्धान्तः। एवमेकदेशिमते
न कथामारभमाणेन तस्य शास्त्रकाराभ्युपगमविरोधेनापसिद्धान्त इति बोध्यं तदभ्युपेते मुख्यमेव गतास्वपसि
द्धान्तदूषणं नमन्यं तदित्यन्यदेतत्। क्रमप्राप्ते हेत्वाभासलक्षणा वक्तव्य तदकथनबीजमाह। हेत्वाभासा
श्च यथोक्ताः॥ चः पुनरर्थे हेत्वाभासाः पुनः यथा येन रूपेण पूर्वं सूत्रोक्तास्तेनैव रूपेण तेषां निग्रहस्थानत्वमिति तन्
नस्य गणान्तरमपेक्षितमिति। अत्र च वक्तास्य दृष्टान्ते साधनवैकल्यादि समुच्चायकत्वमिति केचिन्न। अय

योक्ताइत्यस्यानन्वयायत्नेरिति। कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयम्॰ समाप्तंनिग्रहस्थानविशेष
लक्षणं। समाप्तंचपंचमस्याह्निकं। एषामुनिवरगौतमसूत्रवृत्तिः श्रीविश्वनाथकृतिनाहृगमात्म
वर्णा श्रीकृष्णचंद्रचरणांबुजचंचरीक श्रीमच्छिरोमणिवचःप्रचयैरकारि १ कठिनार्थयदाकृतिम
मेतांमहुनित्वज्वरणोसमर्पयामिअपराधमिमंप्रभोक्षमेथानतुनारायणदेवदीनबंधो २ रसवाणाति
थौशाकेइलालेवहुलेकामेतिथौसुवौसितेह अकरोन्मुनिसूत्रवृत्तिमेतांननुवृंदाविपिनेसविश्वनाथः
३ इति श्रीमहामहोपाध्यायश्रीमद्विद्यानिवासभट्टाचार्यात्मजश्रीविश्वनाथभट्टाचार्यकृतायांन्या
यसूत्रवृत्तौपंचमोऽध्यायः समाप्तः ॥छ॥ समाप्तेयंसूत्रवृत्तिः छ [illegible]करोपनामकमं[illegible]सेतत्पुस्त
कम संवत् १९६१ मीतीफाल्गुणसुदी १ वारमंगर लीखीतंदीनानाथ [illegible] २२॥

भीमन्महाड गाधर

॥ इति न्यायसूत्रवृत्तिः समाप्ता ॥

३०००